T. No. 75

# शिवधर्मोत्तरम् ŚIVADHARMOTTARAM

copied from a manuscript with no 66014 of Adyar Library, Madras.

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

Liste des adhyāya du Śivadharmottaraśāstra
Ms. I.F.I. n°75
Copie de Ms. 66014 Adyar Library (caractères Telugu). feuilles de palmier


I. Colophon p.11. इति श्रीशिवधर्मोत्तरशास्त्रे गोषड्विधिर्नाम प्रथमोध्यायः

II — p.31: — विद्यादानफलं —

III — p.41: — पञ्चमहायज्ञगुणाध्यायो —

IV — p.62: — सत्पात्रगुणं — —

V — p.58 — शिवसंगत्यः — — —

VI — p.69 — पापभेदं — — —

VII — p.95 — नरकविशेषन्नाम — —

VIII — p.119 — संसारप्रसवाख्यानं — —

IX — p.124 — स्वर्गनरकचिह्नो — —

X — p.145 — ज्ञानयोगो —

XI — p.154 — प्रयश्चित्तकथनं —

XII — début p.155 – incomplet, début :


अगस्त्यः —

श्रुत्वैतत्परमं गुह्यं गवां देहसमुद्भवम् ।
ब्रह्मकूर्चस्य माहात्म्यमगस्त्यः पुनरब्रवीत् ॥
भगवन्भुवनां चागोलोकः कीदृशस्स्मृतः ।
प्राप्यते कर्मणा तेन कियत्यध्वनि संस्थितः ।

स्कन्दोवाच —

श्रूयतामभिधास्यामि नमस्कृत्य महेश्वरम् ।
गोमातृलोकं परमं सर्वकामसमन्वितम् । — — —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

No. 66014
P.L.
आन्ध्रलिपिः

(1)
73

( ॥ श्रीः ॥ )

# ॥ शिवधर्मोत्तरम् ॥

शिवमस्तु सर्वजगतां परहितनिरताभवन्तुभूतगणाः।
दोषाः प्रयान्तु शान्तिं सर्वत्रसुखीभवन्तुसकललोकाः॥ 1
ज्ञानशक्तिधरं शान्तं कुमारं शङ्करात्मजम् ।
देवारिसूदनं स्कन्दमगस्त्यः परिपृच्छति । 2
भगवन्दर्शनात्तुभ्य मन्त्यजस्यापि सद्गतिः ।
सप्तजन्मनि विप्रश्च स्वर्गाद्भ्रष्टः प्रजायते । 3
तेनापि नाथ भूतानां सर्वेषामनुकंपकः ।
अतस्संक्षेपतो धर्मं ब्रूहि सर्वहितं मम । 4
धर्मा बहुविधा देव्या देवेन कथिताः किल ।
तेच्च श्रुता त्वया सर्वे पृच्छामि त्वामहं ततः । 5
किं प्रधानाश्शिवे धर्माश्शिववाक्यंच कीदृशम् ।
*शिवः लिङ्गार्चितः* केन विधिना संप्रसीदति
विद्यादानं च सर्वेषां दानानामुत्तमं किल । 6
तच्च श्रुतं द्विजेन्द्राणां नान्येषां समुदाहृतम् ।
तत्पुण्यं सर्ववर्णानां जायते केन कर्मणा । 7
ज्ञेयं कतिविधं तच्च विद्यादानमनुत्तमम् ।
कानि कृत्वैव कर्माणि गृहिणः स्वर्गताः पुनः । 8
मनुष्यलोके संभूता योगं विन्दन्ति शाङ्करम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कर्मयज्ञस्तपो यज्ञः स्वाध्यायो ध्याननिर्वृतिः । 9
ज्ञानयज्ञश्च पञ्चैते महायज्ञाः प्रकीर्तिताः ।
एषां च पञ्चयज्ञानामुत्तमः कतमः स्मृतः । 10
एतद्यज्ञरतानां च प्रदाने कीदृशं फलम् ।
धर्माधर्मप्रभेदाश्च कियन्तः परिकीर्तिताः । 11
तत्साधनानि कतिधा गतयश्च तदात्मकाः ।
स्वर्गनारकिणां पुंसामायतानां पुनः क्षितौ । 12
कानि चिन्हानि जायन्ते भुक्तशेषेण कर्मणा ।
3a (1a) संसारसागराद्घोराद्धर्मोर्मिसंकुलात् । 13
गर्भादिदुःखफेनाढ्यात् मुच्यन्ते देहिनः कथम् ।
इति संचोदितस्स्कन्दस्संप्रश्नार्थान्भार्गवैः । 14
प्रत्युवाच महासेनः प्रणिपत्य महेश्वरम् ।
स्वर्गापवर्गफलदं नरकार्णवतारणम् । 15
शिवधर्मोत्तरं नाम शास्त्रमीश्वरभाषितम् ।
श्रीस्कन्द उवाच —
श्रद्धापूर्णा सर्वधर्मा श्रद्धामध्यान्तसंस्थिताः । 16
श्रद्धानिष्ठाप्रतिष्ठाश्च धर्मश्श्रद्धैव कीर्तिताः ।
श्रुतिमात्ररसाः सूक्ष्माः प्रधानपुरुषेश्वराः । 17
श्रद्धामात्रेण गृह्णन्ते नरकेण (द्ध) चक्षुषा ।
कायक्लेशैर्न बहुभिः नचैवार्थैर्निराशिभिः । 18

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

धर्मस्संप्राप्यते सूक्ष्मः श्रद्धाहीनैस्सुरैरपि ।
श्रद्धाधर्मं परं सूक्ष्मं श्रद्धा दानं हुतं तपः । 19
श्रद्धा स्वर्गश्च मोक्षश्च श्रद्धा सर्वमिदं जगत् ।
सर्वस्वं जीवितं चापि दद्यादश्रद्धया यदि । 20
न प्राप्नुयात् फलं किंचित् श्रद्धाधानं ततो भवेत् ।
एवं श्रद्धामयास्सर्वे शिवधर्माः प्रकीर्तिताः । 21
शिवश्च श्रद्धया गम्यः पूज्यो ध्येयश्च श्रद्धया ।
आज्ञासिद्धमसंदिग्धं वाक्यमेतच्छिवात्मकम् । 22
नानासिद्धियुतं दिव्यं लोकचित्तानुरञ्जनम् ।
सुनिश्चितार्थगंभीरं वाक्यं गाणेश्वरं स्मृतम् । 23
मन्त्रं सुखमुखोच्चार्यमशेषार्थप्रसादकम् ।
प्रागोन्नमश्शिवायेति स स्सर्वदेहिनाम् । 24
74 स जं सर्वर्थानां मन्त्रमाद्यं षडक्षरम् ।
अतिसूक्ष्मं महार्थं च ज्ञेयं तद्वटबीजवत् । 25
देवो गुणत्रयातीतः सर्वज्ञस्सर्वकृत्प्रभुः ।
ओमित्येकाक्षरे मन्त्रे स्थितस्सर्वगतश्शिवः । 26
ईशानाद्या . . सूक्ष्माणि ब्रह्मण्येकाक्षराणि तु ।
मन्त्रे नमश्शिवायेति संस्थितानि यथाक्रमम् । 27
मन्त्रे षडक्षरे सूक्ष्मः पञ्चब्रह्मतनुश्शिवः ।
वाच्यवाचकभावेन स्थितस्साक्षात्स्वभावतः । 28

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वाच्यश्शिवो प्रमेयत्वान्मन्त्रस्तद्वाचकस्स्मृतः ।
वाच्यवाचकभावोयमनादिस्संस्थितस्तयोः । 29
यथानादिः प्रवृत्तोयं घोरस्संसारसागरः ।
शिवोपि हि यथानादिः संसारान्मोचकस्स्मृतः । 30
व्याधीनां भेषजं यद्वत् प्रतिपक्षः स्वभावतः ।
तद्वत्संसारदोषाणां प्रतिपक्षश्शिवस्स्मृतः । 31
असत्यस्मिन् जगन्नाथे तमोभूतमिदं भवेत् ।
आदित्येन विहीनं हि निरालोकं जगद्यथा । 32
तस्मादनादिस्सर्वज्ञः परिपूर्णस्स्वभावतः ।
मूर्तिहेतुश्शिवस्सिद्धः सर्वज्ञो ज्ञानभासकः । 33
तस्याभिधानमन्त्रोयमभिधेयश्च संस्मृतः ।
अभिधानाभिधेयत्वान्मन्त्रात्सिद्धः परश्शिवः । 34
वेदे शिवागमे चैव कुभयत्र षडक्षरः ।
मन्त्रस्स्थितस्सदा मुख्यो लोके पञ्चाक्षरस्स्मृतः । 35
किं तस्य बहुभिर्मन्त्रैश्शास्त्रैर्वा बहुविस्तरैः ।
यस्योन्नमश्शिवायेति मन्त्रोयं हृदि संस्थितम् (ः) । 36
तेनाधीतं श्रुतं तेन तेन सर्वमधिष्ठितम् ।
येनोन्नमश्शिवायेति मन्त्राभ्यासस्स्थिरीकृतः । 37
शिवज्ञानानि यावन्ति विद्यास्थानानि यानि च ।
24a षडक्षरस्य सूत्रस्य तानि भाष्यं समासतः । 38

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एतावद्धि शिवं ज्ञानं एतस्मात्परमं पदम् ।
यदोन्नमश्शिवायेति शिववाक्यं षडक्षरम् । 39
विधिवाक्यमिदं शैवं सार्थवादं शिवात्मकम् ।
लोकानुग्रहकर्ता यः स मृषार्थं कथं वदेत् । 40
सर्वज्ञः परिपूर्णस्तु इन्यथा केन हेतुना ।
ब्रूयाद्वाक्यं शिवश्शान्तस्सर्वदोषविवर्जितः । 41
यद्यथावस्थितं वस्तु गुणदोषस्वभावतः ।
यद्यत्फलं च पुण्यं च सर्वज्ञश्च तथा वदेत् । 42
रागद्वेषादिभिर्दोषैः ग्रस्तत्वादनृतं वदेत् ।
तेचेश्वरे न विद्यन्ते ब्रूयात्स कथमन्यथा । 43
अपेताशेषदोषेण सर्वज्ञेन शिवेन ये ।
प्रणीतममलं वाक्यं तत्प्रमाणं न संशयः । 44
तस्मादीश्वरवाक्यानि श्रद्धेयानि विपश्चिता ।
यथार्थं पुण्यपापेषु तदश्रद्धो व्रजत्यधः । 45
शिववाक्यप्रवक्तारं शिववत्पूजयेद्गुरुम् ।
नृपः परोपकाराय स्वात्मनश्च विभूतये । 46
जगद्धिताय नृपतिं शिवधर्मे नियोजयेत् ।
तन्नियोगादयं लोकः शुचिस्स्याद्धर्मतत्परः । 47
यं यं धर्मं नरश्रेष्ठस्समाचरति भक्तितः ।
तत्तं समाचरेल्लोकस्तत्प्रामाण्याद्भयेन वा । 48

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

धर्मनिष्ठः कृतो राजा धर्मवादैकह. सतः ।

युगत्रयस्स विज्ञेय स्तस्मा द्राजा चतुर्युगम् । 49

धर्मज्ञस्स त(तं) राजा प्रजान्यायेन पालयेत् ।

न्यायतः पाल्यमानस्तु ध्यायन्ति स्वामिनं शिवम् । 50

75 25 धर्ममर्थं च कामं च यदन्य मीहते ।

तत्तदाप्नोत्ययं तेन प्रजान्यायेन पालयेत् । 51

प्रजासु धर्मनिष्ठासु षष्ठमं न भजेन्नृपः ।

अधर्मिष्ठात्स्वधर्मस्य चतुर्थांशेन लिप्यते । 52

तस्मादधर्मे मज्जन्तं लोकं राजा निवारयेत् ।

शिवे नियोजयेन्नित्यमभयार्थं विचक्षणः । 53

धर्मशीले नृपे यस्मात् प्रजास्युर्धर्मतत्पराः ।

नृपतिं बोधये तस्मात्सर्वलोकानुकंपया । 54

कृपायेन श्रायालोभान्मुहुश्छन्देन बोधयेत् ।

मन्त्रौषधिक्रियाद्यैर्वा लुब्धको विनियोजयेत् । 55

मन्त्रौषधीनिधिक्षेत्रं फलमूलरसक्रियाः ।

धर्ममार्गावताराय धर्माष्टाङ्गः प्रकीर्तितः । 56

प्रत्ययाष्टाङ्गवादेन कामार्थाभिरतान्नृपान् ।

शनैर्धर्मे न युञ्जीत ज्ञानयोगे पुनः क्रमात् । 57

एवं यस्सर्वयत्नेन राजानं बोधयेद्बुधः ।

जगद्गुरुस्स विज्ञेयस्सर्वलोकानुकंपकः । 58

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

संसारपङ्क निर्मग्नं यस्समुद्धरते जनम् ।

शिवज्ञानात्मकेनैव हस्तेन सदृशः पिता । 59

अज्ञानवह्निसंतप्तं निर्वापयति यश्शनैः ।

ज्ञानामृतेन नृपतिः कस्तं न प्रतिपूजयेत् । 60

नैवराज्येन महता नचैवार्थस्य राशिभिः ।

प्राप्यमज्ज्ञानशमनं परलोकसुभाषितम् । 61

स्वर्गापवर्गसिद्ध्यर्थं भाषितं यत्सुशोभनम् ।

वाक्यं मुनिवरैश्शान्तैस्तद्विज्ञेयं सुभाषितम् । 62

विरूपमपि तं वाक्यं विज्ञेयमतिशोभनम् ।

75a रागद्वेषानृतक्रोधकामतृष्णानुसारि यत् । 63

वाक्यं निरयहेतुत्वात् तद्दुर्भाषितमुच्यते ।

संस्कृतेनापि किंतेन मृदुना ललितेन वा । 64

अविद्यारागवाक्येन संसारक्लेशहेतुना ।

यच्छ्रुत्वा जायते पुण्यं रागादीनां च संक्षयः । 65

विरूपमपि तद्वाक्यं विज्ञेयमतिशोभनम् ।

पुराणं भारतं वेदं शास्त्राणि सुबहूनि च । 66

आयुषः क्षपणायैव धर्मोल्पग्रन्थसंस्थितः ।

पुत्रदारादिसंसारः पुंसां संमूढचेतसाम् । 67

विदुषां शास्त्रसंसारः सयोगाभ्यासविघ्नकृत् ।

इदं ज्ञेयमिदं ज्ञेयं यस्सर्वं ज्ञातुमिच्छति । 68

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शास्त्रान्तं
अपि वर्षसहस्रायुः ~~शास्त्रौकं~~ नाधिगच्छति ।
विज्ञायाक्षरतं मात्रं जीवितं चापि चञ्चलम् । 69
विहाय शास्त्रजालानि पारलौकिकमाचरेत् ।
पण्डितेनापि किं तेन समर्थेन च देहिना । 70
यः पुण्यमारभुक्तो दुमशक्तः पारलौकिकम् ।
पण्डितोपि स मूर्खस्स्यात् शक्तियुक्तो ~~[illegible]~~ (व्य) शक्तिकः । 71
यस्संसारात्स्वमात्मानमुत्तारयितुमक्षमः ।
तस्मात्सनिन्दितः शान्तस्स ~~[illegible]~~ (मनस्वी) (जि)तेन्द्रियः । 72
यश्शिवज्ञानसद्भावमालोचयितुमुद्यतः ।
यः प्रपद्यान्महीं कृत्स्नां महामेरुं च काञ्चनम् । 73
सम्यिव न्यायतः पृच्छेन्न तस्योपदिशेद्गुरुः ।
यश्श्रृणोति शिवज्ञानं न्यायतः तत्प्रवर्ति च । 74
तौ गच्छतश्शिवज्ञानं नरकं तद्विपर्यये ।
76 ~~अक्ष~~ (थवा) देहसंभूतपण्ड(ङ्)ङ्गं विधिना शिवः । 75
लिङ्गं संपूजितश्शीघ्रं ~~[illegible]~~ नराणां संप्रसीदति ।
सुरासुरैर्मथ्यमानात्क्षीरोदात्सागरोत्तमात् । 76
पञ्चगावस्समुत्पन्ना स्सर्वलोकस्य मातरः ।
नन्दा भद्रा च सुरभिस्सुशीला सुम . या । 77
पञ्चगावश्शिवपुराश्शिति प्राधाश्शि ~~[illegible]~~ (वेच्छ)या ।
सर्वलोकोपकारार्थं देवानां तर्पणाय च । 78

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

गोमातरस्स्थिता भूमौ स्नानार्थं च शिवस्य ।
गोमयं रोचनां मूत्रं क्षीरं दधि घृतं गवाम् ।७९
षडङ्गानि पवित्राणि सर्वसिद्धिकराणि च ।
गोमयादुत्थितं श्रीमान् बिल्ववृक्षः शिवप्रियः ।८०
तत्रास्ते पद्महस्ता श्रीः श्रीवृक्षस्तेन सस्मृतः ।
बीजान्युत्पलपद्मानां पुनर्जानाति गोमयात् ।८१
गोरोचना च माङ्गल्या पवित्रा सर्वसिद्धिदा ।
गोमूत्राद्गुग्गुलुर्जातस्सुगन्धः प्रियदर्शनः ।८२
आहारस्सर्वदेवानां शिवस्य च विशेषतः ।
यद्बीजं जगतः किञ्चित् ज्ञेयं क्षीरसंभवम् ।८३
दध्नस्सर्वाणि जातानि माङ्गल्यान्यर्थसिद्धये ।
घृतादमृतमुद्भूतममराणामतिप्रियम् ।८४
तस्माद्घृतेन पयसा दध्ना च स्नापयेच्छिवम् ।
तदन्ते चोष्णतोयेन कषायैश्च विरूक्षयेत् ।८५
स्नाप्य शीतांबुना पश्चात् लिङ्गं रोचनया लिपेत् ।
पूजयेद्बिल्वपत्रैश्च पद्मैर्नीलोत्पलैरपि ।८६
अर्चयित्वा दहेत्पश्चाद्घृतयुक्तं च गुग्गुलुम् ।
पायसं दधिभक्तं च घृतं दध्ना परिप्लुतम् ।८७
निवेदयेच्छिवायैतत् भक्ष्यं च घृतपाचितम् ।
76 a
26 a
कृत्वा प्रदक्षिणं चान्ते प्रणिपत्य क्षमापयेत् ।८८

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अनेन विधिना देवः षडङ्गेन प्रसीदति ।
इहलोके परे चैव सर्वकामान्प्र(य)च्छति ।89
षडङ्गविधिना तस्मा ... तस्मान्नृपतिः पूजयेच्छिवम् ।
शिवभक्तस्समुत्तार्य कुलानामेकविंशतिम् ।90
स्वर्गे स्थाप्य स्वयं गच्छेदैश्वरं परमं पदम् ।
आश्रितास्सर्वभृत्याश्च देवकार्ये नियोजिताः ।91
प्रयान्ति स्वामिना सार्धं श्रीमच्छिवपुरं महत् ।
भुक्त्वा तत्रातुलान्भोगान् भृत्यवर्गसमन्वितः ।92
कालात्पुनरिहायातः पृथिव्यामेकराड्भवेत् ।
वृक्षः पुष्पाङ्गपत्राद्यैः उपयुक्ताश्शिवार्चने ।93
शिवभावाच्च गच्छन्ति रुद्रलोकं न संशयः ।
पूज्यतं पूज्यमानं वा यः पश्येच्छ्रद्धया शिवम् ।94
सोऽपि यागफलं कृत्स्नं प्राप्नुयान्नात्र संशयः ।
श्रुत्वा तु मोदते पुण्यमैश्वरं यस्समाधिना ।95
फलं तत्सममाप्नोति पूजयेच्छक्तितश्शिवम् ।
श्रुत्वा तु मुमुदे यस्तु सञ्च योगफलं लभेत् ।96
अर्चितं शङ्करं दृष्ट्वा सर्वपापैः प्रमुच्यते ।
हर्षात्प्रणम्य तं भूमौ शिवलोके महीयते ।97
संपूज्यमानं विधिना यः पश्येच्छ्रद्धया शिवम् ।
तत्समं फलमाप्नोति शिवस्य स्नपनं तथा ।98

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यदृशो यैः शिवे भक्तैः ध्यानार्चनकृतं तपः ।
भक्त्यानुमोदनेनेशः तत्सर्वं प्रसीदति ॥ 99
77 शिवपुण्यमहीनाथामशोषजनसेवितम् ।
कालत्रयेऽपि निखिलं तच्च स्यादनुमोदते ॥ 100
इति त्रिसन्ध्यमखिलं यः पुण्यमनुमोदते ।
असंशयमतिश्रद्धं तत्समं फलमाप्नुयात् ॥ 101
इति धर्माः शिवेनोक्ताः सुसूक्ष्माः सुमहत्फलाः ।
कीर्तितास्तेन मानेन शिवार्चनविधिं प्रति ॥ 102

॥ इति श्री शिवधर्मोत्तरे शास्त्रे
गोषडङ्गविधिर्नाम
प्रथमोऽध्यायः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

( ॥ श्रीः ॥ )

( ॥ अथ द्वितीयोऽध्यायः ॥ )

अथ विद्याविदे दाता विद्यात्मानं शिवात्मकम् ।
तस्माद्दानं महादानं सर्वदानोत्तमोत्तमम् ॥ 1
अध्याप्य यजनैः शिष्यान् स्निग्धान्वा भक्तान्संबोधयेत् ।
शिवविद्यानुसारेण विद्यादानं तदुच्यते ॥ 2
संस्कृतैः प्राकृतैर्वाक्यैः यश्शिष्यानुरूपतः ।
देशभाषाद्युपायैश्च बोधयेत्स गुरुस्स्मृतः ॥ 3
यथा शिवस्य नैवान्तः संपूर्णस्य महात्मनः ।
तथा विद्याप्रदानस्य नान्तस्सर्वगुणात्मनः ॥ 4
शिवाद्यगुणमैश्वर्यं विद्यादानादवाप्नुयात् ।
दृढकीर्तिं श्रियं ब्राह्मीं प्रज्ञां बुद्धिं धनं सुखम् ॥ 5
यो श्रद्धधानमात्मानं ज्ञानमध्यापयेत्परम् ।
स याति नरकं घोरं पापीयान्ज्ञानघातकः ॥ 6
शिवज्ञानस्य कालेन विनष्टस्य प्रमादतः ।
पुनाति रिक्तवर्णस्य मूर्खैर्दुर्लिखितस्य च ॥ 7
प्रमादाधीतपाठस्य स्वसिद्धान्तविरोधिनः साधितस्याल्पबुद्धिभिः ।
ज्ञानावलेपमापन्नैराचार्यैर्बाधितस्य च ॥ 8
व्यर्थैः पदैरुपेतस्य पुनरुक्तस्य चार्थितः ।
पूर्वोत्तरविरुद्धस्य स्वसिद्धान्तविरोधिनः ॥ 9

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

77a छन्दसा तीव्रहीनस्य शब्दार्थरहितस्य च ।
इत्येवमादिदोषैरुपेतस्य क्वचित्क्वचित् । 10
यः करोति पुनस्तस्य संस्कारं पूर्ववद्गुरुः ।
शिव तत्रात्मनि बुद्धीमान् स विद्वान्परमेश्वरः । 11
न चास्य पुण्यमाहात्म्यं वक्तुं शक्यं हि केनचित् ।
यथा शिवस्तथैवायमस्मिन्नित्यं शिवस्थितः । 12
विद्यादानं प्रवक्ष्यामि धनिनां पुस्तकाश्रितम् ।
लिख्यते दीयते येन विधिना तत्फलं च यत् । 13
शिवं संपूज्य विधिवत् तद्विद्यां पूजयेत्ततः ।
गुरुं च शिववद्भक्त्या तुल्यमेतत्त्रयं यतः । 14
यथा शिवस्तथा विद्या यथा विद्या तथा गुरुः ।
शिवविद्यागुरूणां च पूजया सदृशं फलम् । 15
भूमिभागे समे रम्ये सर्वदोषविवर्जिते ।
विद्यामण्डलकं कुर्यात् गन्धगोमयवारिणा । 16
अष्टहस्तं तदर्धं वा वृत्तं वा चतुरश्रकम् ।
तन्मध्ये सितचूर्णेन लिखेत्पद्मं सुशोभनम् । 17
तद्बहिर्वर्णकैश्चित्रैर्नानाशोभां प्रकल्पयेत् ।
पञ्चवर्णैश्च कुसुमैः यथाशोभमलंकृतम् । 18
सितं वितानछत्रं वा तदूर्ध्वमुपकल्पयेत् ।
मुक्तादामपरिक्षिप्तं किंकिणीरवकान्वितम् । 19

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

लम्बकैर्ध्वजदामैश्च मुक्तादामैस्सकञ्चुकैः ।
पवित्रपुष्पस्रग्दामैः घण्टाचामरभूषितैः । 20
विचित्रवस्त्रसंछन्नैः चतुर्भिः दण्डकैर्युतम् ।
कुड्कुदैरर्धचन्द्रैश्च पर्वणान्युपशोभितैः । 21
सितपद्ममुखोद्गारैः चतुर्भिः कलशैश्शुभैः ।
शोभितं सितमृत्पात्रैर्यवशाल्यंकुरोद्भवैः । 22
78 विद्यासिंहासनं श्रीमान्नागदन्तादिनिर्मितम् ।
सुवर्णरत्नखचितं [निचितं] दुकूलास्तरणान्वितम् । 23
दण्डासनं वा श्रीमन्तं हेमरत्नोपशोभितम् ।
नागेन्द्रदन्तखचितं रक्तचन्दनदारुजम् । 24
स्राव्यपुष्पगृहस्यान्तं गन्धपुष्पैस्समर्चयेत् ।
लेख्यं च लिखितं चात्र विन्यसेत्पुस्तकद्वयम् । 25
रोचनाचन्दनाद्यैश्च पुष्पधूपैश्च पूजयेत् ।
ध्वजप्रदीपमालाभिः क्षौमवस्त्रैश्च पूजितैः । 26
शिववत्पूजयेद्भक्त्या यथाविभवविस्तरम् ।
कृष्णागरुकर्पूरैः सितचन्दनगुग्गुलैः । 27
दद्यात्पञ्चविधं धूपं समुत्क्षिप्य पुनः पुनः ।
ततः प्रदक्षिणं कृत्वा नमेत्साष्टाङ्गकं नृपः । 28
संपूज्यैव शिवज्ञानं गुरुं संपूजयेत्ततः ।
द्वितीये पुष्पगृहके श्रीमद्दाननसंमितम् । 29

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिववत्पूजयेद्भक्त्या शिवज्ञानप्रकाशकम् ।

त्रिधा प्रदक्षिणं कृत्वा दण्डवत्प्रणमेत्क्षितौ । 30

विज्ञापयेत्समुत्थाय जानुभ्यां धरणीं ततः ।

कृताञ्जलिपुटो भूत्वा प्रणिपत्य पुनर्गुरुम् । 31

भगवन्त्वत्प्रसादेन शास्त्रे संचरयाम्यहम् ।

तथैवास्त्वित्यनुज्ञात श्शास्त्रपुण्यमथाचरेत् । 32

मङ्गलैस्तूर्यघोषैश्च कृतस्वस्त्ययनश्शुचिः ।

स्नातश्शुक्लाम्बरधरो गन्धमाल्यैश्च भूषितः । 33

हेमाङ्गुलीयपाणिस्तु कटकौघैरलङ्कृतः ।

लिखेत्प्रणम्य देवेशं लेखकः श्लोकपञ्चकम् । 34

ततो विविधभक्ष्यान्नपानकव्यञ्जनादिभिः ।

भोजयेच्च गुरुं पूर्वं व्रतिनस्सद्विजानपि । 35

28a दीनान्धकृपणानाथान् बालवृद्धकृशातुरान् ।

मातापितृसुहृद्बन्धूनेतान्सर्वांश्च भोजयेत् । 36

समाप्यैवं गुरुं पश्चात् भुञ्जीयाद्भृत्यसंयुतम् ।

दत्वा गणबलिं रात्रौ ब्रह्मचारी निशि स्वपेत् । 37

अपरेहनि पूर्वाह्णे विद्यामण्डलकं बुधः ।

कृत्वा द्विहस्तमात्रं तु नानावर्णपशोभितम् । 38

यवाङ्कुरशरावाद्यैः चित्रकल्पैरलङ्कृतम् ।

स्वं धूपादिसमायुक्तं वितानविततांबरम् । 39

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिवयन्त्रासनासीनं तन्मध्ये पूज्य पुस्तकम् ।
एवं लिखेद्वाचयेद्वा कृत्वा पूजां दिने दिने ।40
चतुरश्रैस्समैश्शुद्धैः नातिस्थूलैर्नवाङ्कुरैः ।
संपूर्णावयवैस्स्निग्धैः नातिविच्छिन्नसंहतैः ।41
मात्रानुस्वारसंयोगह्रस्वदीर्घादिलक्षणैः ।
नन्दिनागरकैर्वर्णैः लेखयेत् शिवपुस्तकम् ।42
संपूजयेत्पूर्वविधिना पुनः पूजां प्रकल्पयेत् ।
शिवाग्निगुरुविद्यानां नोपवासः प्रयत्नतः ।43
कल्पयेज्जागरं तत्र वादित्रैर्मधुरस्वनैः ।
गीतनृत्तैर्बहुविधैराख्यानैश्च शिवात्मकैः ।44
वेदघोषैश्च विविधैः प्रेक्षणीयैस्सुशोभनैः ।
क्रीडायन्त्रप्रयोगाद्यैरित्येवं क्षपयेन्निशाम् ।45
शिवविद्याविमानं च कुर्यात्प्रातस्सुशोभनम् ।
पञ्चषट्सप्तभौमं वा गुरुवंशादिकं दृढम् ।46
विचित्रवस्त्रसंछन्नं सर्वशोभासमन्वितम् ।
विद्यासनं तु तन्मध्ये . . ज्ञानस्य पुस्तकम् ।47
हेमरत्नाचितं दिव्यमपिधानं तच्छोभितम् ।
279 विचित्रं चित्रयुक्तं वा बहिरुत्कीर्णकर्मकम् ।48
पार्श्वतश्छत्रसंयुक्तं सुदृढं सूत्रबन्धनम् ।
संपूज्य गन्धपुष्पाद्यैः पूर्वोक्तविधिना बुधः ।49

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

समुत्थापनयेद्देव्या तद्विमानं शिवाश्रमे ।
सुस्थिरं रथमुख्येन पुरुषैर्वापि बलान्वितैः । 50
छत्रध्वजपताकाद्यैः वितानैस्तूर्यनिस्वनैः ।
मङ्गलैर्वेदघोषैर्वा न धूपैः कलशैश्शुभैः । 51
चारणैर्वन्दिभिर्वाद्यैः स्त्रीसंगीतैर्विभूषितैः ।
चारुचामरहस्ताभिः छत्रदण्डैस्सदर्पणैः । 52
महताजनसंघेन पुरतश्च महीपतिः ।
धर्मवृद्धैस्स्वयं गच्छेत् सर्वशोभासमन्वितः । 53
अथवा हस्तियानस्थं कृत्वा पुरतमानयेत् ।
राजमार्गेण महता नगरान्तः प्रदक्षिणम् । 54
सर्वायतनपूजां च स्वधनैः कारयेन्नृपः ।
दश दिक्षु बलिं दद्यान्नगरस्य समन्ततः । 55
मार्गेऽपि पुरतो गच्छेत् पुष्पं दत्वा निरन्तरम् ।
गन्धपुष्पाक्षतैर्युक्तमुदकं चन्दनानुगम् । 56
गच्छेयुर्यत्र तत्रात्र सर्वायतनवासिनः ।
पुरतश्शिवविद्यायास्स्मरन्तो मन्त्रमीश्वरम् । 57
शुक्लाम्बरधरास्सर्वे भवेयुः पुरवासिनः ।
उच्छ्रयेयुः पताकांश्च जनास्तद्देशवासिनः । 58
गृहदेवांश्च संपूज्य कार्यश्चाप्युत्सवो गृहे ।
ब्राह्मणान्भोजयेयुश्च गृहेषु गृहमेधिनः । 59

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अन्नपानैर्जनपदाद्यात्रां कुर्याच्छिवाश्रमे ।

79 a. अच्छेद्यास्तरवः कार्यास्सर्वहिंसां निवारयेत् । 60

बन्धनास्थाः प्रमोक्तव्याः वध्याः क्रोध्यान्न संशयः ।

अकालकौमुदीं कुर्यादेवं सत्र—त मीश्वरे । 61

शिवायतनमासाद्य विमानस्थितमर्चयेत् ।

पुण्याहजयशब्दैश्च महता कमलेन च । 62

स्थाने सुसंस्कृते रम्ये शिवस्य पुरतश्शनैः ।

स्थापयेत्तदा गुरुं भक्त्या प्रणम्य विनिवेशयेत् । 63

शान्त्यर्थमेवं(न) मध्यायं गोब्राह्मणमहीभृताम् ।

राष्ट्राणां नगराणां च वाचयेद्वाच्यकोत्तमः । 64

छन्दोलक्षणतत्त्वज्ञस्सत्कविर्मधुरस्वरः ।

गान्धर्वविद्विदग्धश्च श्रेष्ठः पुस्तकवाचकः । 65

शान्तितोयेन राजानं समुत्थाय गुरुं ततः ।

शिरस्यभ्युक्षयेद्धीमांस्तत्रस्थं च जनं ततः । 66

अथवार्यजगच्छान्ति पुनरन्ते पुनरन्ते नृपस्य च ।

आचार्यभोजनं चात्र नृपः कुर्यात्सदक्षिणाम् । 67

स्वयमन्नैव भुञ्जीत सान्तःपुरपरिच्छदः ।

कार्याश्च विविधाः प्रेक्षा भुक्तवत्सु जनेष्वपि । 68

एवं कृते महाशान्तिं नृपस्य नगरस्य च ।

* राष्ट्रस्य च समन्तस्य जायते नात्र संशयः । 69

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अरातयः प्रणश्यन्ति नच मारि प्रवर्तते ।
शाम्यन्ति सर्वघोराणि प्रशमन्ति भयानि च । 70
ग्रहास्तुष्यन्ति सर्वेऽपि प्रणश्यन्ति च शत्रवः ।
कु
उपसर्गाः प्रलिप्यन्ते न दुर्भिक्षभयं भवेत् । 71
विघ्नायकाश्च नश्यन्ति सौभाग्य(म्) परमं भवेत् ।
राज्यवृद्धिश्च विपुला नित्यं च विजयं नृपः । 72
वर्धन्ते पुत्रपौत्राश्च मतिर्धर्मे प्रवर्तते ।
80 विद्यादान प्रसादेन + अने विधिना राजा + यश्शिवज्ञानपुस्तकम् । 73
द्या
ददात्तद् भिक्षुकाय विद्यादानफलं लभेत् ।
यो वान्यः पुरुषः कुर्यात् श्रद्धा वित्तसमन्वितः । 74
कुर्या विद्यादानफलं लभेत् ।
दरिद्रश्चार्थसारेण वित्तशाठ्य विवर्जितः । 75
कृत्वा विधिमिमं भक्त्या विद्यादानफलं लभेत् ।
यस्य यावद्भवेद्वित्तं स तस्यै ह्यनुसारतः । 76
स्य
अशाठ्येनाचरेत्पुण्यामद्यकुल्यफलं लभेत् ।
यावदक्षरसंख्यानां शिवज्ञानस्य पुस्तके । 77
तावत्कालसहस्राणि तथा शिवपुरे वसेत् ।
दश पूर्वान्समुद्धृत्य दश वंश्यांश्च पश्चिमाम् । 78
मातापितृन्धर्मपत्नीन् शिवं व्रजेत् ।
नान्तःपुरः परीवारः सर्वभृत्यसमन्वितः । 79

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दिव्यं शिवपुरं गच्छेत् विद्यादान प्रभावतः ।
विमानयानैः श्रीमद्भिः सर्वकामसमन्वितः । ८०
मनोजवैरसंख्यातैः क्रीडते कालमक्षयम् ।
परमाणु गुणैश्वर्यैरुपेतस्सततं प्रभुः । ८१
सर्वज्ञः परिपूर्णात्मा द्वितीय इव शङ्करः ।
यथामराणां सर्वेषां परमः परमेश्वरः । ८२
तथैव सर्वदानानां विद्यादानं परं स्मृतम् ।
अनेनैव विधानेन यश्शिवज्ञानपुस्तकम् । ८३
कुसुमागारकं स्थाप्य पूजयेत् शिवाश्रमे ।
आषाढ्यां पौर्णमास्यां तु दीपमालयावबोधनैः । ८४
वैशाख्यां चापि संपूज्य विद्यादानफलं लभेत् ।
यः श्रीमत्पुस्तकवरं नवलेख्यं निवेदयेत् । ८५
शिवज्ञानाभियुक्ताय तस्य पुण्यफलं शृणु ।
यावन्तत्पत्रसंख्यानां सञ्चये तेन शोभते । ८६
तावद्युगसहस्राणि रुद्रलोके महीयते ।
यः पत्रयन्त्रसूत्राद्यैः मणिभाजनलेखने । ८७
शरयन्त्रासनाद्यं च शय्यां तद्भक्तवेतनम् ।
80 a इत्येवमादि यच्चान्यत् तदर्थमुपयुज्यते । ८८
यद्वा तद्वा म (सूक्ष्मं विना येन न भवेत् ।
तदेकमपि विद्याङ्गं श्रद्धावित्तानुसारतः । ८९

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

निवेद्य स महाभोगैश्शिवलोके महीयते ।
तद्धस्त्रं
पुस्तकास्तरणं दत्वा तद्यन्त्रं वा प्रमाणतः । ९०
तद्वाससंवितानं वा शिवलोके महीयते ।
यावत्तद्धस्त्रातन्तूनां परिसंख्या समन्ततः । ९१
स्रा
तावद्युगसहस्राणि महाभोगमवाप्नुयात् ।
शिवज्ञानाभियुक्ताय भक्त्याच्छाद्यं ददाति यः । ९२
आसमाप्ते रविच्छिन्नं विद्यादानफलं लभेत् ।
कुपानच्छत्र कौपीन शय्या प्रावरणासनम् । ९३
पादपूजांजनाभ्यंग स्नान भोजन भेषजम् ।
यतिमात्रोपकरणं मठसंमार्जनादिकम् । ९४
यतिमात्रोपकरणं मठसंमार्जनादिकम् ।
दीपान्नितोय कुपाद्यं शिवपुस्तकवाचिनाम् । ९५
यः कुर्यादेतमखिलं शिवज्ञानरतात्मनाम् ।
पञ्चानां पञ्चवर्षाणि विद्यादानफलं लभेत् । ९६
त्रिसप्तकुलमुत्तार्य स्थापये द्वैष्णवे पुरे ।
तत्र तद्दिव्यभोगैः क्रीडत्वा चन्द्रतारकम् । ९७
कळत्रभृत्य सद्भृत्यैः युक्तश्शिवपुरे नरः ।
अक्षयं मोदते कालं विमानैस्स्वार्गगामिकैः । ९८
विद्यामण्डलकं वृत्तं यदि वा चतुरश्रकम् ।
द्विहस्तमधिकं वापि कृत्वा गोमयवारिणा । ९९

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सितरक्तादिभिः चूर्णैः समन्तादुपशोभितम् ।
सितपद्मयुतं मध्ये तद्वितानविभूषितम् ॥100
विचित्रकुसुमाकीर्णं प्रदीपाक्षतसंयुतम् ।
संपूज्यैवं शिवज्ञानं श्रद्धया वाचयेत्ततः ॥101
8। आद्यं ततः क्रमात्सर्वमेकरूपं शनैश्शनैः ।
सर्वलोकोपकारार्थमात्मनः पुण्यवृद्धये ॥102
तत्समाप्तौ शिवं विद्यामाचार्यं च प्रपूजयेत् ।
कल्पयेद्भोजनं पश्चात्सर्वेषां शिवयोगिनाम् ॥103
य एवं भक्तितः कुर्याच्छिवज्ञानस्य वाचकम् ।
मूल्येन कारयेद्वापि विद्यादानफलं लभेत् ॥104
अपि श्लोकं तदर्धं वा शिवज्ञानस्य यः पठेत् ।
वाचयेच्चिन्तयेद्वापि लिखेद्वा लेखयेत वा ॥105
शृणुयादेकचित्तश्च तदर्थं च विचारयेत् ।
जनेभ्यश्श्रावयेद्यश्च तस्य पुण्यफलं शृणु ॥106
त्रिः प्रदाय महीं पूर्णां सर्वयत्नैस्तु यत्फलम् ।
श्लोकार्धमीश्वरज्ञानो यत्फलं तदवाप्नुयात् ॥107
यश्श्रामणीसमुद्भूतं निम्नभूतं सुसंचयम् ।
दद्यात्संकटकं भक्त्या चर्मणा वापि निर्मितम् ॥108
शिवज्ञानाभियुक्ताय तदध्यायनहेतवा ।
सुर्णफलकां वापि विद्यादानफलं लभेत् ॥109

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

महाविमानैश्श्रीमद्भिः सर्वकामसमन्वितैः ।
क्रीडते परमं कालं रुद्रलोके (व्य)ह्यवस्थितः ॥ ११० ॥
ततः कालात्क्षितिं प्राप्य राजा भवति धार्मिकः ।
स्वरूपात्सद्द्विजो वापि सर्वविद्यार्थपारगः ॥ १११ ॥
यस्सुवर्णं सुसंपूर्णं सर्वरत्नोपशोभितम् ।
विद्यादानसमाश्रयम् ॥ ११२ ॥
कारयेद्वापि काव्येण (कांस्येन) ताम्रेण चतुरश्रकम् ।
कांस्यारकूटलोहैर्वा दारुवंशादिनिर्मितम् ॥ ११३ ॥
सत्कषायानुरक्तेन चर्मणाभिनवेन च ।
अन्तर्बहिश्च हृदये सद्गृहं नवम् ॥ ११४ ॥
81a न(स), द्वारकरकोपेतं दृढसूत्रादिबन्धनम् ।
कुर्यात्तालकसंयुक्तं विद्यारक्षाकरण्डकम् ॥ ११५ ॥
एवं वित्तानुसारेण कारयित्वा स्वरूपतः (नु) ।
प्रक्षाल्य गन्धतोयेन विद्याशागृहं वरम् ॥ ११६ ॥
कृत्वा च सद्गृहं दिव्यमन्तःपुष्पगृहान्वितम् ।
विद्यासिंहासनं तत्र विधिवत्पूजयेत्ततः ॥ ११७ ॥
तस्मिन्पुण्याहशब्देन विद्याकोशं गृहं न्यसेत् ।
ततः कुङ्कुमचन्दनकर्पूरकुङ्कुमाद्यैः प्रलेपयेत् ॥ ११८ ॥
अन्तर्यन्त्रयुतं धूप्य सपुष्पैरपि पूजयेत् ।
ततो वादित्रनिर्घोषैः विद्याकोशं प्रपूजयेत् ॥ ११९ ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ततस्संपूजयेद्विद्यां यथाविभवविस्तरैः ।
कृत्वा प्रदक्षिणं चान्ते नमेत्सर्वाङ्गिकं नरः ॥ 120
विद्याकोशगृहस्यापि विद्यायतनमुत्तमम् ।
भवेत्सुशोभनं रम्यमष्टहस्तप्रमाणतः ॥ 121
तेष्टकामृण्मयं वा सद्दारुकृतमेव वा ।
कवाटद्वारसंयुक्तं प्राकारारामशोभितम् ॥ 122
वितानध्वजसंयुक्तं सद्वितानविभूषितम् ।
घण्टाचामरसंयुक्तं किङ्किणीरवकान्वितम् ॥ 123
चन्दनागरुगन्धाद्यैरनुलिप्तं समन्ततः ।
नित्यं सुगन्धकर्पूरैः धूपैश्चाप्यधिवासयेत् ॥ 124
तत्र सूक्तसुघोषेण मङ्गलैर्विविधैरपि ।
आनीय स्थापयेद्भक्त्या विद्यारत्नकरण्डकम् ॥ 125
ततस्सुगन्धपुष्पाद्यैः शिववत्प्रतिपूजयेत् ।
शिवविद्यां सदाकालं त्रिसन्ध्यमुपचारतः ॥ 126
ततस्समागतान्सर्वान् भोजयेच्छिवयोगिनः ।
दीनान्धकृपणाद्यांश्च तर्पयित्वा क्षमापयेत् ॥ 127
82 एवं यः शिवविद्यायाः कुर्यादायतनं शुभम् ।
स मुक्तः पातकैस्सर्वैः विद्यादानफलं (पालि) लभेत् ॥ 128
कुलैकविंशमुत्तार्य समभृत्यपरिवारितः ।
प्राप्याष्टगुणमैश्वर्यं शिवलोके महीयते ॥ 129

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यस्तत्र ज्ञानमासाद्य विषयान्विषवत्त्यजेत् ।
स प्राप्नोति परं मुक्तिं भोगी भोगानवाप्नुयात् ।130
सृष्ट्यन्तरे पुनः प्राप्ते पृथिव्यामेकराड्भवेत् ।
सर्वैश्वर्यगुणोपेतः सर्वज्ञानस्य पारगः ।131
यः कारयेन्महारम्यं सुवेदिं सुस्थितं पुरम् ।
पञ्चभौमं त्रिभौमं वा शिवज्ञानरतात्मनाम् ।132
गुह्यापवर्गकैर्युक्तः मैत्रस्थानसमन्वितम् ।
वास्तुविद्याविभक्तं च प्राकारपरिशोभितम् ।133
तस्य वेदी द्विहस्तोच्चा पर्यन्तस्तंभसंयुता ।
पक्वेष्टिका परिच्छन्नं तत्सुरम्यं समन्ततः ।134
सुचित्रं पुरतः कुर्याद्दिश्याग्नेय्यां महा(न)सनम् ।
धूमनिर्गमनोपेतं पूर्वतस्तत्र मण्डपम् ।135
गन्धपुष्पगृहं कार्यं मैशान्यां पट्टसंयुतम् ।
भाण्डा(गा)कारं च कौबेर्यां गोष्ठागारं च वायवे ।136
कुटकाश्रयं च वारुण्यां वातायन समन्वितम् ।
समित्कुशेन्धनस्थानमायुधानां च नैरृते ।137
अभ्यागतालयं सर्वं रम्यं शय्यासनसमन्वितम् ।
यो यागिन्दीपस(न)च्छात्रैर्युक्तं दक्षिणतो भवेत् ।138
गृहान्तराणि सर्वाणि सजलैः कदलीगृहैः ।
पञ्चवर्णैश्च कुसुमैः शोभितानि प्रकल्पयेत् ।139

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्राकारं तद्बहिः कुर्यात्पञ्चहस्त प्रमाणतः ।
प्राकाराच्च बहिः कुर्यात्सर्वदिक्षु समन्ततः । 140
४२a दिव्यं शिवाश्रमारामं नानापुष्पोपशोभितम् ।
सर्वर्तुकगुणोपेतं बहुवृक्षजलान्वितम् । 141
(प्रियङ्गुशारिकाशोकपत्रजीवकरिष्टकैः ।
पुन्नागनागवकुलैः पाटलीबिल्वचंपकैः । 142
श्वेतमन्दारनिजयैः जातीत्वगरुकुञ्जकैः ।
सुवर्णैश्श्वेतयूथीभिः नानालताकुरंबकैः । 143
करवीरैः कर्णिकारैः नानावर्णैरनेकशः ।
स्थानविन्यास रचितैः संमार्गोद्यानसंयुतैः । 144
वृक्षैर्बहुविधैर्युक्तं दिग्विदिक्षुजलान्वितम् ।
सितरक्ताब्जकुसुमैः नीलरक्तोत्पलैर्युतम् । 145
लतावितानगृहकैः विचित्रैश्च द्रवस्थितैः )
कदलीस्तंभषण्डैश्च दाडिमाद्यैर्विराजितम् । 146
इति कृत्वा बहिस्तस्य प्राकारं कल्पयेन्महत् ।
कवाटगोपुरोपेत परिखा तरुसंयुतम् । 147
तृतीयाच्च पुराद्दूर्ध्वं विद्याव्याख्यानमण्डपम् ।
गवाक्षनिर्गमोपेतं विचित्रं परिकल्पयेत् । 148
पुराच्च पश्चिमं कार्यं शिवस्य * वलभीगृहम् ।
षडन्तमष्टदीर्घं च द्वारपट्टविनिर्मितम् । 149

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तत्र मृद्दारुशैलं वा स्थापयेद्विधिनाच्छिवम् ।
सर्वविद्याविधातारं सर्वज्ञं लकुलीश्वरम् ॥ 150
प्रातः शिष्यैश्च गुणिभिः व्याख्यानोद्यतपाणिकम् ।
83 पद्मासनस्थं सुश्वेतं प्रसन्नवदनं गुरुम् ॥ 151
एवं शिवाश्रमं कृत्वा भक्त्या वित्तानुसारतः ।
तत्र तिष्ठां ततः कुर्यात्पूजासंस्कारलक्षणम् ॥ 152
विद्यादानोक्तविभवैश्शोभां कृत्वा मठाग्रतः ।
पञ्चामृतपञ्चगव्येन स्नाप्येशान्यां शिवं क्रमात् ॥ 153
स्नापयेद्गन्धतोयाद्यैः स्नाप्य वस्त्रेण छादयेत् ।
तूर्यघोषैस्समानीय स्नापयेत्पुष्पमण्डपे ॥ 154
ततश्चन्दनपुष्पाद्यैः पूजयित्वाधिवासयेत् ।
जप्त्वा पञ्चविधं स्तोत्रं शिवं विज्ञापयेत्ततः ॥ 155
अद्याधिवासितं देवं श्वप्रतिष्ठा विधा पुनः ।
भक्तानामनुकं पार्थ शान्त्यर्थमुत्कल्पयेत् ॥ 156
प्रातस्स्नाप्य पुनर्देवं पूजयित्वा प्रवेशयेत् ।
पवित्रे स्थापयेद्देव्यां पादाधारत्रय पञ्चभिः ॥ 157
ततस्सुगन्धगन्धाद्यैः नित्यं भक्त्या शिवालयम् ।
शिवं च पूजयेद्भक्त्या यजमानस्स्वयं गुरुम् ॥ 158
दक्षिणाभिर्विचित्राभिः भोजनाद्यैश्च पूजयेत् ।
निवेदयेत्ततस्स्थानं सर्वेषां शिवयोगिनाम् ॥ 159

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सर्वोपकरणोपेतं प्रणिपत्य पुनः पुनः ।

एवं यः कारयेद्दिव्यं श्रीमच्छिवपुरं महत् । 160

सर्वपापविनिर्मुक्तश्शिवलोके महीयते ।

स्वगोत्रं शतकोपेतस्स्वभृत्यपरिचारतः । 161

पुत्रमित्रादिसंयुक्तस्सान्तःपुरपरिच्छदः ।

सुविचित्रैर्महायानैरसंख्यैस्सर्वगामिकैः । 162

शिववत्क्रीडते शंभोरणिमादिगुणैर्युतः ।

ततः कालेन महता विद्यादानप्रभावतः । 163

ज्ञानयोगं समासाद्य तत्रैव स विमुच्यते ।

स्थापति स्थापको ~~स्थापको~~ वृक्षात् । 164

84a यान्ति रुद्रपुरं सर्वे तद [illegible] ये नराः ।

येऽन्यापि भृत्या भृतका शिवायतनकर्मिणः । 165

तेऽपि यान्ति मृतास्स्वर्गं शिवधर्मानुसारतः ।

शिवदासत्वमापन्नाः नरनारीनपुंसकाः । 166

तेऽपि तन्नामसंयोगात् यान्ति रुद्रपुरं महत् ।

दत्ताः क्रीताः प्रविष्टश्च दण्डोत्पन्ना बलोद्धृताः । 167

विज्ञेया रुद्रगणिका शिवायतनयोषितः ।

या रुद्रगणिकोत्पन्नात् [illegible] दिसंततिः । 168

सापि याति मृता स्वर्गं मातुरेवानुभावतः ।

शिवायतनपर्यन्ते म्रियन्ते येपि जन्तवः । 169

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ते पि यान्ति शिवं लोकं किं पुनस्तमुपाश्रिताः ।
अत्यल्पमपि यः कुर्याद्रतिरम्यं शिवाश्रमम् । 170
वितस्तिहस्तमात्रं वा सोपि यान्ति शिवं पुरम् ।
कृत्वा स कुट्टिमां भूमिमीश्वरायतनाग्रतः । 171
तत्र मण्डलकं कुर्यात् वृत्तं वा चतुरश्रकम् ।
सूत्रेण सम्मितं कृत्वा नानावर्णकशोभितम् । 172
विचित्रं कुसुमोत्कीर्णं मध्ये पङ्कजशोभितम् ।
प्रदीपाक्षतसंयुक्तमुदकं गृह्य पाणिना । 173
मूर्ध्ना प्रणम्य मेदिन्यां शिवाय विनिवेदयेत् ।
यः कुर्यात्सकृदप्येवं शिवमण्डलकं नरः । 174
स सर्वकामैस्संयुक्तश्शिवलोके महीयते ।
कलात्पुनरिहायातश्श्रीमानर्थपतिर्भवेत् । 175
ज्ञानवान् रोगहीनश्च सुप्रियस्सद्विजस्सुखी ।
विद्यामण्डलकं कृत्वा विद्याव्याख्यानमण्टपे । 176
84 तत्राभ्यर्च्य शिवज्ञानं व्याख्यानं शृणुयात्ततः ।
शिवमण्डलकाद्येन विधिनातीव शोभनम् । 177
गुरुमण्डलकं कृत्वा शिवलोके महीयते ।
शिवविद्यागुरूणां च कृत्वा मण्डलकत्रयम् । 178
यश्शृणोति शिवज्ञानं तस्य विद्या प्रसीदति ।
अनेन विधिना ज्ञानं यः प्रवर्तिश्शृणोति च वा । 179

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स संप्राप्य शिवं सौख्यं देहान्ते मुक्तिमाप्नुयात् ।
आरोग्यशालां यः कुर्यान्महावैद्यपुरस्कृताम् । 180
सर्वोपकरणोपेतां तस्य पुण्यफलं शृणु ।
धर्मार्थकाममोक्षाणामारोग्यं साधनं यतः । 181
तस्मादारोग्यदानेन दत्तं स्यात्तच्चतुष्टयम् ।
अप्येकमार्तं विश्वासं स्वस्थं कृत्वा प्रयत्नतः । 182
प्राप्नोति सुमहत्पुण्यमनन्तं क्षयवर्जितम् ।
ज्ञानयोगरतं शान्तं रोगार्तं शिवयोगिनम् । 183
यः करोति नरः स्वस्थं सर्वदानफलं लभेत् ।
ब्रह्मविष्णुसुरास्सर्वे स्वदारा नृजना नृपाः । 184
योगस्थैते महाविप्राः व्याधयस्ते न योगिनाम् ।
ब्रह्मक्षत्रविशाशूद्राः राजा तान्पालयत्यतः । 185
यत्पुण्यं महदाप्नोति न तत्सर्वैर्महामखैः ।
आम्नायस्य यथा नास्यान्तस्सुरैरप्युपलभ्यते । 186
तद्वदारोग्यदानस्य नान्तस्संपद्यते तथा ।
पुण्येनानेन महता गत्वा शिवपुरं नरः । 187
84a मोदते विविधैर्भोगैः विमानैस्सार्वगामिकैः ।
एवं शिवगणोपेतः सद्भृत्यपरिवारितः । 188
अन्ते शिवपुरे तावद्यावदाभूतसम्प्लवम् ।
ततस्तद्धर्मशेषेण संप्राप्ते प्रभवेत्तथा । 189

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ज्ञानमुत्पाद्यते तस्य रुद्रेभ्यः प्रतिपादितम् ।
ज्ञानादिमुक्तस्संसारे शिवज्ञानं समाश्रितः । 190
स देहं तृणवत्त्यक्त्वा सर्वदुःखान्तमाप्नुयात् ।
समस्तदुःखनिर्मुक्तं ~~शिवलोके~~ शुद्धदेहस्त्वात्मन्यवस्थितः । 191
सर्वज्ञः परिपूर्णश्च मुक्त इत्युच्यते बुधैः ।
तस्माद्योगापवर्गार्थी रोगार्थं न समुपाचरेत् । 192
विशेषेण च योगीन्द्रमात्मना च धनेन च ।
रोगिणां त्यजेच्छ्रान्स्तन्मूलानां च सर्वतः । 193
संपश्येद्गुरुवन्नित्यमेवं धर्मः प्रवर्तते ।
योऽनुगृहीतमात्मानं मन्यमानो दिने दिने । 194
कुपसर्पेत रोगार्तिं तीर्णस्तेन भवार्णवः ।
तस्मात्सर्वप्रयत्नेन विद्यादानं समाचरेत् । 195
एवमेतद्बहुविधं विद्यादानं प्रकीर्तितम् ।
सर्वेषामेव वर्णानां विधिनानेन तद्भवेत् । 196

॥ इति श्रीशिवधर्मोत्तरे शास्त्रे
विद्यादानफलं नाम
द्वितीयोऽध्यायः ॥

॥ श्रीसाम्बसदाशिवार्पणमस्तु ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

( ॥श्रीः॥ )

( ॥अथ तृतीयोऽध्यायः॥ )

85 ॥ शुभमस्तु ॥

अथ ये सततं भक्त्या भवन्ति शिवयोगिनः ।
ते विन्दन्ति महाभोगानन्ते योगं च शाङ्करम् ॥ 1
भोगयोगार्थिभिस्तस्मात्संपूज्याश्शिवयोगिनः ।
प्रतिश्रयान्नपानेन शय्या वस्त्रासनादिभिः ॥ 2
यन्नाम गात्र शिशूषा प्रकुर्याच्छिवयोगिनाम् ।
दरिद्रस्सततं भक्तस्तस्य पुण्यफलं शृणु ॥ 3
सूर्यतेजः प्रतीकाशैः विमानैस्सर्वगामिकैः ।
मृतश्शिवपुरं गच्छेत् त्रिसप्तकुलसंयुतः ॥ 4
तत्र दिव्यैर्महाभोगैः स्त्रीसहस्रैर्मनोरमैः ।
कल्पकोटिशतं दिव्यं सेव्यमानस्सतिष्ठति ॥ 5
तदन्ते विष्णुभवने तावत्कालं वसेत्पुनः ।
वैष्णवैर्विविधैर्भोगैः स्त्रीसहस्रैस्समन्वितः ॥ 6
विष्णुलोकाच्च्युतो ब्राह्म्यां संप्राप्य (स) वसेत्पुनः ।
भोगैस्तु विविधैस्सुखैः तावत्कालमनुत्तमैः ॥ 7
प्राजापत्येन्द्रगान्धर्व यक्षलोकेष्वनुक्रमात् ।
भोगान्नानाविधान्भुक्त्वा पृथिव्यां जायते क्रमात् ॥ 8
कुले महति विप्राणां प्रज्ञाशीलगुणान्वितः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ततस्सं पूर्णभावेन योगीन्द्रं पर्युपासते । 9
तत्संपर्काच्छिव ज्ञानं प्राप्य योगं निषेवते ।
यो द्विरक्तस्संसारात्प्राप्नोति परमं पदम् । 10
इति यः कुरुते भक्तिं सततं शिवयोगिनाम् ।
स द्वितीये तृतीये वा देहे योगमवाप्नुयात् । 11
अथ पूजाग्निकार्याद्यै र्भेदैर्बहुविधैस्ततः ।
कर्मयज्ञस्समाख्यातस्तपश्चान्द्रायणादिकम् । 12
स्वाध्यायश्च जपः प्रोक्तश्शिवमन्त्रस्य तत्त्रिधा ।
85a ध्यानयज्ञस्समाख्यातश्शिवचिन्ता मुहुर्मुहुः । 13
अध्यापनं हि तद्ध्यानं व्याख्याश्रवणचिन्तनम् ।
इति पञ्चप्रकारोयं ज्ञानयज्ञः प्रकीर्तितः । 14
उत्तरोत्तरतश्श्रेष्ठं सर्वेषां परिकीर्तितम् ।
पञ्चानामपि यज्ञानां ज्ञानयज्ञो विमुक्तिदः । 15
नास्ति ज्ञानं विना ध्यानं नास्ति ज्ञानमयोगिनाम् ।
ज्ञानं ध्यानं च यस्यास्ति तीर्णस्तेन भवार्णवः । 16
ज्ञानं प्रसन्नमेकाग्रमशेषोपाधिवर्जितम् ।
योगाभ्यासेन सततं विरक्तस्योपजायते । 17
श्रुतिचिन्तामयज्ञानं विकल्पबहुलं यतः ।
तस्मात्तदप्रसन्नत्वात् चञ्चलं न विमुक्तिदम् । 18
श्रुत्वापि वर्धयेज्ज्ञानं प्राज्ञस्तच्चिन्तयेत्पुनः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विमलं तत्प्रसन्नं च चिन्त्यमानं भवेच्छनैः ॥19
आरंभकाले श्रवणं क्रियाकाले विचिन्तनम् ।
निश्चयाद्भावनं तस्य निष्ठाकाले प्रसन्नतः ॥20
ज्ञानं विकल्पबहुशं रागाद्यैः कलुषीकृतम् ।
अज्ञानमलशुद्ध्यर्थं कलुषोदकवद्भवेत् ॥21
निस्सारमतिकष्टं च भवं भावयतश्शनैः ।
अम्भोवच्च शरत्काले तत्प्रसन्नं क्रमाद्भवेत् ॥22
86 यदा प्रसन्नमेकाग्रं स्थितिमो हृदि संस्थितम् ।
तदा ज्ञानमिति प्रोक्तमज्ञानमितरत्पुनः ॥23
इति प्रसन्नं यज्ज्ञानं भावनामयमुत्तमम् ।
रागाद्यैरपरामृष्टं तद्विज्ञेयं विमुक्तिदम् ॥24
अज्ञानपाशबन्धत्वादमुक्तः पुरुषस्स्मृतः ।
तस्माज्ज्ञानेन मुक्तिस्स्यादज्ञानस्य पारिक्षयात् ॥25
संसारबन्धमज्ञानं संसार्यज्ञः पुमान्स्मृतः ।
ज्ञानात्तस्य निवृत्तिस्स्यात् प्रकाशात्तमसो यथा ॥26
अज्ञानेन तिरागाद्या धर्माधर्मौ च तादृशः ।
धर्माधर्मवशात्पुंसां शरीरमुपजायते ॥27
शरीरे सति संक्लेशैस्सर्वैः सा युज्यते यतः ।
ततः क्लेशप्रहाणार्थं पुनर्देहं न कामयेत् ॥28
जगतस्तत्त्वसंबोधादज्ञानं विनिवर्तते ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अज्ञानविनिवृत्तौ च रागादीनामसंभवः । 29
रागाद्युपशमात्पुंसां पुण्यपाप(प)रिक्षयः ।
तत्क्षयाच्च शरीरेण न पुनस्संप्रयुज्यते । 30
अशरीरश्च संक्लेशैस्सर्वदैव न बाध्यते ।
क्लेशमुक्तः प्रसन्नात्मा मुक्त इत्यभिधीयते । 31
तस्मादज्ञानमूलानि सर्वदुःखानि देहिनाम् ।
ज्ञाने सहितदज्ञानं निवर्तेत सकर्मभिः । 32
नास्ति ज्ञानादृते पुंसां पुण्यपापपरिक्षयः ।
मोक्षार्थी पुरुषस्तस्मात् ज्ञानमेव सदाभ्यसेत् । 33
मार्ज्यमाणस्सदा यद्वद्दर्पणो निर्मलो भवेत् ।
ज्ञानाभ्यासात्तथा पुंसां बुद्धिर्भवति निर्मलः । 34
ज्ञानामृतरसो येन सकृदास्वादितो भवेत् ।
सर्वकार्याणि                परिधावति । 35
86a ज्ञानामृतरसप्रायस्तेन *नास्वादितो भवेत् ।
यो वान्यत्रैव रमते तद्विहाय सुदुर्मतिः । 36
ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः ।
नैवास्ति किञ्चित्कर्तव्यमस्ति चेन्न न तत्त्ववित् । 37
लोकद्वयेऽपि कर्तव्यं किञ्चिदन्यन्न विद्यते ।
इहैव स विमुक्तस्स्यात् संपूर्णस्समदर्शनः । 38
नास्ति ज्ञानात्परं किञ्चित्पवित्रं पापनाशनम्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तत्सदाभ्यासयोगेन शनैरात्मनि विन्दति । 39
व्रतानि दानानि तपांसि यज्ञास्सन्न्यासतीर्थाश्रमधर्मयोगाः ।
स्वर्गीयमेतत्सुखमध्रुवं च ज्ञानं ध्रुवं शान्तिकरं महार्थम् । 40
यज्ञैर्देवत्वमाप्नोति तपोभिर्ब्रह्मणः पदम् ।
दानेन विविधान्भोगान् ज्ञानान्मोक्षमवाप्नुयात् । 41
धर्मरज्ज्वा व्रजेदूर्ध्वं पापरज्ज्वा व्रजेत्(द)यधः ।
द्वयं ज्ञानासिना छित्वा विदेहश्शान्तिमृच्छति । 42
ज्ञानिनां यद्यधर्मेण भवेद्बन्धः शुभेन वा ।
ध्रुवमुक्तिः कथं तेषां निबद्धानां शुभाशुभैः । 43
नहि देहभृता शक्यं कर्म त्यक्तुं शुभाशुभम् ।
गच्छतास्तिष्ठतो वापि तदवश्यं भवेद्यतः । 44
अधर्मविनिवृत्त्यैव भवेत्पुण्यमकुर्वतः ।
धर्मत्यागादधर्मश्च न तेषां निश्चलैः कथम् । 45
तस्माज्ज्ञानं विना तूर्णमशेषं कर्मबन्धनम् ।
कामाकामकृतं छित्वा शुद्धस्स्वात्मनि तिष्ठति । 46
यथा वह्निर्महादीप्ता शुष्कमार्द्रं च निर्दहेत् ।
87 तथा शुभाशुभं कर्म ज्ञानाग्निर्दहति क्षणात् । 47
पद्मपत्रं यथा तोयैस्तत्स्थैरपि न लिप्यते ।
शब्दादिविषयांभोभिस्तद्वज्ज्ञानं न लिप्यते । 48
यद्वा मन्त्रबलोपेतः क्रीडन्सर्पैर्न दश्यते ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

क्रीडन्न लिप्यते ज्ञानी तद्वदिन्द्रियपन्नगैः । 49
मन्त्रौषधिबलैर्यद्वद्भक्षितं जीर्यते विषम् ।
तद्वत्सर्वाणि पापानि जीर्यन्ते ज्ञानिनः क्षणात् । 50
नास्ति ज्ञानसमं तीर्थं नास्ति ज्ञानसमं तपः ।
नास्ति ज्ञानसमो यज्ञः तस्माज्ज्ञानं सदाभ्यसेत् । 51
यथा ज्ञानं तथा ध्यानं ज्ञानध्यानं समं स्मृतम् ।
ज्ञानध्यानरतस्सोऽयं मुनिर्मोक्षं च विन्दति । 52
ज्ञानादैश्वर्यमतुलमैश्वर्यात्स .. मुत्तमम् ।
ज्ञानेन तत्परित्यज्य तनुं मुक्तिमवाप्नुयात् । 53
सर्वेषामेव यज्ञानां ज्ञानध्यानं परं स्मृतम् ।
नित्यश्शुद्धः प्रसन्नश्च सर्वदोषविवर्जितः । 54
शुक्लकृष्णः परस्सूक्ष्मस्सुविशुद्धस्समाधिजः ।
ज्ञानयज्ञः परो यज्ञः स्थूलो शुद्धश्च कर्मणाम् । 55
विशुद्धैस्साधनैस्सूक्ष्मैर्ध्यानयज्ञः प्रसाध्यते ।
यस्मात्तस्माद्विशुद्धोऽयमपवर्गफलप्रदः । 56
अन्तर्यागोपचारेण यः पूजयति शङ्करम् ।
ध्यानमज्ञानसततं स याति परमां गतिम् । 57
पुष्पैर्गन्धैस्सनियमैरात्मैकादशभिः परैः ।
दशदिक्षु तथा मध्ये यजेत परमेश्वरम् । 58
[illegible] विविधो दशभिर्गुणैः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

87 a जपयज्ञस्तपो यज्ञः ज्ञेयश्शतगुणाधिकः । 59
ज्ञानध्यानात्मकस्सूक्ष्म शिवयोग महामखः) प्यः ।
वरिष्ठस्सर्वयज्ञानामसंख्यातैर्महागुणैः । 60
पूजया विपुलं राज्यमग्निकार्येण संपदः ।
जपेन पापसंशुद्धिर्ज्ञानध्यानेन मुच्यते । 61
[मार्ज्यमाणस्सदा यद्वद्दर्पणो निर्मलो भवेत् ।.
ज्ञानाभ्यासात्तथा पुंसां बुद्धिर्भवति निर्मलः । 62
प्रक्षीणाशेषदोषस्य ज्ञानध्याने भवेन्मतिः ।
पापोपहतबुद्धीनां तद्वार्तापि सुदुर्लभा । 63
धनुषां कोटिभिर्योगः समन्तात्परिरक्ष्यते ।
सहस्रैष्षष्टिभिर्गङ्गाधर्मज्ञैर्न तदर्थितः । 64
तीर्थानि तोयपूर्णानि देवान्पाषाणमृण्मयान् ।
योगिनो न प्रपद्यन्ते स्वात्मप्रत्ययकारिणः । 65
आत्मस्थं यश्शिवं त्यक्त्वा बहिष्ठं यजते शिवम् ।
हस्तस्थं पिण्डमुत्सृज्य लिहेत्कोर्परमात्मनः । 66
सर्वत्रावस्थितं शान्तं न प्रपश्यन्ति शंकरम् ।
ज्ञानचक्षुर्विहीनत्वादन्धस्सूर्यं यथोदितम् । 67
यः पश्यत्सर्वगं शान्तं तस्यात्मस्थश्शिवस्सदा ।
आत्मस्थं ये न पश्यन्ति तीर्थे मार्गन्ति ते शिवम् । 68
आत्मस्थं तीर्थमुत्सृज्य बहिस्तीर्थानि यो व्रजेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

करस्थं स महारत्नं त्यक्त्वा काचं विमार्गति ।

ज्ञानध्यानरतैश्शान्तैर्यच्चतीर्थं निषेवितम् ।69

88 पापशुद्ध्यर्थमज्ञानां तत्तीर्थं न तु योगिनाम् ।

दिवसं दिवसार्धं वा यत्र तिष्ठन्ति योगिनः ।70

तन्माङ्गल्यं पवित्रं च तत्तीर्थं तत्तपोवनम् ।

जिज्ञासुरपि योगस्य यां गतिं लभते मुनिः ।71

न तां गतिमवाप्नोति सर्वैरपि महामखैः ।

सत्यामागमवार्तायां प्रत्यक्षोऽपि तत्फले ।72

अध्येयमीश्वरज्ञानमल्पक्लेशं महाफलम् ।

यदि क्लेशेन महता भवेत्पुण्यं महत्फलम् ।73

स्यान्महारत्नवाहिभ्यः फलं पाषाणवाहिनाम् ।

पाषाणशतसाहस्रं यस्स्कन्धे वोढुमिच्छति ।74

श्रममेति विनाशं वा सो बुद्धिस्तद्विहीनव ।

अङ्गुष्ठोदरमात्रं तु विशिष्टः पद्मरागमणिः ।75

प्राप्तस्तु सुखसंवाह्यो महतोऽर्थस्य नायकः ।

एवं हि कर्माणि तपांसि यज्ञान् क्लेशात्मकानल्पफल-

प्रदांश्च ।

सन्त्यज्य सर्वान् शिवयोगमेकं

ध्यायेत्परं मोक्षमुक्तिकरं प्रशान्तम् ।।76

ज्ञानयोगप्रधानत्वादन्तरङ्गो विमुक्तिदः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

बहिरङ्गो प्रधानत्वा यज्ञाद्यं भोग साधनम् । 77
~~यद्वेद्देन्न~~ यद्देहान्तश्चराज्ञां प्रिया स्स्युः न बहिश्चराः ।
तथान्तध्यान निरताः प्रिया शम्भोर्न ~~स~~ कर्मिणः । 78
बहिः कर्म करा यद्वा नातीव फलभोगिनः ।
दृष्टान्तरेन्द्रभवने तद्वत्त्रापि कर्मिणः । 79
88a आन्तरुपचारेण नरःस्त्री पु प्रसीदति ।
तथान्तध्यानविधिना प्रसीदति महेश्वरः । 80
यथान्तर्दन्तिनो दन्ताः सुखिनो न बहिस्स्थिताः ।
तथान्तध्याननिरतास्स फलानि बहिस्स्थिताः । 81
अत्यल्पोपि यथा दीपस्समहं नाशयं तमः ।
योगाभ्यासस्तथाल्पोपि महापापं विनाशयेत् । 82
अर्धयामं मुहूर्तं वा ध्यायतः परमेश्वरम् ।
यद्भवेत्सुमहत्पुण्यमन्तस्थस्तस्य न विद्यते । 83
यद्यन्तेरेपि पश्येत ज्ञानयोगार्थमुद्यतः ।
श्रद्धया गुरुभक्त्याच रुद्रलोकं स गच्छति । 84
अनुभूय सुखं तत्र कुले जायेत योगिनाम् ।
ज्ञानयोगं ततः प्राप्य संसारमतिवर्तते । 85
मृदुर्मध्योत्तमा चैव श्रद्धा पुंसां त्रिधा स्मृताः ।
जन्म त्रिधा ध्रुवं ज्ञानमन्त श्रद्धोपि विन्दति । 86
तस्मात्स्वर्गं समुत्सृज्य कर्मयोगमशाश्वतम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ध्याये नित्यं विशुद्धं च ज्ञानयोगमनुत्तमम् ।८७

इत्येवं ज्ञानयोगस्य महाभाग्यमुदाहृतम् ।

तदाभ्यासरतानां च मुनीनां शान्तचेतसाम् ।८८½

॥ इति श्रीशिवधर्मोत्तरे पञ्च-

महायज्ञगुणाध्यायोनाम

तृतीयोध्यायः ॥

— x —

॥ श्रीसाम्बसदाशिवार्पणमस्तु ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

(॥ श्रीः ॥)

(॥ अथ-चतुर्थोऽध्यायः ॥)

89 ॥ शुभमस्तु । शिवाय गुरवे नमः ॥

अथैकभविकं दानं कर्मयोगरतात्मनाम् + ।
शतजन्मभवं दानं तपोनिष्ठे प्रतिष्ठितम् ॥1
जपयज्ञाभियुक्तेभ्यः सहस्रभविकं स्मृतम् ।
आभूतसंप्लवस्थायि प्रदानं शिवयोगिनाम् ॥2
अत्यल्पमपि यो दत्तं शिवज्ञानार्थयोगिनाम् ।
तन्महाप्रलयं यावदनुभोगाय कल्पते ॥3
सद्दानमल्पं बहु वा किञ्चिदस्ति विजानतः ।
देशकालवित श्रद्ध पात्रयुक्तं तदक्षयम् ॥4
देशे काले च पात्रे च विधिना श्रद्धया च यत् ।
दत्तं कृतं हुतं चेद्तदनन्तफलं भवेत् ॥5
तिलार्धमात्रकेणापि यत्प्रमाणेन दीयते ।
तत्पात्रे श्रद्धया किञ्चित्तद्भवेत्सार्वकालि .. ॥6
यद्गात्रं ज्ञानसलिलैश्शौचभस्मप्रमार्जितम् ।
तत्पात्रं सर्वपात्राणामुत्तमं सर्वकामिकम् ॥7
ज्ञानोडुपेन यः पुंसां त्राति संसारसागरात् ।
अज्ञानपतनात्त्राणात् पात्रं तत्परमं स्मृतम् ॥8
ज्ञानप्लववलोपेतः पात्रं पापमहार्णवात्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नाव्रा वितारयेद्दूरं किं शिलां तारयेच्छिला ॥ 9

द्विजानां वेदविदुषां कोटिं संबोध्य यत्फलम् ।

भिक्षामात्रप्रदानेन तत्फलं शिवयोगिने ॥ 10

शिवयोगी गृहे यस्माद्भिक्षां गृह्णाति सत्कृतम् ।

कुलमुत्तारयेत्तस्य नरकार्णवसंस्थितम् ॥ 11

यज्ञाग्निहोत्रतीर्थेषु यत्फलं परिकीर्तितम् ।

योगिनामन्नदानेन तत्समग्रफलं लभेत् ॥ 12

89a ज्ञानिने शान्तचित्ताय शिवध्यानरताय च ।

श्रद्धयान्नं सकृद्दत्वा सर्वपापैः प्रमुच्यते ॥ 13

एवं मुनिवरं शान्तमीश्वरार्पितमानसम् ।

भोजयित्वा सकृद्भक्त्या सर्वकामानवाप्नुयात् ॥ 14

ध्यायमानश्शिवं योगी भुङ्क्तेऽन्नं सततं यतः ।

ततस्साक्षाच्छिवेनैव तद्भुक्तमशनं भवेत् ॥ 15

तमनुद्दिश्य य श्राद्धे भोजयेच्छिवयोगिनम् ।

स गच्छेदैश्वरं स्थानमेकविंशत्कुलान्वितः ॥ 16

शिवाय सर्वपाकानि प्रनिवेद्याग्नौ च होमयेत् ।

कल्पयेच्च गुरोर्भागमित्ययं सततं विधिः ॥ 17

शिवाग्निगुरुविप्रेभ्यः सर्वपाकाग्रमन्वहम् ।

यो निवेद्य स्वयं भुङ्क्ते स रुद्रो नात्र संशयः ॥ 18

अनिवेद्य च यो भुङ्क्ते स भुङ्क्ते किल्बिषं नरः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

~~आनिवेद्यञ्च यो भुङ्क्ते किल्बिषं नरः~~ |

कृषिवार्धुष्यवाणिज्यक्रोधासत्योर्जनादिभिः । ।19

पुंसां पापानि वर्धन्ते सूनादोषैश्च पञ्चभिः ।

संमार्जनाञ्जनं तोयमग्निकुण्डकपोषणम् ।20

सूनाः पञ्च गृहस्थानां नित्यं पापाभिवृद्धये ।

शिवाग्निगुरुपूजाभिः नित्यं पापैः नलिप्यते ।21

अन्यैश्च पातकैर्घोरैस्तस्मात्संपूजयेत्त्रयम् ।

शिवाग्निगुरुनैवेद्यं यावत्सिद्धानि संख्यया ।22

तावद्वर्षसहस्राणि तदा शिवपुरे वसेत् ।

घृताप्लुतयुतैस्सिद्धैः पुण्यं दशगुणोत्तरम् ।23

(उ) कृपदंशयुतैर्ज्ञेयं पुण्यं शतगुणाधिकम् ।

90 षष्टिकोदननैवेद्यैः सहस्रगुणितं फलम् ।24

सुगन्धिशालिनैवेद्यैर्विज्ञेयमयुताधिकम् ।

मातुलुंगकदल्याम्रपनसाद्यैश्शुभैर्नवैः ।25

कलमाशालिनैवेद्यैर्भवेल्लक्षाधिकं फलम् ।

एवं शालिविशेषेण फलं ~~स्म~~ स्यादुत्तरोत्तरम् ।26

सव्यञ्जनयुतं भूयस्तत्पुण्यमभिवर्धते ।

व्यञ्जनानि विचित्राणि स्वादूनि सुरभीणि च ।27

कोटिकोटिफलान्याहुः स्निग्धानि मधुराणि च ।

क्षीरधु~~क्षुद्~~न नैवेद्यैः दश भुङ्क्ते गुणाधिकम् ।28

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दधिशर्करया युक्तं तत्पुण्यं स्याद्दशाधिकम् ।
रसालां सुघनां (शिलां) शीतां कर्पूरसुरभीकृताम् । 29
निवेद्य पुण्यमाप्नोति कोटिशतगुणाधिकम् ।
पानकानां सुगन्धानां फलं तुल्यं रसालयोः । 30
तथा फलविशेषैश्च स्वादुभिस्स दशभिस्सदृशं फलम् ।
गुडखण्डकृतैश्चापि घृतेन परिपाचितैः । 31
कोटिसाहस्रगुणितं ज्ञेयं पुण्यं सुगन्धिभिः ।
नानाप्रकारैर्विविधैः घृतेन परिपाचितैः । 32
कोटिकोटिगुणं पुण्यं शिवाग्निगुरुकल्पितैः ।
घृताशनेन विज्ञेयं माष तुल्यफलं बुधैः । 33
शर्करखण्डयुक्तेन माषाद्व्यधिकं फलम् ।
यथा यथा हि स्वादूनि स्निग्धानि सुरभीणि च । 34
भिक्षान्नपानशोष्याणि तत्फलानि यथा तथा ।
यद्वा तद्वा शिवायान्नं लिङ्गाने गुरुमूर्तये । 35
भक्त्या नैवेद्य भुञ्जानः फलमक्षयमाप्नुयात् ।
(म्)
10a एवं यः कुरुते श्राद्धं भक्तितः शिवयोगिनाः । 36
स पित्रान् सर्वपापेभ्यः समुद्धृत्य शिवं नयेत् ।
गङ्गास्नानसमं पुण्यं दर्शनं शिवयोगिनाम् । 37
सर्वतीर्थाभिषेकाच्च तत्संभाषणमुत्तमम् ।
मुच्यते सर्वपापेभ्यः प्रणम्य शिवयोगिनम् । 38

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिशूप युक्त्यां तं भक्त्या शिवलोके महीयते ।
युगपत्पूजितास्ते ब्रह्मविष्णुमहेश्वराः । 39
मातरस्सर्वदेवाश्च योऽर्चयेच्छिवयोगिनम् ।
तुष्यन्ति पितरस्तस्य सुवृष्टैरिव ~~स्वकर्षकः~~ । 40
यः श्राद्धे भोजयेद्भक्त्या विशेषाच्छिवयोगिनः ।
आपीनस्सकुले कश्चित् जनयेत्पुत्रमीदृशम् । 41
यस्संपूज्य शिवं श्राद्धे भोजयेच्छिवयोगिनम् ।
नृत्यन्ति पितरस्तुष्टा गायन्ति च पितामहाः । 42
अद्यनः पुत्रपौत्रो वा योगीन्द्रं भोजयिष्यति ।
शिवयोगिनमायान्तं दृष्ट्वैव गृहसंस्थिताः । 43
क्रीडन्त्योषधयस्सर्वाः यास्यामस्स्वर्गमक्षयम् ।
अनुग्रहाय लोकानां श्रद्धायाश्च परीक्षये । 44
चरन्त्यतिथिरूपेण देवा योगाश्च भूतले ।
तस्मादतिथिमायान्तमधिगच्छेत्कृताञ्जलिः । 45
स्वागतासनपाद्यार्घ्यस्नानान्नाशनादिभिः ।
कृपान्वितं विरूपं हि मलिनं मलिनांबरम् । 46
योगीन्द्राशङ्कया नित्यमतिथीन्न विचारयेत् ।
91 शिवयोगिशरीरेषु नित्यं सन्निहितश्शिवः । 47
योगीन्द्रं पूजयेत्तस्मात् साक्षात्संपूजयेच्छिवः ।
ये योगीन्द्रं द्विषन्त्यज्ञाः सर्वपापेष्वनुक्रमात् । 48

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अधोमुखोर्ध्वपादास्ते पच्यन्ते नरकाग्निषु ।
कर्मभिर्भिन्नवदना तप्यमानाश्च वह्निना । 49
प्रपीड्यन्ते महाघोरैः यावदाचन्द्रतारकम् ।
ये शिवज्ञाननिरतं प्रद्विषन्ति मनागपि । 50
पश्चाद्दाहुकबन्धास्ते नीयन्ते यमसादनम् ।
रपि पादयोः
तत्राग्नितप्तसन्दंशैः प्रवीदो रवि वादयोः । 51
तेषामुत्पाद्यते जिह्वा शतशोऽथ सहस्रशः ।
विक्रश्यन्ते महात्मानं ये मूढाश्शिवयोगिनम् । 52
ते यान्ति श्रोत्रिभिस्सार्धं नरकं नैव संशयः ।
येऽचापवादं शृण्वन्ति विमूढाश्शिवयोगिनः । 53
ते शोषेण वध्यन्ते नरके व्यामहि क्षयात् ।
न सति श्रोतरि वक्ता स्यादवमानस्य योगिनः । 54
तस्माच्छ्रोतात्र पापीयान् नाददात्कुमहात्मनः ।
वक्ता श्रोतानुमन्ता च प्रयोक्ता दूषणस्य च । 55
एतेषां यस्तु संपर्कं पश्चैते नरकास्स्मृताः ।
इति योगीन्द्रपात्रस्थ महाभाग्यमुदाहृतम् । 56
पूज्यापवाद विषमस्व पात्रं शृणुताधुना ।
अज्ञानपङ्कनिर्मग्नमात्मत्राणविवर्जितः । 57
अपुण्यगिरिणा क्रान्तमपात्रं गुणवर्जितम् ।
& आमपात्रे रसो यद्वा नश्यते सह भाजनम् । 58

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

91a दानकुञ्जे यथा स्वस्थं स्तं सहपात्रेण नश्यति ।
सद्बीजमूषके यद्वा दुस्तान्निरिव कतां व्रजेत् । 59
दानं तद्वदपात्रेषु विन्यस्तं निष्फलं भवेत् ।
तस्मिन्निव हुतं हव्यं यथा होतुस्तु निष्फलम् । 60
ज्ञानाग्निरहितो विप्रो .. प्यादानं निरर्थकम् ।
यथा षण्डो नरस्त्रीषु पुंगवेन विनाच गौः । 61
ब्राह्मणस्य तथा जन्म ज्ञानहीनस्य निष्फलम् ।
लोष्ठोडुपेन प्रच्यरं निमज्जत्युदके यथा । 62
तथा दाता गृहीताच पतत्यन्धे तमस्यधः ।
का . . र्व भूतेभ्यः श्रद्धया यत्प्रदीयते । 63
दानं तदपि विज्ञेयं सर्वकामिकमुत्तमम् ।
दीनान्धकृपणानाथबालवृद्धकृशातुराः । 64
एतेनुकंप्यास्सततं नार्थं गृह्णीत निस्पृहः ।
अर्हत्यज्ञानिनः पात्रमस्पृहत्वान्न तेर्थिनः । 65
आत्मिका विहिता पूजा पर्याप्तं कर्मिणः फलम् ।
नहि स्वार्थं समुद्दिश्य पुत्रं हन्ति हि साधवः । 66
दातुरेवोपकाराय गृह्णन्ति मुनयो मनात् ।
दरिद्रस्साधुभिर्यत्नात्प्रार्थनीयो ह्यनुकंपया । 67
अदानादन्य दारिद्र्यं दानादैश्वर्यमाप्नुयात् ।
दातुरेवोपकाराय वदत्यर्थि तदस्य मे । 68

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यस्माद्दाता व्रजेदूर्ध्वमयन्तिष्ठेत्प्रतिग्रही ।
देहीत्येवं ब्रुवत्यर्थी जनं बोधयतीव न सः ॥ 69
यदिदं कष्टमर्थित्वं प्राग्दानफलं महत् ।
12 बोधयन्ति न याचन्ते देहीति कृपणा जनाः ॥ 70
अवस्थेयमदानस्य माभूदेवं भवानपि ।
कल्याणमित्रमायान्तमर्थिनं को न पूजयेत् ॥ 71
दानात्स्वर्गमवाप्नोति कोऽन्यो बन्धोरिवार्थिनः ।
इहमन्त्रफलस्योपि दातारमकुयो व्रजेत् ॥ 72
आध त्यत्युग्रहं दातुः कस्तं न प्रतिपूजयेत् ॥ 73
नार्थिनः स्युः कथं पूजा याचमाना दिने दिने ।
ये बलादस्य निक्षिप्तं योजयन्ति नरं श्रिया ॥ 74
अहन्यहनि मार्जन्तं को समन्ये गुरुं यथा ।
मार्जनं दर्पणस्येव यः करोति दिने दिने ॥ 75
करमुत्तानकं कृत्वा दानं गृह्णाति यो द्विजः ।
दीनादूर्ध्वं गतिं तस्य दातुर्दर्शयतीव सः ॥ 76
एकेन तिष्ठतादन्तादन्योन्यं परिवृता ।
दातृयाचकयोर्भेदः कराभ्यामेव नोचितः ॥ 77
यः पात्रमर्थिनं दीनं त्यक्त्वा पात्रमुपेक्षति ।
स वणिस्थुर्मुक्तत्वानां दाता परमार्थिनः ॥ 78
यद्यर्थिनो नरा न स्युः दातुर्धर्म कथं भवेत्

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नत्वर्थिषु भवेद्दानं नच दाने च तत्फलम् ।
यदि लब्ध्वा शठा हीना नस्युरप्रियवादिनः ॥ 79
क्षात्रं दानं तथा तथा क्षान्त भार्या तेना बुद्धि भिन्नधा ।
यदि नामनि देयं स्यात्सं प्राप्ताया र्थिने गृहम् ॥ 80
किं वाक्यस्य विनष्टानि प्रियाण्यनुगतानि च ।
92a अभ्युत्थानाभिगमनं स्वागतं चासनं प्रियम् ॥ 81
पादोदकमनुव्रज्य स्वर्गसोपानसप्तकम् ।
वित्तं चित्तानुसारेण कदा कस्य भविष्यति ॥ 82
ग्रासादर्धमपि ग्रासं दातुं युक्तं सदार्थिने ।
दानं प्रियविनिर्मुक्तं नष्टमाहुर्विपश्चितः ॥ 83
तस्मात्सत्कृत्य दातव्यं नरेण फलमिच्छता ।
प्रत्याभ्यासमपि श्रेयः प्रियासु न्यु पेशलम् ॥ 84
सकृ दानमसत्कार पारुष्यं परुषीकृतम् ।
संक्रुद्धे
वरं न दत्तमर्थिभ्यः संस्कृते नान्तरात्मना ॥ 85
स
द: : श्र नच प्रीति नं धर्म प्रियवर्जितः ।
दानं व्रतादिनियमः यज्ञं ध्यानं हुतं तपः ॥ 86
यत्नेनापि कृतं सर्वं क्रोधिनस्तद्वृथा भवेत् ।
यश्श्रद्धया स्थितं दद्यात् प्रतिगृह्णाति चार्थिनः ॥ 87
तावुभौ गच्छतस्स्वर्गं नरकं तद्विपर्यये ।
कुद्दार्यात्सगति :: मैत्री मनुकंपा महत्सरा ॥ 88

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

गुणं नु (सु) वहते पश्च दातुर्दानं महत्फलम् ।
वाराणसी कुरुक्षेत्रं प्रयागं पुष्कराणि च ।। 189
गाङ्गं समुद्रतीरं च नैमिशारण्यमष्टमम् ।
श्रीपर्वतं महापुण्यं गोकर्णं वेदपर्वतम् ।। 190
इत्यादिकीर्तिता देशास्स्युरसिद्धनिषेविताः ।
सर्वे शिवाश्रमाः पुण्या स्सर्वनद्यास्सपर्वताः ।। 191
गोसिद्धमुनिवासं च पुण्यदेशाः प्रकीर्तिताः ।
१३ शिवायतनसंस्थाने यदल्पमपि दीयते ।। 192
तदनन्तफलं ज्ञेयं शिवक्षेत्रानुभावितः ।
ग्रहणं चन्द्रसूर्याभ्यामुत्तरायणदक्षिणम् ।। 193
विषुवं संव्यतीपातं षडशीतिमुखं तथा ।
दिनक्षिद्राणिनाक्रान्ते ज्ञेयं विष्णुपदं तथा ।। 194
इति कालास्समाख्याता पुंसां पुण्यविवर्धिताः ।
भक्तिर्भावः परा प्रीतिः शिवधर्मैकतां गता ।। 195
प्रतिपत्तिरिति ज्ञेया श्रद्धाहर्याय वञ्चकम् ।
श्रद्धा मातेव जननी ज्ञानस्य कृतस्य च ।। 196
तस्माच्छ्रद्धां समुत्पाद्य देयमक्षयमिच्छता ।
यद्दानं श्रद्धया पात्रे विधिवत्प्रतिपादितम् ।। 197
तदनन्तफलं ज्ञेयमपि वालाग्रमात्रकम् ।
तीर्थेषु दीनेषु गुणान्वितेषु यच्छ्रद्धया स्वल्पमपि? प्रदत्तम् ।। 198

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तत्सर्वकामान् समुपैति लोके श्रद्धेव दानं प्रवदन्ति तज्ज्ञाः । 199

श्रद्धाप्रधानं विज्ञेयं सत्पात्राणि चतुष्टयम्

श्रद्धा ते कीर्तिता तस्मान्नाश्रद्धातः फलं लभेत् 199½

॥इति शिवधर्मोत्तरे सत्पात्रगुणं

नाम चतुर्थोऽध्यायः॥

श्रीसाम्बसदाशिवाय

परब्रह्मणे नमः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

( ॥ श्रीः ॥ )

(॥ अथ) पञ्चमोऽध्यायः ॥ 7

अथ धर्मा शिवेनोक्ता शिवधर्मागमोत्तमे ।
ज्ञेया बहुविधास्ते च कर्मयोगप्रभेदतः ॥ 1
हिंसादोषविनिर्मुक्ताः क्लेशायासविवर्जिताः ।
सर्वभूतहिताश्शुद्धास्सुसूक्ष्मास्सुमहत्फलाः ॥ 2
अनन्तशाखाकलिताश्शिवमूलैकसंश्रिताः ।
सर्वे सर्वगुणोपेताः शिवधर्मास्सनातनाः ॥ 3
93a याजयन्ति शिवं यस्मा(त्) ध्यायन्ते शिवभावितैः ।
शिवधर्मास्स्मृतास्तस्मात्संसारार्णवतारणाः ॥ 4
अथाहिंसा दया सत्यं ह्रीः श्रद्धेन्द्रियनिग्रहः ।
दानमिज्या जपो ध्यानं दशकं धर्मलक्षणम् ॥ 5
अथ व्यस्तैस्समस्तैर्वा शिवधर्मैरनुष्ठितैः ।
शिवैकस्थानसंप्राप्तिः गतिरेकैव कीर्तिता ॥ 6
यथा भूस्सर्वभूतानां स्थानं साधारणं स्मृतम् ।
तथा तच्छिवभक्तानां भोगास्सातिशयास्स्मृताः ॥ 7
नानापुण्यविशेषेण भोगाश्शिवपुरे . था ।
शुभाशुभफलं चात्र भजन्ते सर्वदेहिनः ॥ 8
शिवधर्मस्य चैकस्य फलं तत्रोपभुज्यते ।
यस्य यावद्भवेत्पुण्यं श्रद्धापात्रविशेषतः ॥ 9

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भोगान्तानि विधां तत्र ज्ञेयास्सातिशयास्तथा ।
स्थान प्राप्तिपरा तुल्या भोगास्सातिशया स्थिताः ॥ 10
कुर्यात्पुण्यं महत्तस्मान्महापुण्यजिगीषया ।
सर्वाधिपत्यमेकैकं तत्र नास्ति पुरोत्तमे ॥ 11
आत्मभोगाधिपत्यं स्याच्छिवस्सर्वजगत्पतिः ।
केचित्तत्रैव मुच्यन्ते ज्ञानयोगरता नराः ॥ 12
आवर्तन्ते पुनश्चान्ये संसारे भोगतत्पराः ।
तस्मात्परोक्षमन्विच्छन् भोगासक्तिं विवर्जयेत् ॥ 13
विरक्तश्शान्तचित्तात्मा शिवज्ञानमवाप्नुयात् ।
येचान्ये सक्तहृदया यजन्ति प्रसंगतः ।
ते षामपि ददातीशः स्थानमात्मानुरूपतः ॥ 14
94 ततोऽर्चयन्ति ये रुद्रं सकृद्द्विच्छिद्य कल्मषम् ।
तेषां पिशाचलोकेषु भोगानीशः प्रयच्छति ॥ 15
द्विरर्चयन्ति ये रुद्रं क्रूरास्संक्रुद्धलोचनाः ।
रक्षोलोके शिवस्तेषां महाभोगान्प्रयच्छति ॥ 16
त्रिरर्चयन्ति ये रुद्रं मद्यमांसातुरा नराः ।
यक्षलोके शिवस्तेषां भोगान् दिव्यान् प्रयच्छति ॥ 17
ये नु प्रगीतं कुर्वन्ति त्रिश्चतुर्वा यदृच्छया ॥ 18
शिवाग्रतस्ते ते यान्ति गान्धर्वं भुवनं नराः ।
लोकाः ख्यातिं समुद्दिश्य पञ्चार्चयन्ति यक्षाणाम् ॥ 19

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

त.. द्र भवने रुद्रः कामान्दिव्यान्प्रयच्छति ।
कामासक्तेन चित्तेन पउर्च्चयति यश्शिवम् ।२०
सोमलोके शिवस्तस्य कामान् दिव्यान्प्रयच्छति ।
सम्प्रार्च्चयन्ति ये रुद्रं गन्धपुष्पादिभिः क्रमात् ।२१
प्राजापत्ये शिवस्तस्यं लोके भोगान्प्रयच्छति ।
अभ्यर्च्चयन्ति गायत्र्या शिवं ये वेदतत्पराः ।२२
सद्भावतश्शिवस्तेषां ब्रह्मलोकं प्रयच्छति ।
न वार्च्चयन्ति ये रुद्रमेकत्वं समुपाश्रिताः ।२३
ते यान्ति विष्णुभवनं दिव्यैर्भोगैस्समन्विताः ।
ज्ञेयं विष्णुपुरादूर्ध्वं दिव्यं शिवपुरं महत् ।२४
तद्भोगस्थानमतुलं कर्मयोगरतात्मनाम् ।
अप्रमेयगुणैर्दिव्यैः विमानैस्सार्वगामिकैः ।२५
94a असंख्यैस्तत्पुरं व्याप्तं सर्वप्राण्युपकारकैः ।
सहस्रभौमविस्तीर्णैः सूर्यकोटिसमप्रभैः ।२६
रुद्रलोकमिव प्रोक्तमशेषगुणसंयुतम् ।
सर्वेषां शिवभक्तानां तत्पुरं परिकीर्तितम् ।२७
रुद्रक्षेत्रे मृतानाञ्च जङ्गमस्थावरात्मनाम् ।
अप्येकदेवसंभक्त्या यः पूजयति शङ्करम् ।२८
सोपि याति परं स्थानं . : . र्चनात् ।
तस्माद्दीशो सदा भक्तिं भावयेदात्मनात्मनि ।२९

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तस्माद्वामविचारेण भवदोषविरागतः ।
एवं शिवानुभावेन निकृष्टेनापि कर्मणा । 30
नरैः स्थानान्यवाप्यन्ते कर्मभावानुरूपतः ।
इत्येतत्परमं प्रोक्तं श्रीमच्छिवपुरं महत् । 31
देहिनां कर्मनिष्ठानां पुनरावर्तनं स्मृतम् ।
ऊर्ध्वं शिवपुराज्ज्ञेयं स्थानान्नाथमनुत्तमम् । 32
नित्यं परं विशुद्धं च स्कन्दोमाशङ्करात्मकम् ।
स्कन्दं शक्तिधरं शान्तं षण्मुखं शिखिवाहनम् । 33
तप्तचामीकरप्रख्यं त्रिशिखं बालरूपिणम् ।
प्रभाभिर्भासितं देवं सर्वलोकानुकम्पकम् । 34
ध्यायन्सदा प्रसन्नात्मा गुहस्थानमवाप्नुयात् ।
कन्यारूपामुमां शान्तां सूर्यकोटिसमप्रभाम् । 35
ध्यायमानस्सदा भक्त्या देव्याः स्थानमवाप्नुयात् ।
शुद्धस्फटिकसंकाशं जटामकुटशोभितम् । 36
95 त्र्यक्षं चतुर्भुजं शान्तमक्षमालाधरं हरम् ।
वरदाभयहस्तं च त्रिशूलासक्तपाणिनम् । 37
ध्यायमानश्शिवं नित्यं तत्सायुज्यम(वा)प्नुयात् ।
ये संप्राप्ताः परं स्थानं ज्ञानयोगरता नराः । 38
न तेषां पुनरावृत्तिः घोरसंसारसागरे ।
सर्वज्ञास्सर्वगाश्शुद्धाः परिपूर्णा महेश्वराः । 39

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिवतुल्यबलोपेताः परं शिवपुरं गताः ।
भोगं प्रबोधयिष्यामि पृथगध्यायसंस्थितम् । 40
कुपरिष्टाच्च लोकानां स्वरूपं चाप्यनुक्रमात् ।
तत्राष्टगुणमैश्वर्यं पार्थिवं पिशिताशिनाम् । 41
तत्सायुज्यगतानां च नराणां तत्समं स्मृतम् ।
राक्षसं षोडशगुणं पार्थिवं चापि तद्विधा । 42
एतानरविशेषं हि यक्षेष्वन्यस्य तैजसम् ।
गन्धर्वाणां च वायव्यं यक्षाणां सकलं स्मृतम् । 43
पाञ्चभौतिकमिन्द्रस्य चत्वारिंशद्गुणं महत् ।
सोमपानरसं दिव्यं शब्दादं पाञ्चभौतिकम् । 44
सौम्यात्प्रजापतिं नाम अहंकारगुणाधिकम् ।
चतुष्षष्टिगुणं ब्राह्मं भोग्यमैश्वर्यमुत्तमम् । 45
विष्णोः प्रदानि सूक्ष्ममैश्वरं ब्रह्मणः परम् ।
श्रीमच्छिवपुरं दिव्यं मैश्वरं सर्वगामिकम् । 46
अनन्तगुणमैश्वर्यं शिवस्यात्मगतं महत् ।
आदिमध्यान्तरहितं विशुद्धं तत्वलक्षणम् । 47
95a सर्वाभिभावकं सूक्ष्ममनोपम्यमनामयम् ।
सुसंपूर्णं जगद्धेतुं पशुपाशविलक्षणम् । 48
एतत्स्थानमनुप्रोक्तं तस्य भोगास्तदात्मकाः ।
ऐश्वर्यं तत्समानं च भवेदीश प्रसादतः । 49

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तारारूपा विमानानां दृश्यन्ते सप्तकोटयः ।

अष्टाविंशतिरेवोर्ध्वं संख्यातास्सुकृतात्मनाम् । 50

ये कुर्वन्ति नमस्कारमीश्वराय क्वचित्क्वचित् ।

संपर्कात्कौतुकाल्लोभात्तद्विमानं वहन्ति ते । 51

नामसंकीर्तनं वापि प्रसङ्गेन शिवस्य च ।

कुर्याद्वा तं नमस्कारं न तस्य विफलं भवेत् । 52

इत्येवं गतयः प्रोक्ता महत्यः शिवकर्मणाम् ।

अत्यल्पाल्पतरेणापि पुंसामाशानुभावतः । 53

॥ इति श्रीशिवधर्मोत्तरे शिवसंगत्यः

पञ्चमोऽध्यायः ॥

श्रीसांबसदाशिवपर-

ब्रह्मणे नमः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

( ॥श्रीः॥ )

(॥ अथ षष्ठोऽध्यायः ॥ )

अथाधः पतनात्पुंसामधर्मः परिकीर्तितः ।
नरकाब्धौ महाघोरे पतनात्पापमुच्यते ॥ 1
अधर्मभेदो विज्ञेयास्त्रिविधवृत्तिप्रभेदतः ।
स्थूलसूक्ष्मासुसूक्ष्माश्च कोटिभेदैरनेकधा ॥ 2
तत्र ये पापनिचयास्स्थूला नरकहेतवः ।
ते समासेन कथ्यन्ते वाङ्मनःकायसाधनम् ॥ 3
परस्त्रीद्रव्यसंकल्पश्चेतसानिष्टचिन्तनम् ।
अकार्याभिनिवेशश्च चतुर्धा कर्म मानसम् ॥ 4
अनिबन्धप्रलापित्वमसत्यं चाप्रियं च यत् ।
96 परापवादपैशुन्यं चतुर्धा कर्म वाचिकम् ॥ 5
अभक्ष्यभक्षणं हिंसा मिथ्याकर्मान्यसेवनम् ।
परस्वानामुपादानं चतुर्धा कर्म कायिकम् ॥ 6
इत्येवं त्रिविधं प्रोक्तं कर्मत्रितयनादिनम् ।
अस्य भेदान्पुनर्वक्ष्ये येषां फलमनन्तकम् ॥ 7
ये द्विषन्ति महादेवं संसारार्णवतारणम् ।
सुमहत्पातकोपेतास्ते यान्ति नरकान्तिकम् ॥ 8
दूषयन्ति शिवज्ञानं ये सर्वार्थप्रसाधनम् ।
सुमहत्पातकं तेषां निरयार्णवगामिनाम् ॥ 9

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिवज्ञानस्य वक्तारं निन्दन्ति च गुरुं नराः ।
सुमहत्पातकोपेतास्ते यान्ति निरयार्णवम् ।। 10
शिवनिन्दा गुरोर्निन्दा शिवज्ञानस्य दूषणम् ।
देवद्रव्यापहारित्वं गुरुद्रव्यविनाशनम् ।। 11
हरन्ति येन संमूढाः शिवज्ञानस्य पुस्तकम् ।
सुमहत्पातकोपेता अनन्तानि फलानि पार् ।। 12
नाभिनन्दन्ति ये दृष्ट्वा शिवपूजां प्रकल्पिताम् ।
न नमन्त्यर्चितं दृष्ट्वा पूजितं न स्तुवन्ति च ।। 13
यथेष्टं चेष्टानिस्सङ्गास्सन्ति ष्ठन्ति रमन्ति च ।
उपचारविनिर्मुक्ताः शिवाग्निगुरुसन्निधौ ।। 14
स्थानसंस्कारपू..श्च येन कुर्वन्ति पर्वसु ।
शिवविद्यागुरूणां च कर्मयोगव्यवस्थिताः ।। 15
ये त्यजन्ति शिवाचारं शिवभक्तान्द्विषन्ति च ।
शिवनिन्दासमा ह्येते महान्तः पातकोत्तमाः ।। 16
96a असंपूज्य शिवज्ञानं ये धियन्ते लिखन्ति च ।
अन्यायतश्च पृच्छन्ति शृण्वन्त्युच्चारयन्ति च ।। 17
विक्रियन्ति च लोभेन कुज्ञानैः नियमेन वा ।
असंस्कृतप्रदेशेषु यथेष्टं स्थापयन्ति च ।। 18
शिवज्ञानरथाक्षेपं यः कृत्वान्यत्प्रभाषते ।
साध्यीयन्ते समर्थस्सन् यः प्रमादं करोति च ।। 19

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अचिन्ताश्चाशुचिस्थाने यश्शृणोति पठति च ।
इति सर्वं समासेन ज्ञाननिन्दा समं स्मृतम् ।२०
गुरुपूजामकृत्वैव यश्शास्त्रं श्रोतुमिच्छति ।
न करोति च शिश्रूषा माज्ञां भक्तिं च भावतः ।२१
नाभिनन्दन्ति तद्वाक्यमुत्तरं च प्रयच्छति ।
गुरुकर्मणि शाठ्यं च तदुपेक्षां करोति च ।२२
गुरुमार्तमशक्तं वा विदेशप्रास्थितं तथा ।
अरिभिः परिभूतं वा यस्संत्यजति पापकृत् ।२३
~~गुरुभार्या~~ तद्भार्या पुत्रमित्रेषु यश्चावज्ञां करोति च ।
इत्येतत्पातकं ज्ञेयं गुरुनिन्दासमं भवेत् ।२४
ब्रह्मघ्नश्च सुरापश्च स्तेयी च गुरुतल्पगः ।
महापातकस्त्वेते तत्संयोगी च पञ्चमः ।२५
क्रोधाल्लोभाद्भयाद्द्वेषात् ब्राह्मणस्य वधे तु यः ।
मर्मान्तिकं महादोषं ब्रह्महा स प्रकीर्तितः ।२६
ब्राह्मणं यस्समाहूय याचमानमकिञ्चनम् ।
पश्चान्नास्तीति यो ब्रूयात् ब्रह्महत्या स स्मृतः ।२७
97 यश्चापि विद्याजमानेन यस्तर्जयति द्विजम् ।
उदासीनं सभामध्ये ब्रह्महा स प्रकीर्तितः ।२८
मिथ्यागुणैस्स्वमात्मानं नयत्युत्कर्षणं बलात् ।
गुरूणां च विरुद्धस्स्यात् ब्रह्महत्या सम स्मृतः ।२९

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

क्षुत्तृष्णातप्तदेहानां द्विजानां भोक्तुमिच्छताम् ।
* यस्समाचरते विघ्नं तमाहुः ब्रह्मघातकम् ।30
परदोषान्परिज्ञाय नृपकर्णे जपेत यः ।
पापीयान्पिशुनः क्षुद्रो ब्रह्मा द्परिच्युति स्मृतः ।31
पिशुनस्सर्वलोकानां रन्ध्रान्वेषणतत्परः ।
उद्वेगजनकः क्रूरः सच वै ब्रह्मघातकः ।32
गवां तृष्णाभिभूतानां गच्छन्तीनां जलाशयम् ।
यस्समाचरते विघ्नं तमाहुर्ब्रह्मघातकम् ।33
देवद्विजगतां भूमिं पूर्वदत्तां हरेत यः ।
प्रनष्टामपि कालेन तमाहुः ब्रह्मघातकम् ।34
द्विजवित्तापहरणं न्यायेन समुपार्जितम् ।
ब्रह्महत्यासमं ज्ञेयं पातकं नात्र संशयः ।35
अधित्सयाश्शिवज्ञानं परित्यजति मूढधीः ।
सुरापानसमं ज्ञेयं तत्पातकमुत्तमम् ।36
अग्निहोत्रपरित्यागः पञ्चयज्ञादिकर्मणाम् ।
मातापित्रोः परित्यागः कूटसाक्ष्यं सुहृद्वधः ।37
अप्रियं शिवभक्तानामभक्ष्यस्य च भक्षणम् ।
वने निरपराधानां प्राणिनां चोपघातकम् ।38
गवां मार्गे वने चाग्निं पुरं ग्रामं प्रदीपयेत् ।
इति पापानि घोराणि सुरापानसमानि तु ।39

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

९७ * हीनसर्वस्वहरणं नरस्त्रीगजवाजिनाम् ।
गोभूमिरत्नरौप्याणामोषधीनां रसस्य च ॥ 40
चन्दनागरुकस्तूरीकर्पूरपट्टवाससाम् ।
वासस्यानापहरणं रुक्मस्तेयसमं स्मृतः ॥ 41
कन्यानां वरयोग्यानामदानं सदृशे वरे ।
पुत्रमित्रकलत्रेषु गमनं भगिनीषु च ॥ 42
कुमारीसाहसं घोरमन्त्यजस्त्रीनिषेवणम् ।
सवर्णायाश्च गमनं गुरुतल्पसमं स्मृतम् ॥ 43
महापातकतुल्यानि पापान्युक्तानि यानि तु ।
तानि पातकसंज्ञानि तदूनमुपपातकम् ॥ 44
द्विजायार्थं प्रतिश्रुत्य न प्रयच्छति यः पुनः ।
स न स्मरयते विप्रः तुल्यं तदुपपातकैः ॥ 45
द्विजद्रव्यापहरणं मर्यादाव्यतिक्रमः ।
अतिमानातिकोपश्च दाम्भिकत्वं कृतघ्नता ॥ 46
अत्यन्तविषयासक्तिः कार्पण्यं शाठ्यमत्सरे ।
परदाराभिगमनं साधुकन्याभिदूषणम् ॥ 47
परिवित्तिः परिवेत्ता यया च परिविद्यते ।
तयोर्दानं च कन्यायाः तयोरेव च याजनम् ॥ 48
पुत्रमित्रकलत्राणां प्रभवे स्वामिनस्तथा ।
कार्याणां च परित्यागः स्वामिबन्धुतपस्विनाम् ॥ 49

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

गवां क्षत्रियवैश्यानां स्त्रीशूद्राणां विघातकम् ।
छिन्नाश्रमतरूणां च पुष्परामा विनाशनम् । 50
यः ईहामाश्रमस्थानामन्यरेवालिकामपि ।
तद्धृत्या परिवारस्य पशुधान्यधनस्य च । 51
चौर्यधेनुपशुर्द्दैया मया ज्ञानं च याजनः ।
यज्ञारामतटाकानां दारापत्यस्य ~~स्य~~ विक्रयः । 52
१८ तीर्थयात्रोपवासानां व्रतायतनकर्मणाम् ।
स्त्रीधनान्युपजीवन्ति स्त्रीभिरत्यन्तकीर्तिताः । 53
अरक्षणं च नारीणां मद्यम् स्त्रीनिषेवणम् ।
ऋणानामप्रदानं च धान्य ~~द्रव्य~~ वृद्ध्युपसेवनम् । 54
निन्दितान्नदनादानमापण्यानां च विक्रियम् ।
निषमारणयन्त्राणां प्रयोगो मूलकर्मणाम् । 55
उच्चाटनाभिचारस्य गुरुविद्वेषणक्रिया ।
जिह्वाकामोपभोगार्थं यदारंभस्य कर्मसु । 56
मूल्येनाध्यापये यस्तु मूल्येनाधीयते च ये ।
व्रात्यता व्रतसंत्याग सर्वाहारनिषेवणम् । 57
असच्छास्त्राभिगमनं शुष्कतर्कावलंबनम् ।
देवाग्निगुरुसाध्वीनां निन्दा गोब्राह्मणस्य च । 58
प्रत्यक्षं वा परोक्षं वा राज्ञां मण्डलिनामपि ।
उत्पन्नपितृदेवेज्यास्वकर्मत्यागिनां * तस्मा । 59

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दुश्शीला नास्तिकाः पापा सदा सच्छ्रूत्रवादिनः ।
सर्वकाले दिवाचापि प्स्वुनियोनौ पशुयोनुषु ।। 160
रजस्वलासु योनौ च मैथुनं यस्समाचरेत् ।
स्त्री पुत्र मित्र संप्रीतेराशायाश्छेदकाश्च ये ।। 161
जनस्याप्रियवक्तारः क्रूरास्समयभेदिनः ।
कृतास्तदूनकैः क्षुद्रैः पापैः पापनरास्स्मृताः ।। 162
यो गोब्राह्मणकन्यानां स्वामिमित्रतपस्विनाम् ।
अन्तरायान्ति कार्येषु ते स्मृता नरकास्स्मृताः ।। 163
18a परद्रव्यहितैयन्ते ये परद्रव्यसूचिकाः ।
द्रव्यापहारनिरताः परस्त्रीपरदूषकाः ।। 164
दुःखं द्विजानां यः कुर्यात् प्रहरेद्दुर्वितो हि यः ।
यस्सेवते द्विजाश्शूद्रं सुरां चापाति कामतः ।। 165
ये पापाभिरताः क्रूराः येपि हिंसाप्रिया नराः ।
(वृ)
भृत्यर्थं ये च कुर्वन्ते दानयज्ञादिकाः क्रियाः ।। 166
गोष्ठाग्निजलरथ्यासु तरुच्छायानगेषु च ।
ये त्यजन्ति पुरीषाद्या नारामायतनेषु च ।। 167
मद्यपानरता नित्यं गीतवाद्यरता नराः ।
केकीशिलाभुजङ्गश्च रन्ध्रान्वेष तत्पराः ।। 168
वंशोष्ठकाशिलाकाष्ठैः शृङ्गैः शङ्कुभिरेव च ।
ये मार्गमुपरुन्धन्ति परसीमां हरन्ति च ।। 169

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कूरशासनकर्तारः क्रूरकर्मरता नराः ।
कूटयुद्धाश्च वस्त्राणि कूटसंव्यवहारिणः ॥ 70
धनुषां शल्यशस्त्राणां यः कर्ता यश्च विक्रिया ।
निर्दयोतिवधोऽयेषु पशूनां दमकाश्च ये ॥ 71
मिथ्याप्रवक्तारो पाश्च माकर्णयति यश्शनैः ।
स्वामिमित्रगुरुद्रोही मायावी च परश्शठः ॥ 72
ये भार्यापुत्रमित्राणि बालवृद्धकृशातुरान् ।
भृत्यानतिथिबन्धूंश्च त्यक्त्वाश्नन्ति बुभुक्षितान् ॥ 73
यस्स्वयं मृष्टमश्नाति विप्रायान्यत्प्रयच्छति ।
वृथापाकी स विज्ञेयो ब्रह्मवादिषु ~~[illegible]~~ गर्हितः ॥ 74
नियमान्स्वयमादाय ये त्यजन्ति जितेन्द्रियाः ।
प्रव्रज्यारसिका ये च रहस्यानां च भेदकाः ॥ 75
११ ये लोभयन्ति गाश्चैव शिवं तेच मुहुर्मुहुः ।
दुर्बलान्येव पुष्णन्ति प्रणष्टांश्च द्विषन्तिच ॥ 76
पीडयन्त्यतिभारेण असकृद्दाहयन्ति च ।
सार्थयामाश्च नरताः संयुक्तो येन * भुज्यते ॥ 77
ये भग्नानाभिरोगार्थं तान्स्वगोपान्क्षुधातुरान् ।
न पालयन्ति यत्नेन स्ते गोघ्ना नारका स्मृताः ॥ 78
वृषाणां वृषणाय च पापिष्ठा नाशयन्ति च ।
वाहयन्ति च गां वन्ध्यां महीं नारकिणो नराः ॥ 79

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ष्ट
अदृशा.. समनुप्राप्तान् क्षुत्तृष्णाश्रमकर्शितान् ।
ये तिथीनव मन्यन्ते ते वै निरयगामिनः । ८०
र
अनाथान्विकलान् दीनान् बालवृद्धकृशातुरान् ।
नानुकम्पन्ति ये मूढास्ते यान्ति निरयार्णवम् । ८१
अजाविको माहिषिकस्सामुद्रो वृषलीपतिः ।
शूद्रविट्क्षत्रवृत्तिश्च नारकी स्याद्द्विजोत्तमः । ८२
शिल्पिनः कारवो वैद्या हेमकारनृपध्वजाः ।
भृतकाश्शाठ्यसंयुक्तास्ते नरा नरकास्स्मृताः । ८३
यश्चोचितमतिक्रम्य स्वेच्छयैव हरेत्करम् ।
नरकेषु स पच्येत यश्च दण्डरुचिर्नृपः । ८४
उत्कोशकैरधिकृतैस्तस्करैश्च प्रपीड्यते ।
यस्य राज्ञः प्रजा राष्ट्रे पच्यते नरकेषु सः । ८५
ह्ण
ये द्विजाः प्रतिगृह्णन्ति नृपस्यान्यायवर्तिनः ।
प्रयान्ति तेपि घोरेषु नरकेषु न संशयः । ८६
पारदारिकचोराणां यत्पापं पार्थिवस्य तत् ।
११a भवेदरक्षतस्तस्य पापायैव प्रतिग्रहाः । ८७
अचोरं चोरवत्पश्ये चोरं वा चोररूपिणम् ।
अविचार्य नृपस्तस्मात् घातयन्नरकं व्रजेत् । ८८
घृततैलान्नपानानि मधुमांससुरासवम् ।
गवेक्षुक्षीरशाकानि दधिमूलफलानि च । ८९

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तृणकाष्ठं कुथवस्त्रं मौषधास्व भाजनम् ।
उपानच्छत्र शकटमासनं शयनं मृदुः । 90
ताम्रसीसं त्रपु कांस्यं शङ्खाद्यं च जलोद्भवम् ।
वार्क्षं वा वैणवं वाद्यं गृहोपकरणानि च । 91
और्ण कार्पास कौशेय भण्ट पट्टोद्भवानि च ।
स्थूलसूक्ष्माणि वस्त्राणि ये लोभेन हरन्ति च । 92
नरकेषु ध्रुवं गच्छेत् अपहृत्य स्वल्पकानि च ।
यद्वा तद्वा परद्रव्यमपि सर्षपमात्रकम् । 93
अपहृत्य नरो याति नरकं नात्र संशयः ।
एवमाद्यैर्नरैः पापैः उत्क्रान्तैस्समनन्तरम् । 94
शरीरं यातनार्थीयं पूर्वाकारमवाप्नुयात् ।
शरीरेण व्रजन्त्येते शरीरेण यमाज्ञया । 95
यमदूतैर्महाघोरैः नीयमानास्सुदुःखिताः ।
देवतिर्यङ्मनुष्याणामधर्मनियतात्मनाम् । 96
धर्मराजः स्मृतश्शास्ता सुघोरैर्विविधैर्वधैः ।
नियमाचारयुक्तानां प्रमादात्स्खलितात्मनाम् । 97
प्रायश्चित्तैर्गुरुश्शास्ता न यमो वधयिष्यति ।
परदारकचोराणामन्याय व्यवहारिणाम् । 98
100 नृपतिश्शासकः प्रोक्तः प्रच्छन्नानां च धर्मराट् ।
तस्मात्कृतस्य पापस्य प्रायश्चित्तं समाचरेत् । 99

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नाभुक्तस्यान्यथानाशः कल्पकोटिशतैरपि ।
यः करोति स्वयं कर्म कारयेच्चानुमोदयेत् । 100
कायेन मनसा वाचा तस्य चाधोगतिः फलम् ।
इति संक्षेपतः प्रोक्ताः पापभीतास्त्रिसाधनाः । 101
कथ्यन्ते गतयश्चित्राः नराणां पापकर्मणाम् ।

॥ इति श्रीशिवधर्मोत्तरे पापभेदं
नाम षष्ठोऽध्यायः ॥

श्री सांबसदाशिवाय पर
ब्रह्मणे नमः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

(॥ श्रीः ॥)

॥ (अथ) सप्तमोऽध्यायः ॥

अथ पापै रितो यान्ति यमलोकं च तद्विधैः ।
सन्त्रासजननं घोरं विवशास्सर्वदेहिनः । 1
गर्भस्थैर्जायमानैश्च बालैस्तरुण दुर्ध्यमैः ।
स्त्रीपुंनपुंसकैर्वृद्धैः ध्यातव्यं सर्वजन्तुभिः । 2
शुभाशुभफलं चात्र देहिनां प्रविचार्यते ।
चित्रगुप्तादिभिस्सद्भिर्मध्यस्थैस्समदर्शिभिः । 3
न तत्र प्राणिनस्सन्ति येन यान्ति यमालयम् ।
अवश्यं हि कृतं कर्म भोक्तव्यमविचारतः । 4
तत्र ये शुभकर्माणस्सौम्यचित्ता दयान्विताः ।
ते नरा यान्ति सौम्येन पथा यान्ति निकेतनम् । 5
यः प्रयच्छति द्विजेन्द्राणामुपानत्काष्ठपादुके ।
स पराश्वेन महता सुखं यान्ति यमालयम् । 6
छत्रदानेन गच्छन्ति पथा सान्द्रेण देहिनः ।
दिव्यवस्त्रपरीधानाः यान्ति वस्त्रान् प्रदाय सः । 7
शिबिकाश्वेयभक्ष्यधानेनन्दुधेन सुखं व्रजेत् ।
शय्यासनप्रदानेन सुखं यान्ति सविभ्रमाः । 8
100 a आरामकर्तारश्छायासु शीतलासु सुखं व्रजेत् ।
यान्ति पुष्पविमानेन पुष्पाराम प्रदायिनः । 9

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

देवायतनकर्तारो यतीनामाश्रमस्य च ।
अनाथमण्डपानां च क्रीडामानग्रहोत्तमः ॥ 10
देवाग्निगुरुविप्राणां मातापित्रोश्च पूजकः ।
पूज्यमाना नरा यान्ति कामिकेन यथा सुखम् ॥ 11
द्योतयन्तो दिशस्सर्वाः यान्ति दीपप्रदायिनः ।
प्रतिश्राय प्रदानेन सुखं यान्ति गृहे स्वयम् ॥ 12
सर्वकामसमृद्धेन पथा गच्छति गोप्रदः ।
येऽन्नपानानि कुर्वन्ति ये तृष्णा यान्ति सत्पथा ॥ 13
आर्तौषधप्रदातारः सुखं यान्ति निरामयाः ।
विश्राम्यमाना गच्छन्ति गुरुशिश्रूषणे रताः ॥ 14
पादशौच प्रदानेन शीतलेन पथा व्रजेत् ।
पादाभ्यां गच्छ यः कुर्यादश्ववृत्तेन सो व्रजेत् ॥ 15
हेमरत्नप्रदानेन यान्ति दुर्गाणि दुस्तरम् ।
रथासुदुह दानेन दिव्ययानेन गच्छति ॥ 16
सर्वकामसमृद्धेन भूमिदानेन गच्छति ।
अन्नपानप्रदानेन पिबन्स्वादूंश्च गच्छति ॥ 17
इत्येवमादिभिर्दानैः सुखं यान्ति यमक्षयम् ।
स्वर्गे च विपुलान्भोगान् प्राप्नोति विविधान्नरः ॥ 18
सर्वेषामेव दानानामन्नदानं परं स्मृतम् ।
सर्वप्रीतिकरं दिव्यं बलपुष्टिविवर्धनम् ॥ 19

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

(ना)
अन्नदानसमं दानं त्रिषु लोकेषु विद्यते ।
अन्नाद्भवन्ति भूतानि तदभावे म्रियन्ति च । 20
101 रक्तमांसवसाशुक्लं क्रमादन्नात्प्रवर्धते ।
शुक्लाद्भवन्ति भूतानि तस्मादन्नमयं हि जगत् । 21
हेमरत्नाश्वनागेन्द्रनारीस्रक्चन्दनादिभिः ।
समस्तैरपि संप्राप्तैः नरमन्ते क्षुधार्दिताः । 22
गर्भस्था जायमानाश्च बालवृद्धाश्च मध्यमाः ।
आहारमभिकांक्षन्ते देवदानवतापसाः । 23
क्षुधा हि सर्वरोगाणां रोगश्श्रेष्ठतमस्स्मृतः ।
तस्माद्वै पथ्यलेपेन व्रतकाराः प्रकीर्तिताः । 24
नास्ति क्षुधासमं दुःखं नास्ति रोगः क्षुधासमः ।
नास्त्याहारसमं सौख्यं नास्ति क्रोधसमो रिपुः । 25
अत एव महत्पुण्यमन्नदानं प्रदानतः ।
यतः क्षुधाग्निसन्तप्ताः म्रियन्ते सर्वदेहिनः । 26
अन्नदः प्राणदः प्रोक्तः प्राणदश्चापि सर्वदः ।
तस्मादन्नप्रदानेन सर्वदानफलं लभेत् । 27
त्रिलोके यानि रत्नानि भोगाः स्त्री वाहनानि च ।
अन्नदानप्रदानेन इहामुत्र च तल्लभेत् । 28
यस्यान्नपानपुष्टाङ्गः कुरुते पुण्यसञ्चयम् ।
अन्नप्रदातुस्तस्यार्धं कर्तुश्चार्धं न संशयः । 29

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

धर्मार्थकाममोक्षाणां देहः परमसाधनम् ।
स्थितिस्तस्यान्नपानाभ्यामतस्तत्सर्वसाधनम् ॥ 30
अन्नं प्रजापतिस्साक्षादन्नं विष्णुश्शिवस्स्वयम् ।
तस्मादन्नसमं दानं न भूतो न भविष्यति ॥ 31
त्रयाणामेव लोकानामुदकं जीवनं स्मृतम् ।
पवित्रममृतं दिव्यं शुद्धं सर्वरसाश्रयम् ॥ 32
अन्नपानाश्वगोवस्त्रशय्याछत्रासनानि च ।
प्रेतलोके प्रस्थितस्य तान्यर्थौ च विशेषतः ॥ 33
101a एवं दानविशेषेण धर्मराजपुरं नरः ।
यस्माद्याति सुखेनैव तस्माद्धर्मं समाचरेत् ॥ 34
ये पुनः क्रूरकर्माणः पापा दानविवर्जिताः ।
ते घोरेण पथा यान्ति दक्षिणेन यमालयम् ॥ 35
षडशीतिसहस्राणि योजनानामतीत्य वै ।
वैवस्वतपुरं ज्ञेयं नानारूपं व्यवस्थितम् ॥ 36
समीपस्थमिवाभाति नराणां पुण्यकर्मणाम् ।
पापिनामपि दूरस्थं पथा रौद्रेण गच्छताम् ॥ 37
तीव्रकण्टकयुक्तेन शर्करानिचितेन च ।
क्षुरधारानिभैस्तीक्ष्णैः पाषाणैर्निशितेन च ॥ 38
क्वचित्पङ्केन महता दुरुत्तारैश्च पातकैः ।
लोहसूचिमुखैर्दर्भैः सच्छन्नेन पथा क्वचित् ॥ 39

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तटप्रपातविषमैः पर्वतैर्वृक्षसंकुलैः ।
प्रतप्ताङ्गारयुक्तेन यान्ति मार्गेण दुःखिताः । 40
कश्चिद्विषमगर्तैश्च कश्चिल्लोष्ठैश्च पिच्छलैः ।
सुतप्तवालुकाभिश्च तथा तीक्ष्णैश्च शङ्कुभिः । 41
अनेकशाखाविततैर्व्याप्तवंशस्तरवैः कश्चित् ।
कष्टेन तमसा मार्गमनालम्बेन कुत्रचित् । 42
अश्मशृङ्गाटकैस्तप्तैः कश्चिद्दावाग्निना पुनः ।
कश्चित्तप्तशिलाभिश्च कश्चिद्व्याप्तं हिमेन च । 43
कश्चिद्वालुकया व्याप्तमाकण्ठान्तप्रवेशया ।
कश्चिद्दुष्टाम्बुना व्याप्तं कश्चित्करीषवह्निना । 44
कश्चित्सिंहैर्मृगैर्व्याप्तैः दंशैः कीटैश्च दारुणैः ।
कश्चिन्महाजलूकाभिः कश्चिच्चाजगरैः पुनः । 45
102 मक्षिकाभिश्च रौद्राभिः कश्चित्सर्पैर्विषोल्बणैः ।
मत्तमातङ्गयूथैश्च [बलोत्कीलैश्च दारुणैः ।
कश्चिन्महाजलूकाभिः कश्चिच्चाजगरैः पुनः ]
बलोन्मत्तैः प्रमादिभिः । ।
पन्थानमुल्लिखद्भिश्च तीक्ष्णशृङ्गैर्महावृषैः । 46
महाशृङ्गैश्च महिषैरुष्ट्रैर्मत्तैश्च खादकैः ।
डाकिनीभिश्च रौद्राभिर्विकरालैश्च राक्षसैः । 47
व्याधिभिश्च महाघोरैः पीड्यमाना व्रजन्ति च ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

महाधूलिविमिश्रेण महाचण्डेन वायुना । 48
महापाषाणवर्षेण हन्यमाना निराश्रयाः ।
क्वचिद्विद्युत्प्रपातेन दार्यमाणा व्रजन्ति च । 49
महता बाणवर्षेण पूर्यमाणा रुदन्ति च ।
महामेघरवैर्घोरैर्वित्रास्यन्ति मुहुर्मुहुः । 50
निशितैर्लोहवर्षैश्च चूर्ण्यमानाश्च सर्वशः ।
महाक्षाराम्बुधाराभिस्सिच्यमाना व्रजन्ति च । 51
महाशीतेन मरुता रूक्षेण परुषेण च ।
समन्ताद्धन्यमानाश्च क्षिप्यन्ते स्म रुदन्ति च । 52
इत्थं मार्गेण रौद्रेण सहायरहितेन च ।
निरालम्बेन मार्गेण दुर्जनेन समन्ततः । 53
पि
अविश्रमेण महता निर्गतापाश्रयेण च ।
तमोरूपेण कल्पेन सर्वदुःखाश्रयेण च । 54
नीयन्ते देहिनस्सर्वे ये मूढाः पापकारिणः ।
यमदूतैर्महाघोरैर्यमाज्ञाकारिभिर्बलात् । 55
एकाकिनः पराधीनाः मित्रबन्धुविवर्जिताः ।
शोचन्ते स्वानि कर्माणि रोदन्ते च मुहुर्मुहुः । 56
102a प्रेतभूता विवस्त्राश्च शुष्ककण्ठोष्ठतालुकाः ।
कृशाङ्गा भीतभीताश्च दह्यमाना क्षुधाग्निना । 57
बद्धाश्शृङ्खलया केचित् उत्तानाः पादयोर्नराः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आकृष्यमाणास्ते चुष्यमाणा यमदूतैर्बलोद्धतैः । 58

उरसा लोमघोमरवाश्चान्ये घृष्यमाणा ~~कुहुकुहुः~~ सुदुःखिताः ।

केशपाशनिबद्धेन समाकृष्यन्ति रज्जुना । 59

ललाटे चाङ्कुशेनान्ये भिन्नाः कृष्यन्ति देहिनः ।

कुन्तानकण्टकपथा कश्चिदङ्गारवर्त्मना । 60

कश्चित्पश्चान्निबद्धाश्च उरसैश्च जठरैश्च प्रपीडिताः ।

निबद्धाश्शृङ्खलाभिश्च हस्तयोश्च सुरीयताः । 61

ग्रीवां पाशैर्निकृष्यन्तः प्रयान्त्येते सुदुःखिताः ।

जिह्वां शङ्कुप्रबन्धेन समाकृष्यन्ति रज्जसा । 62

[नानाद्रवेधरज्वाभिश्च सदाकृष्यन्ति नापरे]

कृरक्या मर्धचन्द्रेण क्षिप्यमाणा इतस्ततः ।

शिश्नेच वृषणे ~~च~~ बद्ध्वा नीयन्तेन्ये च रज्जुना । 63

नानाध्वपेधरज्वाद्भिः सदाकृष्यन्ति चापरे ।

भिन्नाः कपोलयो रज्वा कृष्यन्तस्य तदोष्ठयोः । 64

विभिन्नाश्चोदरे चान्ये तत्वशङ्खलयान्विताः ।

कृष्यन्ते कर्णयोश्चान्ये विभिन्नाश्चुबुके परे । 65

छिन्नाग्रे हस्तपादाश्च ~~छ~~ भिन्नकण्ठोष्ठनासिकाः ।

सन्छिन्नवृषणा शिश्ना वृषणाश्छिन्नभिन्नाङ्गसन्धयः । 66

प्रभिद्यमाना कुन्तैश्च भिद्यमानाश्च सायकैः ।

103 इतस्ततः प्रधावन्ति क्रन्दमाना निराश्रयाः । 67

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मुद्गरैर्लोहदण्डैश्च हन्यमाना मुहुर्मुहुः ।
कशैश्च विविधैर्घोरैर्ज्वलनाग्निसमप्रभैः । 68
भिण्डिपालैः प्रभिद्यन्ते स्रवन्तः पूयशोणितम् ।
कर्मदाः क्रमदष्टाश्च नीयन्ते विवशा नराः । 69
याचमानाश्च सलिलमन्नं चापि बुभुक्षिताः ।
छायां प्रार्थयमानाश्च शीतार्ताश्चानलं पुनः । 70
दानहीनाः प्रयान्त्येवं प्रार्थयन्तो सुखं नराः ।
गृहीतदानपाथेयाः सुखं यान्ति यमालयम् । 71
एवं वदन्ति कष्टेन प्राप्ताः प्रेतपुरं नराः ।
यदा प्रज्ञापिता दूतैर्निवेश्यन्ते यमाग्रतः । 72
तत्र ये शुभकर्माणः तान्धर्मान्ह्वयते यमः ।
स्वागतासनदानेन पाद्यार्घ्येण प्रियेण च । 73
धन्या यूयं महात्मानस्स्वात्मनो हितकारिणः ।
येन दिव्यसुखार्थाय भवद्भिस्सुकृतं कृतम् । 74
इदं विमानमारुह्य दिव्यस्त्रीभोगभूषितम् ।
स्वर्गं गच्छध्वमतुलं सर्वकामसमन्वितम् । 75
(नन्ते)
तत्र भुक्त्वा महाभोगा दन्ते पुण्यस्य संक्षयात् ।
यत्किञ्चिदल्पमतुलं पुनस्तदिह भुज्यते । 76
तेनापि धर्मराजेन नराः पुण्यानुभावतः ।
पश्यन्ति सौम्यवदनं मित्रभूतमिवात्मनः । 77

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ये पुनः क्रूरकर्माणः ते पश्यन्ति भयानकम् ।

103'a पापानष्टेन्द्रनयना विपरीतात्मकुबुद्धयः । 78

दंष्ट्राकरालवदनं भ्रुकुटीकुटिलेक्षणम् ।

ऊर्ध्वकेशारुणाश्मश्रु प्रस्फुरद्वृत्तवाननम् । 79

अष्टादशभुजम्मूर्ध्वं नीलाञ्जनघनोपमम् ।

सर्वायुधोद्यतकरं यमदण्डेन तर्जितम् । 80

महामहिषमारूढं दीप्ताग्निसमलोचनम् ।

रक्तमाल्याम्बरधरं महामेरुमिवोच्छ्रितम् । 81

प्रशयाम्बुदनिर्घोषं निदन्तमिव सागरम् ।

ग्रसन्तमिव त्रैलोक्यमुद्गिरन्तमिवानलम् । 82

मृत्युं च तत्समीपस्थं कालानलसमप्रभम् ।

कालं चाञ्जनसंकाशं कृतान्तं च भयानकम् । 83

मरीं चोग्रां महामारीं कालरात्रिं च दारुणाम् ।

विविधा व्याधयः कष्टाः नानारूपा भयावहाः । 84

शक्तिशूलाङ्कुशधराः चक्रपाशासिधारिणः ।

वज्रदण्डधरा रौद्राः क्षुरतूर्णधनुर्धराः । 85

असंख्याता महावीर्याः क्रूराश्चाञ्जनसन्निभाः ।

सर्वायुधोद्यतकराः यमदूता भयानकाः । 86

अनेन परिहारेण संवृतं घोरदर्शनम् ।

धर्मं पश्यन्ति पापिष्ठाश्चित्रगुप्तं च भीषणम् । 87

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

निर्भर्त्सयति चात्यर्थं यमस्तान्पापकारिणः ।
चित्रगुप्तश्च भगवान् धर्मवाक्यैः प्रबोधयेत् । 188
भो भो दुष्कृतकर्माणः परद्रव्यापहारिणः ।
104 गर्विता रूपवीर्येण परदाराभिमर्शकाः । 189
यत्स्वयं क्रियते कर्म तत्स्वयं भुज्यते पुनः ।
तत्किन्त्वात्मोप(भूता)भोगार्थं भवद्भिर्दुष्कृतं कृतम् । 190
इदानीं किं प्रतप्यध्वं पीड्यमानास्स्वकर्मभिः ।
भुञ्जध्वं स्वानि दुःखानि नात्र दोषो न कस्यचित् । 191
ये ते च पृथिवीपालाः संप्राप्ता मत्समीपतः ।
स्वकीयैः कर्मभिर्घोरैः दुष्प्रज्ञा बलगर्विताः । 192
भो भो नृपा दुराचाराः प्रजाविध्वंसकारिणः ।
अल्पकालस्य राज्यस्य कृते किं दुष्कृतं कृतम् । 193
राज्यलोभेन मोहेन बलादन्यायतः प्रजाः ।
यद्दण्डिताः फलं तस्य भुञ्जध्वमधुना नृपाः । 194
क्व तद्राज्यं कलत्रं यदर्थमशुभं कृतम् ।
तत्सर्वं संपरित्यज्य यूथ(यं)मेकाकिनस्स्थिताः । 195
पश्यामस्तत्फलं सर्वं येन विध्वंसिताः प्रजाः ।
मद्दूतैर्हन्यमानानामधुना कीदृशं भवेत् । 196
एवं बहुविधैर्वाक्यैः उपालब्धा यमेन च ।
शोचन्ति स्वानि कर्माणि तूष्णीं तिष्ठन्ति पार्थिवाः । 197

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

इति धर्मं समादिश्य नृपाणां धर्मराट् पुनः ।
तातः पापविशुद्ध्यर्थं इदं वचनमब्रवीत् ॥ 98
भो भो चण्डा महाचण्डाः गृहीत्वा नृपतीनिमान् ।
विशोधयध्वं पापेभ्यः क्रमेण नरकेषु च ॥ 99
ततश्शीघ्रं समुत्थाय नृपान्संगृह्य पादयोः ।
भ्रामयित्वाति वेगेन प्रक्षिप्योर्ध्वं प्रगृह्य च ॥ 100
सर्वप्राणेन महता सुप्रतप्ते शिलातले ।
आस्फारयन्ति तरसा वज्रेणेव महाद्रुमम् ॥ 101
ततस्सरक्तस्रोतांसि नृपते जर्झरीकृताः (झ) ।
104 a ~~[illegible]~~ निस्संज्ञश्च तथा देही निश्चेष्टाश्च प्रजायते ॥ 102
ततस्स वायुना स्पृष्टश्शनैरुच्छ्वसते पुनः ।
ततः पापविशुद्ध्यर्थं क्षिपन्ति नरकार्णवे ॥ 103
अष्टाविंशतिरेवाधः क्षिते नरककोटयः ।
यमस्त्वतस्या घो घोरे विषमे तमसि स्थिताः ॥ 104
पाद्यान्तरे सप्तमस्य तदन्ते घोरतमसि स्थिताः ।
घोराख्या प्रथमा कोटिस्सुघोरा तदधस्थिता ॥ 105
अथ घोर महाघोरा घोररूपा च पञ्चमे (मी) ।
षष्ठी तरङ्गतारारख्या सप्तमी च भयानका ॥ 106
पद्मा पद्मावती भीमा भीमा भीषण नायका (स्ना) ।
कराला विकराला च वज्रा विंशतिकास्स्मृताः ॥ 107

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

त्रिकोणा पञ्चकोणा च सुदीर्घा परिवर्तुला ।
सप्तभूमाष्टभौमा च दीप्ता मायेति चाष्टमी ॥ 108
तासामनन्तसमुद्दिष्टा घोरा नरककोटयः ।
अष्टाविंशतिरेवैताः पापानां यातनात्मकाः ॥ 109
आसां क्रमेण विज्ञेयाः पञ्च पञ्चैव नायकाः ।
प्रत्येकं सर्वकोटीनां नामतस्तान्निबोधत ॥ 110
रौरवः प्रथमस्तेषां रुदन्ति यत्र देहिनः ।
महारौरवपीडाभिर्महान्तोऽपि रुदन्ति च ॥ 111
तप्तशीतस्तथा चोष्णं पञ्चाद्या नायकस्मृताः ।
सुघोरस्सुमहातीक्ष्णः पद्मसञ्जीवनश्शठः ॥ 112
महानासो विलोमश्च सुरहीमश्च कङ्कटः ।
तीव्रवेगः करालश्च विकरालः प्रकम्पनः ॥ 113
महापद्मस्सुवक्त्रश्च कालचक्रः प्रमर्दनः ।
सूचीमुखस्सुनेमिश्च खादकः सुप्रपीडिताः ॥ 114
105 कुम्भीपाकस्सुपाकश्च क्रकचश्चातिदारुणः ।
अङ्गारराशिभवनमसृक्पूयह्रदस्तथा ॥ 115
तीक्ष्णायस्तुण्डशकुनी महासंवर्तकः क्रतुः ।
तप्तदन्तं पङ्कलेपं पूतिमांसो द्रवत्त्रपुः ॥ 116
उच्छ्वासश्च निरुच्छ्वासः सुदीर्घः कूटशाल्मलिः ।
अरिष्टस्सुमहानादः प्रवाहस्सुप्रवाहिनः ॥ 117

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ऋक्षमेषवृषश्शल्यं व्याघ्रसिंहगजाननः ।
अश्वसूकरराजान वृषमेषवृकाननाः ॥ ११८
ग्राहकुंभिनरकास्सर्पकूर्मश्च वायसाः ।
गृध्रो ऊलूकजश्लूकाश्च शार्दूलकपिकुक्कुटाः ॥ ११९
गण्डकाश्वादिवक्त्रश्च (न्ध) रक्ताक्षः पूतमृत्तिकाः ।
कर्णधूमस्तुषाग्निश्च क्रिमीणां नन्चयस्तथा ॥ १२०
अमेध्यश्च प्रतीकारो रुधिरांधः प्रपूजनम् ।
लालाभिक्षात्मभिक्षान्य सर्वभक्षास्तु दारुणः ॥ १२१
संकटास्तु विशालश्च विकटः कटपूतनः ।
अम्बरीषः कटाहश्च कष्टा वैतरणी नदी ॥ १२२
सुतप्तलोहशयनमेकपादः स्तुपूरणः ।
अपि तालवनं घोरं गतिभङ्गः प्रपीडनम् ॥ १२३
तिलातनीक्षुयन्त्राणि कूटवेषः प्रमर्दनः ।
महाचूर्णा मदूर्णा च तप्तलोहमया शिला ॥ १२४
सर्वतःक्षुरसधाराव्यस्तथायमलगर्वितः (स) ।
यूत्र (मूत्र) निष्ठान्धा कूपाश्च क्षारकूपाश्च शातनाः ॥ १२५
मुसलोलूखलं यन्त्रं शिलाशकटलाङ्गलः ।
तालपत्रासिगहनं महामशकमण्डपम् ॥ १२६
सम्मोहनो हस्तिभंगः तप्तशूलमयोगुडः (श) ।
बहुदुःख महादुःखं कश्मलं शामलं मलम् ॥ १२७

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

105a हालाहलो निरूपश्च स्वरूपश्च यमानुगः |
एकपादस्त्रिपादश्च तीव्रश्चापि चिरन्तमः || 128
अष्टाविंशतिरेवैते क्रमशः पञ्चकास्स्मृताः |
कोटीनामनुपूर्वेण पञ्च पञ्चैव नायकाः || 129
कारवाद्यमपीच्यन्तं नरकाणां शतं स्मृतम् |
चत्वारिंशत्समधिकं महानरकमण्डपम् || 130
येषु पापाः प्रपीड्यन्ते नराः कर्मानुरूपतः |
यातनाभिर्विचित्राभिः आत्मकर्मक्षयाद्भृशम् || 131
आमलक्षयाद्यथा दग्धा ध्मायन्ति धातवः |
तथा पापक्षयात्पापाः शोध्यन्ते नरकाग्निषु || 132
सुगाढं हस्तयोर्बद्ध्वा तप्तशृङ्खलया नराः |
महावृक्षाग्रशाखासु लम्ब्यन्ते यमकिङ्करैः || 133
ततस्ते सर्वयत्नेन क्षिप्ताः कोड्यन्ति किङ्करैः |
दार्यन्ताश्चाति वेगेन वस्त्रं यान्ति योजनम् || 134
अन्तरिक्षस्थितानां तु लोहभारशतं ततः |
पादयोर्बध्यते तेषां यमदूतैर्महाबलैः || 135
तेन भारेण महता * भृशमायासिता नराः |
ध्यायन्ति स्वानि कर्माणि तूष्णीं तिष्ठन्ति निश्चलाः || 136
ततः कठोरग्निवर्णैः लोहदण्डैस्सकण्टकैः |
हन्यन्ते किङ्करैर्घोरैः समन्तात्पापकारिणः || 137

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ततः क्षणेन दीप्तेन नखैरपि विशेषतः ।
समन्ततः प्रलिप्यन्ते ताम्रेण च पुनः पुनः । 138
द्रुतेनात्यन्तलिप्यन्ते सकृताङ्गाः झर्झरीकृताः ।
पुनर्विदार्य चाङ्गानि शिरसः प्रभृति क्रमात् । 139
106 वार्ताकवत्प्रपच्यन्ते तप्ततैले कटाहके ।
विष्ठापूर्णे ततः कूपे क्रिमीणां निचये तथा । 140
मेदोसृक्पूयपूर्णायां नद्यां प्रक्षिप्यन्ते पुनः ।
भक्ष्यन्ते क्रिमिभिस्तीक्ष्णैर्लोहतुण्डैश्च वायसैः । 141
श्वभिर्दंशैर्वृकै रौद्रैः व्याघ्रैश्च विकृताननैः ।
पच्यन्ते मत्स्यवच्चापि प्रदीप्ताङ्गारराशिषु । 142
(प्रो)
प्रोताः शूलेषु तीक्ष्णेषु नराः पापेन कर्मणा ।
तैलपिण्डैरिवाक्रम्य एककर्मभिरात्मजैः । 143
तिलवत्पच्यते घोरे चक्राख्ये नरके नराः ।
पच्यन्ते चाग्नितप्तेषु लोहभाण्डेष्वनेकधा । 144
तैलपूर्णकटाहेषु सुतप्तेषु पुनः पुनः ।
बहुशोत्पाट्यते जिह्वा येन सत्याप्रियवादिनः । 145
सुदंशेन सुतप्तेन प्रपीड्योरसि पातितः ।
मध्यागमप्रवक्तुश्च जिह्वास्याच्चाति निर्गता । 146
जिह्वा क्रोशार्द्ध विस्तीर्णा हलैस्तीक्ष्णैः प्रपीड्यते ।
निर्भर्त्सयन्ति ये क्रूरा मातरं पितरं गुरुम् । 147

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तेषां वक्त्रं जलूकाभिः मुखमापूर्य सिच्यते ।
ततः क्षारेण दीप्तेन ताम्रेण त्रपुणा पुनः । 148
द्रुतानापूर्य तेत्यर्थं तप्ततैलेन तन्मुखम् ।
इतस्ततः पुनर्वक्त्रं भृशमापूर्य हन्यते । 149
क्षिपिष्टाभिः क्रिमिमिश्राभिः सोपानच्छरणैर्नराः ।
परिव्यजन्ति चात्युग्रां प्रदीप्तां लोहशाल्मलीम् । 150
हन्यन्ते पृष्ठदेशेन पुरुभिर्मिर्महाघ्नैः ।
दन्तुरेणातिघोरेण~~करिघोरेण~~ कर्कशेन बलीयसा । 151
106 a शिरः प्रभृति पाठ्यन्ते घोरैः कर्मभिरात्मजैः ।
खादन्ति च नृमांसानि पिबन्तः शोणितं स्वकम् । 152
अन्नपानमदत्तं वै मूढैर्नाप्यनुमोदितम् ।
इक्षुवत्सं प्रपीड्यन्ते झर्झरीकृत्य मुद्गरैः । 153
असितालवने घोरे छिद्यन्ते खण्डखण्डशः ।
सूचिनिर्भिन्नसर्वाङ्गाः तप्तशूलप्ररोपिताः । 154
सञ्चाल्यमाना विवशा क्लिश्यन्ते नमयन्ति च ।
देहदुत्पद्यते मांसं भिद्यन्तेस्थीनि मुद्गरैः । 155
हर्षिराकृष्यते तूर्णं यमदूतैर्बलोत्कटैः ।
निरुच्छ्वासे निरुच्छ्वासास्तिष्ठन्ति नरके चिरम् । 156
उच्छ्वसन्ति दुरुच्छ्वासे लडसे वालुकावृताः ।
काष्ठरे रोदद्भनाश्च पीड्यन्ते विविधैर्वधैः । 157

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

महारौरवपीडाभिर्महान्तोऽपि रुदन्ति च ।
पादे चान्यो गुदे चान्यौ व्रणौः पाण्योश्चोरसि मस्तके । 158
निखन्यन्ते घनास्तीक्ष्णाः प्रतप्ता लोहशङ्कवः ।
सुतप्तवालुकाभिश्च प्रबोध्यन्ते मुहुर्मुहुः । 159
जतुपङ्के भृशं तप्ते क्षेत्राः क्रन्दन्ति विविस्वरम् ।
तेन तेनैव रूपेण शास्यन्ति पारदारिकाः । 160
गाढमालिङ्गते नारी ज्वलन्ती लोहनिर्मिता ।
पूर्वाकाराश्च पुरुषाः प्रज्वलन्ति ततस्ततः । 161
दुश्चारिणीं स्त्रियं गाढमालिङ्गन्ति वदन्ति च ।
किं प्रधावन्ति वेगेन न ते मोक्षोऽस्ति सांप्रतम् । 162
लालितस्ते यथा भर्ता पापं भुङ्क्ष्व तथा पुनः ।
107 लोहकुम्भे विनिक्षिप्ता स्सापिधानैश्शनैश्शनैः । 163
मृद्वग्निना प्रपच्यन्ते स्वपापैरेव मानवाः ।
क्षोद्यन्ते क्रूरखलेजरन्त्रं प्रपीड्यन्ते शिलासु च । 164
क्षिप्यन्ते चान्धकूपेषु दश्यन्ते भ्रमरैर्भृशम् ।
कृमिभिर्भिन्नसर्वाङ्गाश्शतशो झर्झरीकृताः । 165
सुतीक्ष्णक्षारकूपेषु क्षिप्यन्ते तदनन्तरम् ।
महाज्वाले च नरके पापाढ्या क्षिप्यते भृशम् । 166
इतस्ततः प्रधावन्ति दह्यमानास्तदर्चिषा ।
पृष्ठेनानीय जङ्घे द्वे विन्यस्ते स्कन्धयोरपि । 167

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तयोर्मध्येन चाकृष्य बाहुपृष्ठेन मध्यतः ।
बद्ध्वापरस्परं सर्वं सुदृढं पापरज्जुभिः । 168
पिण्डबद्ध्वा धशल्येन भ्रमरास्तीक्ष्णलोहजाः ।
मानिनां क्रोधिनां चैव तस्कराणां च दारुणाः । 169
पिण्डबद्धस्मृतो यम्ये महाज्वाले च यातनाः ।
रज्जुभिर्वेष्टिताङ्गाश्च प्रलिप्तकर्दमेन च । 170
करीषतुषवह्नौ च पच्यन्ते न म्रियन्ति च ।
सुतीक्ष्णक्षारतोयेन शर्करासु च . . . 171
आपापसंक्षयात्पापा मुच्यन्ते चन्दना यथा ।
शरीराभ्यन्तरगतैः प्रभूतैः क्रिमिभिर्नराः । 172
[redacted] भक्ष्यन्ते तीक्ष्णवदनैः आदेहप्रक्षया भृशम् ।
क्रिमीणां निचये क्षिप्ताः वृतिमांसस्य राशिषु । 173
तिष्ठन्त्युद्विग्नहृदयाः पर्वतोभ्यञ्च पीडिताः ।
सुतप्तवज्रवेगेन शरीरमनुलिप्यते । 174
अधोमुखोर्ध्वपादाश्च धृतास्तप्यन्ति वह्निना ।

107a वदनान्तः प्रविन्यस्तं सुप्रतप्तमयोगुडकम् । 175
खादन्ति स्म पराधीनाः हन्यमानाश्च मुद्गरैः ।
ये शिवायतनाराम वापीकूप मठादिकान् . . णान् । 176
अभिद्रवन्ति पापिष्ठा ये तत्र निवसन्ति च ।
व्यायामो [illegible]र्तनाभ्यङ्गं स्नानपानादि भोजनम् । 177

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

क्रीडनं मैथुनं द्यूतमाचरन्ति रमन्ति च ।
ते वध्यैर्विविधैर्घोरैः इक्षुयन्त्रादिपीडनैः । 178
निरयाग्निषु पच्यन्ते यावदाचन्द्रतारकम् ।
ये शृण्वन्ति गुरोर्निन्दां तेषां कर्णे प्रपूर्यते । 179
अग्निवर्णैरयःकीलैः ततस्ताम्रादिभिर्घनैः ।
त्रपुसीसारकूटाद्यैः क्षारेण जातुना पुनः । 180
सुतप्ततीक्ष्णशैलेन वज्रलेपेन वा ततः ।
क्रमादापूर्यतः कर्णौ नरकेषु च यातनाः । 181
अनुक्रमेण सर्वेषु भ्रमन्त्येते समन्ततः ।
सर्वेन्द्रियाणामप्येवं क्रमात्पापेन यातनाः । 182
भवन्ति घोराः प्रत्येकं शरीरे तत्कृतेन च ।
स्पर्शलोभेन ये मूढाः संस्पृशन्ति परस्त्रियम् । 183
एतेषामग्निवर्णाभिस्सूचीभिः पूर्यते मुखम् ।
ततः क्षारादिभिस्सर्वैः शरीरमनुलिप्यते । 184
यातनाश्च महाकष्टाः सर्वेषु नरकेषु च ।
गुरोः कुर्वन्ति भ्रुकुटिं क्रूरं चक्षुश्च ये नराः । 185
परदारांश्च पश्यन्ति लुब्धास्स्निग्धेन चक्षुषा ।
108 सूचिभिरग्निवर्णाभिस्तेषां नेत्रेषु पूर्यते । 186
क्षाराद्यैश्च क्रमात्सर्वे देहे सर्वाश्च यातनाः ।
देवाग्निगुरुविप्राणामनिवेद्य प्रभुञ्जतः । 187

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

लोहकीलशतैस्तप्तैर्जिह्वास्यं च प्रपूर्यते ।
ततः क्षारेण लिप्तेन तैलताम्रादिभिः क्रमात् । 188
शरीरेषु महाघोराश्चित्रा नरकयातनाः ।
ये शिवारामपुष्पाणि लोभात्संगृह्य पाणिना । 189
जिघ्रन्ति गन्धलोभेन शिरसा धारयन्ति वा ।
प्रपूर्यते शिरस्तेषां सुतप्तैर्लोहशङ्कुभिः । 190
नासिकाश्चापि बहुशः ततः क्षारादिभिः पुनः ।
ये निन्दन्ति महात्मानमाचार्यं धर्मदेशिकम् । 191
शिवभक्तांश्च ये मूढा शिवधर्मं च शासनम् ।
पृथुलोरसि कर्णे च जिह्वायां दन्तसन्धिषु । 192
तालुन्योष्ठे च नासायां मूर्ध्नि सर्वाङ्गसन्धिषु ।
अग्निवर्णैस्सुसंतप्तैस्त्रिशिखैर्लोहशङ्कुभिः । 193
आलोड्यन्ते सु बहुशस्स्थानेष्वेतेषु मुद्गरैः ।
ततो महाग्नितप्तेन ताम्रेण त्रपुणा पुनः । 194
तप्ततैलादिभिस्सर्वैः आपूर्यन्ते समन्ततः ।
यातनाश्च महाचित्रा ~~स्स~~शरीरस्यापि सर्वतः । 195
निश्शेषनरकेष्वेवं भवन्ति क्रमशः पुनः ।
ये गृह्णन्ति परद्रव्यं पद्भ्यां विप्रं स्पृशन्ति च । 196
शिवोपकरणं गां च ज्ञानं च लिखितं क्वचित् ।
हस्तपादौ घनैस्तेषां मुद्गरैर्हन्यते ततः । 197

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

108a क्षारताम्रादिभिस्तप्तैर्दह्यन्ते बहुशः पुनः । 
नरकेषु च सर्वेषु विचित्रा देहयातनाः । 198
भवन्ति बहुशः कष्टाः नराणां पापसंभवाः ।
शिवायतनपर्यन्ते शिवारामे च कुत्रचित् । 199
समुद्धयन्ति ये पापाः पुरीषं मूत्रमेव च ।
तेषां शिश्नं सवृषणं चूर्ण्यन्ते लोहमुद्गरैः । 200
सूचीभि(भी)रग्निपूर्णाभिस्ततश्चापूर्यते पुनः ।
अथ शङ्कुश्च सुमहान् अग्निवर्णस्सकण्टकः । 201
आलोड्यन्ते गुदे तेषां यावन्मूर्ध्नि विनिर्गतः ।
ततः क्षारेण महता ताम्रेण त्रपुना पुनः । 202
द्रुतेनापूर्यते गाढं गुदं शिश्नं च देहिनाम् ।
मनसा चेन्द्रियैश्चैव यस्माद्दुःखं प्रवर्तकः । 203
दुःखेन जायते तस्मात् नरस्तु सुखदुःखतः ।
धने सत्यपि ये दानं न प्रयच्छन्ति तृष्णया । 204
अतिथिं चाव मन्यन्ते कालप्राप्तं गृहाश्रमे ।
तैर्लोहतोरणे स्त्वा हस्तपादा समन्विताः । 205
निस्तारिताङ्गा शुष्यन्ति नराः पापप्रवर्तकाः ।
हस्तपादललाटेषु ज्वलता लोहशङ्कुभिः । 206
नित्यं च विवृतं वक्त्रं कीलकैस्तथ ताडितम् ।
कृमिभिः पाणिभिश्चोग्रैः लोहतुण्डैश्च वायसैः । 207

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

उपद्रवैर्बहुविधैः मुखं तत्र प्रतिपीड्यते ।
अधोमुखाः प्रबद्धाश्च भारशृङ्खलया पुनः । 208
तिष्ठन्ते लम्बमानाश्च लोहभारं सु.. तुकम् ।
109 शिश्नेन वृषणे तस्य लोहभारद्वयं पुनः । 209
तिष्ठन्ति लम्बमानश्च बाहुभ्यां च चतुर्गुणम् ।
ततस्त्वङ्मांसमुद्धृत्य शरीरादेहि . . . . । 210
खादितं हीयते तेषां सूच्यग्रेण तु शोधितम् ।
यथा निर्मांसतां प्राप्ताः कालेन बहुना नराः । 211
ततः क्षारेण दीप्तेन तच्छरीरं प्रलिप्यते ।
क्लिश्यन्ते वर्षधाराभिः शोष्यन्ते वायुना पुनः । 212
शुष्कान् सिञ्चति तैलेन सुतप्तेन समन्ततः ।
पच्यन्ते वह्निना भूयो दूरस्थेन शनैश्शनैः । 213
एवाभिर्यातनाभिश्च पीड्यन्ते क्रमशः पुनः ।
भृशं बुभुक्षया पीड्यां कष्टां यान्ति पिपासया । 214
उष्णेनातिशीतेन पापानां स्मरणेन च ।
एवमाद्या महाघोराः यातनाः पापकारिणाम् । 215
एकैकनरके ज्ञेया शतशोऽथ सहस्रशः ।
प्रत्येकं यातनाश्चित्राः सर्वेषु नरकेषु च । 216
तस्माद्वर्षशतेनापि सर्वान्वक्तुं समुत्सहे ।
इति चित्रैर्महाघोरैस्तस्थाप्यमानाः स्वकर्मभिः । 217

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

म्रियन्ते नैव पापिष्ठाः यावत्पापस्य संक्षयः ।
तत्रान्याः यातनाः कष्टाः विविधाः पापकारिणाम् । 218
इह घोरातिघोराख्याः कल्पानलसमप्रभाः ।
श्रुत्वैव तावतस्तूर्णं म्रियन्ते पापिनो नराः । 219
ततस्तेनात्र कथिताः पापैः द्रक्ष्यन्ति वा स्वयम् ।
109a पुत्रमित्रकलत्रार्थं यद् पुण्यं कृतं त्वया । 220
एकाकी दह्यते तेन नात्र पश्यसि तानि च ।
आत्मनैव कृतं पापं भोक्तव्यं ध्रुवमात्मना । 221
तत्कीर्तिमानधूर्तार्थं मूढ पापं ~~त्वया~~ कृतं त्वया ।
एवं दूतै रुपालब्धास्तान् पृच्छन्ति पुनः पुनः । 222
कियन्तं केन पापेन कालमत्रासते नराः ।
देवद्रव्यविनाशेन गुरुद्रोहादिकर्मभिः । 223
क्रमात्सर्वेषु पच्यन्ते नरकेषु न संशयः ।
महापातकिनश्चापि सर्वेषु नरकेषु च । 224
आचन्द्रतारकं यावत् पच्यन्ते विविधैर्वधैः ।
तथा पातकिनस्सर्वे निरयार्णवरूपिषु । 225
चतुर्दशसु पच्यन्ते कल्पार्धं विविधैर्वधैः ।
उपपातकिनश्चापि तदर्धं कालमासते । 226
शेषैः पापैः तदर्धं च कालं चापि तथाविधम् ।
तस्मात्पापं न कुर्वीत चञ्चले जीविते सति । 227

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पापेष्वेवं ध्रुवं यान्ति नरकेषु नरास्स्वयम् ।
यः करोति नरः पापं तस्यात्मा ध्रुवमप्रियः । 228
पापस्य हि फलं दुःखं तद्भोक्तव्यं तदात्मना ।
कथं ते पापनिरताः नरा रात्रिषु शेरते । 229
जन्मान्तरगता येषां घोरा नरकयातनाः ।
एवं क्लिष्टा विशिष्टाश्च नावशेषेण कर्मण । 230
ततः क्षितिं समासाद्य पुनर्जायन्ति देहिनः ।
स्थावरा विविधाकारा वृक्षा गुल्मादिभेदतः । 231
तत्रानुभूय दुःखानि जायन्ते कीटयोनिषु ।
निष्क्रान्ताः कीटयोनिभ्यः क्रमाज्जायन्ति पक्षिणः । 232
110 संक्लेषा . . . . द्विभ्यः भवन्ति मृगयोनिषु ।
मृगदुःखमतिक्रम्य जायन्ते पशुयोनिषु । 233
क्रमाद्गो योनिमासाद्य पुनर्जायन्ति मानवाः ।
एवं योनिषु सर्वासु परिक्रम्य क्रमेण तु । 234
कालान्तरवशाद्यान्ति मानुष्यमतिदुर्लभम् ।
. . . णापि मानुष्यं प्राप्यते पुण्यगौरवात् । 235
विचित्रा गतयः प्रोक्ताः कर्मणां गुरुलाघवात् ।
मानुष्यं यस्समासाद्य स्वर्गमोक्षप्रसाधकम् । 236
तयोर्न साधयत्येकं स मृतस्तप्यते तथा ।
देवासुराणां सर्वेषां मानुष्यमतिदुर्लभम् । 237

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तत्सं प्राप्य तथा कुर्या न्नगन्नरकं यथा ।
स्वर्गापवर्गलाभाय यदि नास्ति समुद्यमः । 238
सर्वस्य मूलमानुष्यं तद्यत्नादनुपालयेत् ।
धर्ममूलेन मानुष्यं लब्ध्वा सर्वार्थसाधकम् । 239
यदि लाभाय यत्नस्ते मूलं रक्षस्व यत्नतः ।
मानुष्येत्वेपि विप्रत्वं संप्राप्यातीव दुर्लभम् । 240
नरकोत्वात्मनश्श्रेयः कोन्यस्तस्माद्चेतसः ।
सर्वेषामेव देहानामयं देहः परस्स्मृतः । 241
भोगभूमिस्स्मृतस्स्वर्गः कर्मभूमिरियं मता ।
110a इह या क्रियते कर्म स्वर्गे तदुपभोज्यते । 242
यावत्स्वस्थशरीरत्वं तावद्धर्मं समाचरेत् ।
अस्वस्थयो हितोप्ययं न किञ्चित्कर्तुमुत्सहेत् । 243
अध्रुवेण शरीरेण ध्रुवं येन प्रसाधयेत् ।
ध्रुवं तस्य परिभ्रष्टमध्रुवं नष्टमेव च । 244
आयुषः खण्डखण्डानि निपतन्ति तवाग्रतः ।
अहोरात्रोपदेशेन किमर्थं नावबुध्यसे । 245
न ज्ञायते नरैर्मृत्युः कदा कस्य भविष्यति ।
आकस्मिकेऽह्नि मरणे धृतिं विन्देत कस्तदा । 246
परित्यज्य यथा सर्वमेकाकी यास्यति ध्रुवम् ।
न ददासि कदा कस्मात्पाथेयार्थमिदं धनम् । 247

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

गृहीतवान्नपाथेयस्सुखं यान्ति यमाध्वनि ।
अन्यथा दुःखिनो यान्ति पाथेयरहिताः पथि । 248
येषां द्विजेन्द्र वाहित्री पूर्णपापं हि गच्छति ।
स्वर्गदेशस्य पुरतस्तेषां लाभः पदेपदे । 249
इति ज्ञात्वा नरः पुण्यं कुर्यात्पापं च वर्जयेत् ।
पुण्येन याति देवत्वमपुण्यं नरकं व्रजेत् । 250
ये मनागपि देवेशं प्रपन्नाश्शरणं शिवम् ।
तेपि घोरान्न पश्यन्ति यमस्य वदनं नराः । 251
किन्तु पापैर्महाघोरैः किञ्चित्कालं शिवाज्ञया ।
प्रेतराजान्ततो यान्ति पश्चाच्छिवपुरे वसन् । 252
ये पुनस्सर्वभावेन प्रतिपन्ना महेश्वरम् ।
न ते पापेन लिप्यन्ते पद्मपत्रमिवाम्भसा ।
तस्माद्विवर्धयेद्भक्तिमीश्वरे सततं बुधाः । 253
तन्माहात्म्यविचारेण भवदोषविरागतः ।

॥ इति श्रीशिवधर्मोत्तरे नरक
111 विशेषन्नाम सप्तमोध्यायः ॥

श्री साम्बसदाशिवाय
परब्रह्मणे नमः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

श्री
॥ श्रीः ॥

## ॥ अथ अष्टमोऽध्यायः ॥

अथ नारकिणां पुंसामधर्मादेव केवलम् ।
क्षणमात्रेण भूतेभ्यः शरीरमुपपद्यते । 1
तत्तद्धर्मेण चैकेन देवानां चोपपादितम् ।
सद्यः प्रजायते दिव्यं शरीरं भूतसारतः । 2
कर्मणा व्यतिमिश्रेण यच्छरीरमिहात्मनः ।
तद्भूतपरिणामेन विज्ञातं हि चतुर्विधम् । 3
उद्भिदा स्थावरा ज्ञेयास्तृणगुल्मादिरूपिणः ।
क्रिमिकीटपतङ्गाद्याः स्वेदजा नामदेहिनः । 4
(स्स)
अण्डजाः पक्षिणस्सर्पाः नक्रमत्स्यास्सु कच्छपाः ।
जरायुजाश्च विज्ञेया मानुषास्सचतुष्पदाः । 5
तत्र सिक्ता जलैर्भूमेरन्तरूष्मापिताः पुनः ।
दह्यमानासु ~~बीजत्वं~~ बीजत्वं वायुना खे प्रपद्यते । 6
ततस्सर्वाणि बीजानि संसिक्तान्यंभसा पुनः ।
उच्छूनतां मृदुत्वं च मूलभावं व्रजन्ति च । 7
तन्मूलादङ्कुरोत्पत्तिरङ्कुरात्पर्णसंभवः ।
पर्णान्नालं तथा काण्डं काण्डाच्च प्रसवं पुनः । 8
क्षीरा
प्रसवात्पुनः क्षीरं ~~[struck]~~ तण्डुकसंभवः ।
तण्डुलाश्च यदा पाकं व्रजन्त्योषधयस्तथा । 9

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यवाद्या इक्षुलिपर्यन्ता भेदास्सप्तदशास्स्मृताः ।
औषध्यः फलपाकान्ताः शेषाः क्षुद्राः प्रकीर्तिताः । 10
एवं नानामतानाञ्च शनैरुत्पूय संस्कृतैः ।
मुसलोलूखलैः यन्त्रा ~~न्त्रैः~~ स्स्थाल्यामुदकवह्निभिः । 11
षड्विधाहारभेदेन परिणामं व्रजन्ति च ।
अन्योन्यरससंयोगादनेकस्वादुतां गताः । 12
III a भक्ष्यं भोज्यं च पेयं च लेह्यं चोष्यं पिच्छिलम्
इति भेदात्षडन्नस्य मधुराद्याश्च षड्रसाः । 13
तदन्नं पिण्डकवलैः ग्रासैर्भुक्तं च देहिभिः ।
अन्नस्थूलाशये पूर्वं प्राणस्थापयते क्रमात् । 14
अपिष्ट ~~आमिष~~ भुक्तमाहारं नरायुः कुरुते द्विधा ।
संप्रविश्यान्नमध्ये तु पृथगन्नं पृथग्जलम् । 15
अग्नेरूर्ध्वं जलं स्थाप्य तदन्नञ्च जलोपरि ।
जलस्याधः स्वयं प्राणस्थित्वाग्निं दमते शनैः । 16
वायुना याम्यमानोऽग्निः अत्युष्णं कुरुते जलम् ।
तदन्नमुष्णतोयेन समन्तात्पच्यते पुनः । 17
यथा भवति तत्पक्वं पृथक्कीटं पृथग्रसम् ।
मलं द्वादशभिः कीटं भिन्नं देहाद्बहिर्व्रजेत् । 18
कर्णाक्षिनासिकाजिह्वा दन्ताशिश्नं ~~स्व~~ गुदं नखाः ।
मलाश्रयाः कफस्वेदौ विण्मूत्राद्या दश स्मृताः । 19

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

हृत्पद्मे प्रतिबन्धाश्च सर्वान्नाद्यस्समन्ततः ।
तासां मुखेषु तं सूक्ष्मं प्राणस्स्थापयते रसम् । २०
रसेन तेन ता नाडीः प्राणैः पूरयते पुनः ।
प्रतर्पयन्ति संपूर्णास्ताश्च देहं समन्ततः । २१
ततस्तं नाडिमध्यस्थं शारीरोष्मण पारसः ।
स्नाय्वास्सीरास्ततोऽस्थीनि नखा मज्जास्थिसंभवाः । २२
मज्जात्करणवैकल्यं शुक्लं च प्रसवात्मकम् ।
इति द्वादश दानस्य परिणामः प्रकीर्तितः । २३
सर्वौषधिरसश्शुक्लं शुक्लाद्देहस्य संभवः ।
ऋतुकाले यदा शुक्लं निक्षेपं योनिसंस्थितम् । २४
तदा तद्वायुना स्पृष्टं स्त्रीरक्तेनैकतां व्रजेत् ।
112 निक्षेपकाले शुक्लस्य जीवः करणसंयुतः । २५
प्रीत्या प्रविशते योनिं कर्मभिस्स्वैर्नियोजितः ।
ततश्शुक्लं च मेकस्थं मेकाहात्कलिलं भवेत् । २६
पञ्चरात्रेण कलिलं बुद्बुदाकारतां व्रजेत् ।
बुद्बुदं नवरात्रेण मांसपेशी भवेत्ततः । २७
द्विसप्ताहाद्भवेत्पेशी रक्तमांसचिता द्विधा ।
बीजस्यैवाङ्कुराः पश्चात्पञ्चविंशतिरात्रतः । २८
भवन्ति मासमात्रेण पञ्चधा जायते पुनः ।
ग्रीवा शिरश्च स्कन्दश्च पृष्ठवंशस्तदोदरम् । २९

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पाणिपादं तथा पार्श्वं कटिगोत्रं तथैव च ।
मासद्वयेन सर्वाणि क्रमशस्संभवन्ति हि ।30
त्रिभिर्मासैः प्रजायन्ते सर्वाङ्गाङ्कुरसन्धयः ।
मासश्चतुर्भिरङ्गुल्यः प्रजायन्ते यथाक्रमम् ।31
मुखनासं च कर्णं च जायन्ते मासपञ्चके ।
दन्तपङ्क्तयस्तदारभ्य जायन्ते च तथा नखाः ।32
कर्णयोर्भवतच्छिद्रं षाण्मासाभ्यन्तरेण तु ।
पायुमेढ्रकुपस्थाश्च नाभिश्चाप्युपजायते ।33
सन्धयो ये च गात्रेषु जायते मासससप्तके ।
अङ्गप्रत्यङ्गसंपूर्णश्शिरकेशसमन्वितः ।34
विभक्तावयवस्पष्टः पुनर्मा(मां)साष्टके न तु (स्तति) ।
(पञ्चात्) पश्चात्करसमायुक्तः परिपक्वस्सतिष्ठति ।35
मातुराहारवीर्येण षड्विधेन रसेन तु ।
नाभिसूत्रेण बद्धेन वर्धते स दिने दिने ।36
ततस्स्मृतिं लभेज्जीवस्संपूर्णेऽस्मिन् शरीरके ।
सुखदुःखं विना भाति निद्रां स्वप्नं पुराकृतम् ।37
मृतश्चाहं पुनर्जातो जातश्चाहं पुनर्मृतः ।
नानायोनिसहस्राणि मया दृष्टानि जायता ।38
अधुना जातमात्रोऽहं प्राप्तसंस्कार एव ना ।
112a तत्राश्रयः करिष्यामि येन गर्भे न संभवः ।39

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

गर्भस्थश्चिन्तयत्येवं अहं गर्भाद्विनिर्गतः ।
अध्येष्यामि शिवज्ञानं संसारविनिवर्तकम् । 40
एवं स गर्भदुःखेन महाताप . . दितः ।
जीवः कर्मवशाद्दासो मोक्षोपायं विचिन्तयेत् । 41
यथा गिरिपरिक्रान्तः कश्चिद्दुःखेन तिष्ठति ।
तथा जरायुणा देही दुःखी तीव तिष्ठति । 42
पतितस्सागरे यद्वत् दुःखशोकसमन्वितः ।
गर्भोदकेन सिक्ताङ्गः सर्वतो व्याकुलस्तथा । 43
लोहकुम्भे यथा न्यस्तः पच्यते कालवह्निना ।
गर्भकुम्भे तथा क्षिप्तः पच्यते जठराग्निना । 44
सूचिभिरग्निवर्णाभिर्विभिन्नस्य निरन्तरम् ।
यद्दुःखमुपजायेत तद्गर्भेऽष्टगुणं भवेत् । 45
गर्भवासात्परो वासः कष्टो नान्यत्र कुत्रचित् ।
देहिनां दुःखबहुलस्सुघोरश्चातिसङ्कटः । 46
इत्येतद्गर्भदुःखं हि प्राणिनां परिकीर्तितम् ।
चरस्थिराणां सर्वेषामात्मगर्भानुरूपतः । 47
गर्भात्कोटिगुणं दुःखं योनियन्त्रप्रपीडनात् ।
संमूर्च्छा तस्य जायेत जायमानस्य देहिनः । 48
तिलवत्पीड्यमानस्य यन्त्रेणेव समन्ततः ।
शिरस्याताड्यमानस्य पापमुद्गरेण सति । 49

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

गर्भान्निष्क्रम्यमाणस्य प्रबलैस्सूतिवायुभिः ।
जायेत सुमहा दुःखं परित्राणमविन्दतः । 50
यन्त्रेण पीडिता यद्वा निस्सारास्स्युस्तिलेक्षुवत् ।
113 तथाशरीरं निस्सारं योनियन्त्रप्रपीडनात् । 51
अस्थिदृढं निरास्तंभं स्नायुबन्धेन यन्त्रितः ।
रक्तमांसमृदालिप्तं विण्मूत्रद्रव्यभाजनम् । 52
केशरोमतृणच्छिन्नं रोगायतनमातुरम् ।
वदनैकमहाद्वारं गवाक्षाष्टविभूषितम् । 53
ओष्ठद्वयकवाटं च दन्तजिह्वार्गलान्वितम् ।
नाडीस्वेदप्रवाहं च कफपित्तपरिप्लुतम् । 54
जराशोकसमाविष्टं कालवक्त्रानले स्थितम् ।
कामक्रोधेन्धनाक्रान्तं व्यसनैश्चोपमर्दितम् । 55
भोगतृष्णाकुलामूढं रागद्वेषवशानुगम् ।
संवर्तिताङ्गप्रत्यङ्गं जरायुपरिवेष्टितम् । 56
सङ्कटेनातिनिष्क्रान्तं योनिमार्गेण निर्गतम् ।
विण्मूत्ररक्तलिप्ताङ्गं पक्वौशिकसमुद्भवम् । 57
अस्थिपञ्जरसंघातं ज्ञेयमस्मिन्कलेबरे ।
शतत्रयं च षष्ट्यधिकं पञ्चपेशीशतानि च । 58
सार्धाभिस्तिसृभिश्छन्नं समन्ताद्रोमकोटिभिः ।
शरीरं स्थूलसूक्ष्माणि दृश्यादृश्यानि संस्थितः । 59

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तावतीभिश्च नाडीनां कोटिभिस्तत्समन्वितम् ।
प्रस्वेदमशुचिं याभिरन्तस्थं नृपते बहिः ॥ 160
द्वात्रिंशद्दशना प्रोक्ता विंशतिस्म नखास्स्मृताः ।
पित्तस्य कुडवं ज्ञेयं कफस्याढकं स्मृतम् ॥ 161
वसायाश्च पलं विंशत् तदर्धं कललस्य च ।
पञ्चार्बुदपलं ज्ञेयं पलानि शतमेदसः ॥ 162
पलत्रयं महारक्तं मज्जा स्यात्तच्चतुर्गुणम् ।
शुक्लार्धकुडुपं ज्ञेयं तद्वीर्यं देहिनां बलम् ॥ 163
113a मांसाद्यमेतत्पिण्डेन पलसहस्रमुच्यते ।
रक्तं पलशतं ज्ञेयं विण्मूत्रं च प्रमाणतः ॥ 164
इति देहगृहं ह्येतं नित्यं स्यान्नित्यमात्मनः ।
अपि शुद्धं विशुद्धं स्यात् कर्मबद्धं विनिर्मितम् ॥ 165
शुक्लशोणितसंपर्कात् देहस्थं जायते यतः ।
नित्यं विण्मूत्रपूर्णत्वात् तेनायमशुचिस्स्मृतः ॥ 166
यथान्तर्विष्ठया पूर्णः शुद्धस्यान्न बहिर्घटः ।
सततशुद्ध्यमानोऽपि देहोऽयमशुचिस्तथा ॥ 167
यं प्राप्य च पवित्राणि पञ्चगव्यहवींषि च ।
अशुचित्वं व्रजन्त्याशु किमन्यदशुचिस्ततः ॥ 168
अन्यान्यन्नपानानि यं प्राप्य सुरभीणि च ।
अशुचित्वं प्रयान्त्याशु किमप्यन्यस्ततोऽशुचिः ॥ 169

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

हे जनाः किं न पश्यध्वं यन्नियाति दिने दिने ।
स्वदेहात्कश्मलं पूतिस्तदाधारः कथं शुचिः ।७०
देहं संशोध्यमानोऽपि पञ्चगव्यकुशांबुभिः ।
घृष्यमाणा इवाङ्गानि निर्मलत्वं स न गच्छति ।७१
स्रोतांसि यस्य सततं प्रस्रवन्ति गिरेरिव ।
कफमूत्राद्यशुचि स देहः शुध्यते कथम् ।७२
सर्वाशुच्यानिदानस्य शरीरस्य स न विद्यते ।
शुचिः कः प्रदेशोऽपि विण्मूत्रं दृश्यते यतः ।७३
स्पृष्ट्वा स्वदेहस्रोतांसि मृत्तोयैः शोध्यते नरः ।
तथाप्यशुचिभाण्डस्य स परं जति किं जनाः ।७४
114 कायस्सुगन्धधूपाद्यैः यत्नेनापि सुसंस्कृतः ।
न जहाति सुदुर्गन्धं श्वपुच्छ इव नामतः ।७५
यथा जात्यैव कृष्णो नाशुक्लस्स्यादुपायतः ।
संशोध्यमानापि तथा भवेन्मूर्तिः निर्मला ।७६
जघ्रन्नपि सुदुर्गन्धं पश्यन्नपि निजमलम् ।
न विरज्यति लोके वा यं पीडयन्नपि नासिकाम् ।७७
अहो मोहस्य माहात्म्यं येनान्यमोहितं जगत् ।
जिघ्रन्पश्यन् ~~स्वका~~ स्वकान्दोषान् कायस्थं स न विरज्यते ।७८
स्वदेहाशुचिगन्धेन न विरज्यति यो नरः ।
विरागकारणं तस्य किमन्यदुपदिश्यते ।७९

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सर्वमेव जगत्पूतं देह एवाशुचिः परम् ।

तं मलावयवस्पर्शाच्छुचिरप्यशुचिर्भवेत् ।180

गन्धलेपापनुत्यर्थं शौचं देहस्य कीर्तितम् ।

द्वयस्यापगमात्पश्चाद्भावशुद्ध्या विशुद्ध्यति ।181

गङ्गातोयेन सर्वेण मृद्भारैश्च नगोपमैः ।

आमृत्योराचरेच्छौचं भावे शुद्धे स शुद्ध्यते ।82

तीर्थस्नानैस्तपोभिर्वा दुष्टात्मा नैव शुद्ध्यति ।

श्वदृति क्षालिता तोयैः किं शुद्धिमधिगच्छति ।83

अन्तर्भावप्रदुष्टस्य विशतेपि हुताशनम् ।

न स्वर्गो नापवर्गश्च देहनिर्गमनं फलम् ।84

भावशुद्धिः परं शौचं प्रमाणं सर्वकर्मसु ।

अन्यथा लिङ्ग्यते कान्ता भावेन दुहिता न्यथा ।85

मनसा भिद्यते वृत्तिरभिन्नेष्वपि वस्तुषु ।

(नरं)
अन्यथैव ननं पुत्रं चिन्तयत्यन्यथा पतिः ।86

परिशुद्धस्य भावस्य तं माहात्म्यमशेषतः ।

114 a परिवृत्तापि यं नार्या भावहीनो न कामयेत् ।87

नाद्या द्विविधमन्नाद्य : भक्ष्याणि सुरभीणि च ।

अभावेन रतस्तस्मात् भावस्सर्वत्र कारणम् ।88

चित्तं शोधय यत्नेन किमन्यैर्बाह्यशोधनैः ।

भावतस्सुविशुद्धात्मा स्वर्गमोक्षौ च विन्दति ।89

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ज्ञानामलांभसा पुंसः सद्वैराग्यमृदा पुनः ।
अविद्याराग विण्मूत्र लेप गन्ध विशोधनम् । १९०
एवमेतच्छरीरं हि निसर्गादशुचि विदुः ।
त्वङ्मात्रसारनिस्सारं कदलीसारसन्निभम् । १९१
ज्ञात्वैव दूषितं देहं यः प्राज्ञः शिथिलो भवेत् ।
नातिक्रमाति संसारं मूढ ग्राहीच्च तिष्ठति । १९२
एवमेतं महाकष्टं गर्भादुःखं प्रकीर्तितम् ।
पुंसामज्ञानदोषेण नानाकर्मवशेन च । १९३
गर्भस्थस्य स्मृतिर्यासीत्सा जातस्य प्रणश्यति ।
मूर्च्छितस्य दुःखेन योनियन्त्रप्रपीडनात् । १९४
बाह्येन वायुना चास्य मोहसंज्ञेन देहिनः ।
स्पृष्टमात्रस्य घोरेण ज्वरस्समुपजायते । १९५
तेन ज्वरेण महता महामोहः प्रजायते ।
संमान्यस्मृतिभ्रंशश्शीघ्रं संजायते पुनः । १९६
स्मृतिभ्रंशात्तस्य पूर्वकर्मवशेन च ।
रतिस्संजायते पूर्णं जन्तोस्तत्रैव जन्मनि । १९७
नात्र मूढश्च लोकोयमकार्ये संपवर्तिते ।
नचात्मं संविजानाति नपरं च दैवतम् । १९८
115 न शृणोति परं श्रेयः सति चक्षुषी नेक्षति ।
समासयाशनैर्गच्छन् स्खलतीव पदे पदे । १९९

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तस्यां बुध्यो न जानाति बोध्यमानो बुधैरपि ।

संसारे क्लिश्यते तेन पापलोकवशानुगः ॥ 100

गर्भस्मृतेरभावेन शास्त्रमुक्तं शिवेन तु ।

दुःख प्रशमनार्थाय स्वर्गमोक्षप्रसाधनम् ॥ 101

यन्त्वस्मिन्शिवज्ञाने धर्मकामार्थसाधने ।

न कुर्वन्त्यात्मनश्श्रेयस्तदत्र महदद्भुतम् ॥ 102

अव्यक्तेन्द्रियवृत्तित्वात् बाल्ये दुःखं महत्पुनः ।

इच्छन्नपि न (स) शक्नोति वक्तुं कर्तुं च यत्क्रियाम् ॥ 103

दन्तोत्थाने महादुःखं मोहेन व्याधिनाशनम् ।

बालरोगैश्च विविधैः पीडा बालग्रहैरपि ॥ 104

तृट्क्षुत्कोपनताङ्गः क्वचित्तिष्ठन्ति रारटन् ।

विष्णोरभक्षणाद्यैश्च मोहाद्बालस्समाचरेत् ॥ 105

कौमारे कर्णवेधेन मातापित्रोश्च ताडनात् (ल) ।

अक्षराध्ययनाद्यैश्च दुःखस्स्यात् गुरुशासनात् ॥ 106

प्रमत्तेन्द्रियवृत्तिश्च कामराजप्रपीडनात् ।

रागान्धस्यैव सततं कुतः सौख्यं हि यौवने ॥ 107

(ई) ईर्ष्यया च महादुःखं मोहात्मा तस्य जायते ।

नेत्रस्वक्षिणि तस्यैवं दुःखाय केवलम् ॥ 108

न रात्रौ विन्दते निद्रां कौमारिपरिखेदतः ।

दिवाचापि कुतस्सौख्यं अर्थोपायन चिन्तया ॥ 109

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्त्रीष्वायानि (सि) तद्देहस्य ये पुंसश्च शुक्रबि . वः ।
115 a न ते दुःखायमन्तव्याः श्वेतजा इति बिन्दवः । 110
कृमिभिस्तुद्यमानस्य कुष्ठिनः पामिकस्य वा ॥
कण्डूयनाग्नितप्तेन यद्दुःखं स्त्रीषु तद्विदुः । 111
यादृशं मन्यते सौख्यं कण्डूपूयविनिर्गमे ।
तादृशं स्त्रीषु सन्तव्यं नाधिकं तासु विद्यते । 112
गण्डस्य वेदना यद्वत् स्फटितस्य न वर्तते ।
तद्वत्स्त्रीष्वपि तद्विद्धि न सौख्यं परमार्थतः । 113
विण्मूत्रस्य समुत्सर्गात् सुखं भवति यादृशम् ।
तादृशं स्त्रीषु विज्ञेयं मूढैः कल्पितमन्यथा । 114
नारीष्वस्तुभूतासु सर्वदोषाश्रयासु च ।
नाणुमात्रकमप्येवं सुखमस्ति विचारतः । 115
संमानमवमानेन वियोगे नष्टसङ्गमः ।
यौवनं (व्वनं) जरया ग्रस्तं क्व सौख्यमनुपद्रवम् । 116
वलीवलीतस्थालित्यैः शिथिलीकृतविग्रहः ।
सर्वक्रियास्वशक्तश्च जरया जर्जरीकृतः । 117
स्त्रीपुंसोर्यच्च सं रूपं यदन्योन्यप्रियं पुरा ।
तदेव जरया ग्रस्तमुभयोरपि विप्रियम् । 118
अपूर्ववत्स्वमात्मानं जरया परिवर्तितम् ।
यः पश्यन्नपि (पि) रज्येत कोऽन्यस्तस्मादचेतनः । 119

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

जराभिभूतः पुरुषः पुत्रमित्रादिबान्धवैः ।
अशक्तत्वाद् दुराचारो भृत्यैश्च परिभूयते ॥120
धर्मश्चार्थश्च कामश्च पुरुषो सजरीकृतः ।
. . . . धर्मं समाचरेत् ॥121
वातपित्तकफादीनां वैषम्यं व्याधिरुच्यते ।
वातादीनां समूहश्च देहोयं परिकीर्तितः ॥122
116 तस्माद्व्याधिमयं ज्ञेयं शरीरमिदमात्मनः ।
नात्मभुवतिरेकत्वाद्व्याधीनां पञ्जरं स्मृतम् ॥123
रोगैर्नानाविधैर्याति देहदुःखान्यनेकधा ।
तान्येव स्वात्मभोगेन यानि किमन्यत्कथयाम्यहम् ॥124
एकोत्तरमृत्युशतं [मास्मिन्] देहप्रतिष्ठितम् ।
तत्रैककालसंयुक्ताः शेषास्त्वागन्तवस्स्मृताः ॥125
ये त्विहागन्तवः प्रोक्तास्ते प्रशाम्यन्ति भेषजैः ।
जपहोमप्रदानैश्च कालमृत्युर्न शाम्यति ॥126
यदि वा नापमृत्युस्स्याद्विषमद्यादशङ्कितः ।
नैनं स्यात्पुरुषं तस्मादपमृत्युर्बिभेति यः ॥126
विविधा व्याधयश्शस्त्रं सर्पाद्याः प्राणिनस्तथा ।
विषाणि चाभिचाराणि मृत्योर्द्वाराणि देहिनाम् ॥128
सुपीडिताङ्ः सर्पाद्यैरपि धन्वं तरिस्स्वयम् ।
स्वस्थीकर्तुमशक्तो कोति कालप्राप्तं हि देहिनम् ॥129

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नौषधं न तपो दानं न मन्त्रो न च बान्धवाः ।
शक्नुवन्ति परित्रातुं नरं कालप्रचोदितम् ॥ 130
रसायन तपो जप्यं योगसिद्धैर्महात्मभिः ।
कालमृत्युरपि प्राप्तैर्जीयते नालसैर्नरैः ॥ 131
नास्ति मृत्युसमं दुःखं नास्ति मृत्युसमं भयम् ।
नास्ति मृत्युसमं त्रासः सर्वेषामेव देहिनाम् ॥ 132
सद्भार्यापुत्रमित्राणि राज्यैश्वर्यसुखानि च ।
बान्धवानि च वैराणि (पौराणि) मृत्युस्सर्वाणि भिन्दति ॥ 134
हे जनाः किं न जानीध्वं सहस्रोष्वपि मध्यतः ।
जनाश्शतायुषः पञ्च भवन्ति न भवन्ति च ॥ 135
116 a अशीतिकापि विद्यन्ते केचित्साप्ततिका नराः ।
परमायुस्तथा षष्टिस्तदाप्यायुरनिश्चितम् ॥ 136
यस्य यावद्भवेदायुर्देहिनः पूर्वकर्मभिः ।
तस्यार्धमायुषो रात्रौ ह्रियते (र्ध) र्धमृतोपमम् ॥ 137
बाल एव हि मोहेन वार्धिक्ये जरया पुनः ।
(पंचानां) वंशानां विंशतिर्याति धर्मकामार्थवर्जितः ॥ 138
आगन्तुकैर्भयैः पुंसां व्याधिशोकैरनेकधा ।
हीयते र्धं च तत्रापि यच्छेषं तद्धि जीवितम् ॥ 139
जीवितान्ते च मरणं महाघोरमवाप्नुयात् ।
जायते योनिकूपेषु कोटिषु मृताः कर्मवशात्पुनः ॥ 140

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

देहेन संगमः पुंसां वियोगं कर्मसंक्षयात् ।
मरणं तद्धि निर्दिष्टं न नाशनं परमार्थतः ॥ 141
महातमः प्रविष्टस्य भिद्यमानस्य मर्मसु ।
यद्दुःखं मरणं जन्तोः न तस्येहे वमा क्वचित् ॥ 142
हा तात मातर्हा कान्ते क्रन्दन्नेव सुदुःखितः ।
मण्डूककूपसर्पेण मृत्युना ग्रस्यते जनः ॥ 143
बान्धवैश्च परित्यक्तः प्रियैश्च परिवारितः ।
निश्वा सन्दीर्घमुष्णं च मुखेन परिशुष्यता ॥ 144
चतुरन्तेषु खट्वायाः परिवर्त्य मुहुर्मुहुः ।
स मूढः क्षिप्यतेऽत्यर्थं हस्तपादावितस्ततः ॥ 145
खट्वाया वाञ्छते भूमिं भूमेः खट्वां पुनर्महीम् ।
विवस्त्रस्त्यक्तलज्जश्च मूत्रविष्ठानुलेपितः ॥ 146
117 याचमानश्च सलिलं शुष्ककण्ठोष्ठतालुकः ।
चिन्तयानश्च वित्तानि कस्यैतानि मृते मयि ॥ 147
पश्यतां प्राप्य कण्ठे तु कालपाशेन कर्षितः ।
म्रियते पश्यतामेव गळे घुरुसुरायते ॥ 148
जीवस्तृणजलूकाव देहाद्देहान्तरं व्रजेत् ।
संप्राप्योत्तरमंशेन देहन्त्यजति पौर्विकम् ॥ 149
मरणात्प्रार्थना दुःखमधिकं हि विवेकिनः ।
क्षणिकं मरणे दुःखमधिकं प्रार्थनाकृतम् ॥ 150

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यज्वनां पतिरर्थित्वाद्विष्णुर्वामनतां गतः ।
अर्थिकः को परस्तस्मात् कोऽनुयास्यति लाघवम् । 151
ज्ञातं मयेदमधुना मृतो भवति यो गुरुः ।
न परं प्रार्थये भूयस्तृष्णा लाघवकारणम् । 152
आदौ दुःखं महादुःखमन्ते दुःखं सुदारुणम् ।
निसर्गात्सर्वदुःखानामिति दुःखपरं परा । 153
वर्तमानान्यतीतानि दुःखान्येष्याणि यानि च ।
नरा न विन्दत्यज्ञानां न विरज्यन्ति तेन ते । 154
अत्याहारान्महादुःखमनाहारान्महद्भयम् ।
कुपिते जीविते कष्टा मन्ये त्वेवं कुतस्सुखम् । 155
क्षुधा च सर्वरोगाणां व्याधिश्श्रेष्ठतमः स्मृतः ।
अन्नौषधलेपेन क्षणमात्रात्प्रशाम्यति । 156
क्षुद्व्याधिवेदना तीव्रा निश्शेषबलकृन्तनि ।
तथाभिभूतो म्रियते यथान्यैर्व्याधिभिर्नरः । 157
उतेनापि किं सौख्यं जत्वाग्रपरिवर्तिनः ।
यः क्षणार्धार्धेण मात्रेण कण्ठं प्राप्य निवर्तते । 158
इति क्षुद्व्याधितप्तानामन्नमौषधवत्स्मृतम् ।
न तत्सुखाय मन्तव्यं परमार्थेन पण्डितैः । 159
117a मृतोपमेन यश्शेते सर्वकार्यविवर्जितः ।
तस्यापि तत्कृतस्सौख्यं तमसाच्छादितात्मनः । 160

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्रबोधेऽपि कुतस्सौख्यं कार्यैः रुपहतात्मनः ।
कृषिवाणिज्यसेवाद्य रोग क्षादि परिश्रमैः । 161
प्रातर्मूत्रपुरीषाभ्यां मध्याह्ने क्षुत्पिपासया ।
बाध्यन्ते
तृप्ताः काम्येन भोज्यन्ते निद्रया निशि जन्तवः । 162
अर्थस्योपार्जने दुःखमार्जितस्य च रक्षणे ।
नाशे दुःखं व्यये दुःखमर्थस्यैवं कुतस्सुखम् । 163
चोरेभ्यस्सलिलादग्नेः स्वजनात्प्रार्थनादपि ।
भयमर्थवतां नित्यं मृत्योर्देहभृतामिव । 164
खे यथा भक्ष्यते मांसं पक्षिभिश्श्वापदैर्भुवि ।
जले च भक्ष्यते मत्स्यैः तथा सर्वत्र वित्तवान् । 165
विमोहयन्ति संपत्सु तापयन्ति विपत्तिषु ।
खेदयन्त्यार्जने काले कदा त्वर्थास्सुखावहाः । 166
ग्नो यश्च
यश्चार्थपतिरुद्वि सर्वार्थनिस्पृहः ।
तयोरर्थपती दुःखी सुखी सर्वार्थनिस्पृहः । 167
शीतेन दुःखं हेमन्ते ग्रीष्मे तापेन दारुणम् ।
वर्षासु वातवर्षाभ्यां कालेऽप्येवं कुतस्सुखम् । 168
विवाहो विस्तरे दुःखं गर्भस्योद्वहने पुनः ।
प्रसवोपत्यदोषैश्च दुःखं विष्ठादिकर्मभिः । 169
दन्तरोगेषु पुत्रस्य कष्टं हा किं करोम्यहम् ।
पा
गावो नष्टाः कृषिर्भग्ना वातश्च प्रबाध्यते । 170

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आमि प्राघुणिकाः प्राप्ताः भग्नाधिद्रव्यं मे गृहम् ।
जारत्याच मे भार्या वचनं नः करिष्यति । 171
कस्मै प्रदेया कन्या मे कीदृशश्च वरो भवेत् ।
(न्ता)
इति चिन्ताभिभूतस्य कुतस्सौख्यं कुटुम्बिनः । 172
॥8 कुटुम्बचिन्ताकुलितस्य पुंसः श्रुतं च शीलं च गुणाश्च सर्वे
भे निहिता इवापः प्रयान्ति देहेन समं विनाशम् ॥ 173
राज्येऽपि च कुतस्सौख्यं ~~चिन्तया~~ ।
पुत्रादपि भयं यत्र तत्र सौख्यं हि कीदृशम् । 174
स्वजाति यद्भयं प्रायः सर्वेषामेव देहिनाम् ।
परद्रव्याभिषक्ताश्च श्वानामिव परस्परम् । 175
सा प्रधृष्यबलः कश्चिन् नृपाख्यातो हि भूतले ।
निखिलं यास्तिरस्कृत्य सुखं तिष्ठन्ति निर्भयम् । 176
युद्धे बाहुसहस्रं हि पातयामास भूतले ।
श्रीमतः कार्तवीर्यस्य ~~ऋ~~ ऋषिपुत्रः प्रतापवान् । 177
ऋषिपुत्रस्य रामस्य रामो दशरथात्मजः ।
जघान वीर्यमतुलमूर्ध्वगं यं महात्मनः । 178
जरासन्धेन रामस्य कृष्णस्येनाशितं यशः ।
जरासन्धस्य भीमेन तस्यापि च हनूमता । 179
हनूमानपि ~~[illegible]~~ सूर्येण विक्षिप्तः पतितः क्षितौ ।
सूर्यः प्रकोपयुक्तोऽपि मेघैः सञ्छाद्यते क्वचित् । 180

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

क्षिप्यन्ते वायुना मेघाः वायोर्वीर्यं नगैर्जितम् ।
दह्यन्ते वह्निना शैलास्सवह्निश्शाम्यते जलैः ॥ 181
तज्जलं शोष्यते सूर्यैस्ते ~~सूर्या~~स्सह वारिणा ।
लोकेशास्सर्वदेवाश्च नश्यन्ति ब्रह्मणो दिने ॥ 182
ब्रह्मापि त्रिदशैस्सार्धमुपसंह्रियते पुनः ।
परार्धद्वयकालान्ते शिवेन परमात्मना ॥ 183
एवं ब्रह्मसहस्राणां यत्कालं यत्र निर्मितम् ।
तत्कालं कमलाक्षस्य विष्णोरायुः प्रकीर्तितम् ॥ 184
118 a विष्णोः कोटिशतं यात्रा रुद्रस्याधिपतेः प्रभोः ।
महेश्वरादितत्वानां कालसंख्या न विद्यते ॥ 185
एवं नास्तीति संसारे यस्य सर्वोत्तमं बलम् ।
लिहायेत जगन्नाथं परमात्मानमव्ययम् ॥ 186
ज्ञात्वा सातिशयं सर्वमाहिमानं निवर्जयेत् ।
एवं भूते जगत्यस्मिन्कश्शूरः पण्डितोऽपि वा ॥ 187
नेहास्ति सर्ववित्कश्चित् नत्यमूर्खश्च सर्वदा ।
यो यद्वस्तु विजानाति तानितानि च पण्डितः ॥ 188
सर्वदा सर्व सर्वत्र प्रभावस्सदृशस्मृतः ।
स्थितस्थातिशयत्वेन प्रभवः कस्यचित्क्वचित् ॥ 189
दानवैर्निर्जिता देवास्ते दैवैर्निर्जिताः पुनः ।
इत्यन्योन्यस्थितावेतौ भोगैर्जयपराजयौ ॥ 190

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

निवाकवचनान्सर्वान्दानवान्बलगर्वितान् ।
जित्वास्त्रैरर्जुनश्श्रीमान्गोपालैरिह निर्जितः । 191
एवमस्त्र युगे राज्ञां प्रस्थमात्रान्नभोजनम् ।
यानशय्यासनं चैकं शोणं दुःखाय केवलम् । 192
सप्तभौमेवि शावेन खट्वा पादपरिग्रहः ।
उदकुंभस्त्रवत्यंभः कोशाधान्यप्रविस्तरः । 193
प्रत्युषे तूर्यनिर्घोषैस्समाः पुरनिवासिभिः ।
गेयं संपुटवाद्यं च समन्तात्पुरवासिभिः । 194
राज्ञोऽभिमानमात्रं हि ममायं विद्यते गृहे ।
सर्वमाभरणं भारं सर्वमालेवनं मलम् । 195
सर्वं प्रलपितं गीतं नृत्यमुत्पद्य तम् ।
इत्येवं राज्यसंभोगैः कुतस्सौख्यं विचारतः । 196
नृपाणां व्यग्रवृत्तानामन्योन्यविजिगीषया ।
119 प्रायेणस्त्रीमद्यालेपानसहुपाद्या महान्नृपाः । 197
स्वर्गं प्राप्य निवर्तिताः कश्चिद्या विन्दते सुखम् ।
स्वर्गेऽपि तत्कुतस्सौख्यं दृष्ट्वा दीप्तमलां श्रियम् । 198
~~पुनश्च~~ कुपर्युपरि देवानामन्योन्यातिशया स्थितिः ।
सर्वैः पुण्यफलं स्वर्गे मूलच्छेदेन भुज्यते । 199
नचान्यत्क्रियते कर्म योऽत्र दोषस्सुदारुणम् ।
छिन्नमूलस्तरुर्यद्वदवशः पतति क्षितौ । 200

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पुण्यवृक्षक्षयान्ते द्राक् पतन्ति दिवौकसः ।
सुखा.. लाभनिष्ठानां दुःखभोगाग्निसंप्लवान् । 201
अकस्मात्पतने दुःखं कष्टं स्वर्गे दिवौकसाम् ।
इति स्वर्गेऽपि देवानां नास्ति सौख्यं विचारतः । 202
क्षयान्तातिशयास्ते दोषाः स्वर्गभोगीयकर्मणाम् ।
तत्र कष्टं महद्दुःखं नरकाग्निषु देहिनाम् । 203
घोरैश्च दुर्निवार्यैः पापैः वाङ्मनःकायसंभवैः ।
कुठारैश्छेदनं तीव्रं वल्कलानां च कर्षणम् । 204
वर्णशाखाबलानां च पतनं छिद्धि वायुना ।
उन्मूलनाच्चमर्दश्च गजैरन्यैश्च देहिभिः । 205
दावानलशिखातापैः दुःखं स्थावरजातिषु ।
वर्ष वातातपे दुःखं सुकष्टं मृगपक्षिणः । 206
क्षुत्तृट्क्लेशश्च सुमहान् सन्तापश्च सदा मृगः ।
कुद त्रद शतादिदमनं पदबन्धनताडनम् । 207
नानाप्रवेदनं त्रासः प्रतोदकशाघातनम् ।
वेणुकुन्तादिनिगलं मुद्गराङ्कुशपातनम् । 208
भारोद्वाहनसंक्लेशः शिक्षायुद्धादिपीडनम् ।
आत्मयूथवियोगश्च नवानयनबन्धनम् । 209
पशुनागनिकायानामेवं दुःखान्यनेकधा ।
119 a गर्भवासे महद्दुःखं तथा निर्गमनं नृणाम् । 210

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

बाल्ये च दुःखमज्ञानात्कुमारे गुरुशासनात् ।
यौवने कामरागाभ्यां दुःखं रागेर्ष्यया पुनः । 211
कृषिवाणिज्यसेवाश्च गोरक्षाद्यैश्च कर्मभिः ।
वृद्धभावे च जरया व्याधिभिश्च प्रपीडनम् । 212
मरणे च महादुःखं प्रार्थनायां ततोऽधिकम् ।
राजाग्निजलदायादचोरशत्रुभयं महत् । 213
अर्थस्यार्जनरक्षायां दुःखं नाशे भयं पुनः ।
कार्पण्यं मत्सरो दंभस्तृष्णाधिक्यभयं महत् । 214
अकार्यसंप्रवृत्तिश्च दुःखानि धनिनां सदा ।
कृषिवृष्टिः कु… दासत्वं परतन्त्रता । 215
इष्टानिष्टैर्वियोगश्च संप्रयोगश्च सहस्रशः ।
दुर्भिक्षं दुर्भगत्वं च मूर्खत्वं च दरिद्रता । 216
…रोत्तरभावश्च मारकं राष्ट्रविभ्रमः ।
अन्योन्यातिशयं दुःखमन्योन्यातिशयात्पुनः । 217
अन्तर्बहिःप्रकोपाश्च राज्ञां मण्डलिनामपि ।
अन्योन्येषां प्रकोपश्च राज्ये मम मही कृता । 218
अनित्यानां प्रभावानामुच्छ्रायाणां च पातनम् ।
अन्योन्यस्वां मही यत्स्वामन्योन्यस्य च भक्षणम् । 219
इत्येवमादिभिर्दुःखैर्यस्मात्प्राप्तं चराचरम् ।
निरयादिमनुष्यान्तं तस्मात्सर्वं त्यजेत्पुनः । 220

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्कन्धात्स्कन्धान्तरं भारं विश्रमं मन्यते यथा ।
तद्वत्सर्वमिदं लोके दुःखं दुःखेन शाम्यति । 221 ।
अन्योन्यातिशयात्पापात् संभवाद्भोगसंक्षयात् ।
120 धर्मक्षयाच्च देवानां दिवि दुःखमवस्थितम् । 222
नानायोनिसहस्रेषु संभवः पुण्यसंक्षयात् ।
रोगाश्च विविधाकारा देवलोकेषु संस्थिताः । 223
यज्ञस्य हि शिरश्छिन्नमश्विभ्यां हि स्थितं पुनः ।
तेन दोषेण यज्ञस्य शिरोरोगस्सदैव हि । 224
मार्ताण्डभानोः कुष्ठत्वं वरुणस्य महोदरम् ।
पूष्णो दशनवैकल्यं भुजस्तंभश्शचीपतेः । 225
क्षयरोगश्च सुमहान् सोमस्य परिकीर्तितः ।
दक्षस्य दारिकां पौत्रीं ब्रह्मा कामितवान्यतः । 226
ज्वरश्च सुमहानासीत् दक्षस्यापि प्रजापतेः ।
कल्पे कल्पे च देवानां महतामपि संक्षयः । 227
परार्धद्वयकालान्ते ब्रह्मणश्चाप्यनित्यता ।
दक्षस्य दारिकां पौत्रीं ब्रह्मा कामितवान्यतः । 228
क्रोधेन चाजे यद्वा न्योगस्थानं भवत्प्रभुः ।
कामक्रोधौ स्थितौ यत्र तत्र दोषास्तथात्मिकाः । 229
दुःखानि च समस्तानि संस्थितानि न संशयः ।
निवणोश्च जन्ममरणं मायानित्वं च सर्वतः । 230

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

त्रिविधः कामशक्तिश्च सारश्यं बन्धनं बलैः ।
रुद्रेण त्रिपुरं दग्धुं दक्षयज्ञो विनाशितः । २३१
स्कन्दस्य जन्मतः शुक्ला क्रीडाश्चान्यास्सहस्रशः ।
एवं विधैस्तु रागाद्यैर्दोषैर्देवास्समन्विताः । २३२
एभ्यः परशिवश्शान्तः परिपूर्णस्स . . . ।
एवमेतज्जगत्सर्वमन्योन्यातिशयस्थितम् । २३३
दुःखैराकुलितं ज्ञात्वा सर्वदं परमं व्रजेत् ।
120 a निर्वेदाच्च विरागस्स्याद्विरागाज्ज्ञानसंभवः । २३४
ज्ञानेन तत्परं ज्ञात्वा शिवन्मुक्तिमाप्नुयात् ।
समस्तदुःखनिर्मुक्तस्स्वस्थात्मा सुसुखी सदा । २३५
सर्वज्ञः परिपूर्णश्च मुक्त इत्युच्यते बुधैः

॥ इति शिवधर्मोत्तरे संसार
प्रसवाख्यानं नामाष्टमो-
ऽध्यायः । श्री साम्ब-
सदाशिवाय पर-
ब्रह्मणे नमः ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

॥ श्रीः॥

( " अथ नवमोऽध्यायः ॥ )

अथ स्वर्गे भोगमनुभूय नराः क्षीणपुण्यास्तद्वासना-
नुभवादिमं लोकमागत्य शुभे देशे जातिकुलरूपव-
यःश्रुति प्रज्ञाशील शौच सत्य दम दान दया दाक्षिण्या-
रोग्य सत्त्व बलोत्साह प्रभाव प्राधान्य धनधान्य रत्न-
वाहन हर्म्य प्रासाद गीत नृत्त वाद्य काव्य कलासुरव-
वास
शय्यासन भूषणान्नपान सुगन्ध सुगन्धपान स्त्री पुत्र पशु-
वस्त्रालङ्कार हिरण्य महि भोगाय संपन्नास्सततमायत-
नाव सथन सभासत्र प्रपाराम तटाक दीर्घिका वापी यान देव-
द्विज गुरु विनीत साधु तपस्वि पूजासत्कारानुष्ठाना-
भिरतास्तपस्स्वाध्यायाध्ययनामृत ज्ञाना पवर्ग कथा-
भिरामाश्च भवन्ति ॥ तस्माद्युक्तं च स्वर्गीयं कर्म कर्तुं
वक्तुं च सत्क्रियाम् ॥

धर्माद्राज्यं धनं सौख्यं धर्मात्स्वं प्राप्यते यतः ।
धर्ममेव ततः कुर्यात्सर्वकामार्थसिद्धये । 1
मुहूर्तमपि जीवेत नरश्शुक्लेन कर्मणा ।
स
न त्वल्पमपि कष्टेन लोकद्वय विरोध.. । 2

अथ नरकेषु नराः पापेन कर्मणा यातनाभिस्त्राः
121 कष्टाश्चानुभूय ! भूमिमागच्छन्ति । ततः पापविशेषैः !

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वृक्ष कीट पक्षि मृग पशु जाति लक्षणेषु । प्रत्यक्षानीलेषु ! +

पुनः दुःखान्यनुभवन्ति । ततः .. णा वशा पापास्तद्वा-

सनामात्रानुभाव .. तैर्लक्षणैर्मनुष्यजातौ जायन्ते । तद्यथा।

गोस्था (त)

ब्रह्महा क्षयरोगस्य । सुरापः श्यावदन्तकः । सुवर्णचोरः 1

कुनखी दुश्चर्मा + गुरुतल्पगः ।

पङ्क्तेश्च तत्परिवादश्रवणाद्बधिरस्स्वयम् 1

*मलकर्तनात् । खरस्वामिनि लक्ष्य कपतिः । 1

हस्ताङ्कुशोर परस्मार तदाज्ञा भङ्ग भगं धदीम रीनिद-

क्रमः । अवज्ञाकार्यं लथमिः । गुरुकार्यापेक्षी । दत्प्रज्ञ । स्त-

त्कर्म शिशिर कृ कासः । कुपितम क्षमाययतः गुरुमव-

काम तशिरोरोगः । एते गुरुकर्म विपाकः-चण्डाल-

पतित पापिष्ठ रजस्वला संव्यवहारान्त्यजातिश्वत्री 1

वस्त्रापहारी अग्निदः क्षीरजतापहारी दन्तुरः 1

कूटसाक्षी मुखरोगी । मातृ पितृ गुरु तपस्विन्यादिषु ।

बालवृद्धातुरशरणागत त्यागी अनिमित्ततः पादादिरोगी ।

प्रतिज्ञाय ब्राह्मणस्यानदाना दल्पायुः । तद्व्यपहारा-

दामगर्भान्तपाकी । प्रवाराभनाङ्गकः । नैष्ठिकव्रतं -

प्रतिनिवृत्तः । सदारोगी । पत्नी बहुत्वे सत्येकाम-

भिरामः ! क्लीबः । स्वामिनौ धर्मे नियुक्तेस्तदानुष्ठान-

सत्कारपूजा प्रदानादि पुश्चाद्व्यवहारी जलरोगी दुर्बल-

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

121a वध्ये बलवतस्समुपेक्षायां गर्ही नित्यम्। अन्नहार्यजीर्णी ।
व्यवहारपक्षपातिशिक्षारोगी। स्वयं प्रवर्तितधर्मानुष्ठान-
च्छेदिनः प्रतिष्ठानियोगः। स्वयमग्रभुग्गलरोगी। अ-
कृतपञ्चमहायज्ञः लोक . . हारः। पर्वमैथुनि प्रमेही।
स्वसारादन्यत्र धीमतः कौशाल्पत्वम्। परिक्षीणमित्र-
बन्धुस्साधुस्वजनावमानात् परिभूतस्सौत्रक्षाः। +
क्षीणेन्द्रियवृत्तिश्च। अतिथीन्परित्यज्यागतः कपोल-
पिण्डकः। अथ सूर्यास्तमये प्रतिश्रयादानादिष्टपल्ली-
विरोगः। धर्मसाधुगुरुमित्रमुपचारतः प्रासार्थश्रंशः। वि-
स्रंभापहारी सर्वदुःखाश्रयम्। मिथ्यागुणैरात्मोत्क-
र्षी वामनः। गोपृष्ठदायी कुष्ठी सूतिः। गोघ्नोजात्यन्धः।
गोषु दुःखकारी गोनासः। गोर्निर्दयश्चिपिटिसानगः.
निस्नेहः स्वभार्यायां गलगण्डी। क्रोधिनः चण्डालाः
पिशुनः पूतिनासिकः। पूतिवक्त्रश्च सूचिचिह्नः त्रपु-
ताम्रसीसादिस्पष्टम्। त्रपुताम्रसीसचामरविक्रयी
(म्ल)
अजैकशफविक्रया ~~म्ल~~ मृगव्याधः। कुण्डाशी भ्रतक-।
तैलिको नास्तिकः। अङ्गोपजीवी अभक्ष्यभक्षी।
(न्यास)
गण्डमाली। अप्रतिरूपव्यवहारी ज्ञानमन्यास्यतः
प्रतिग्रहीता मूकः। पुस्तकापहारी। अन्धः पुण्य-
कथाक्षेपी। नक्रनासः शिष्टाचारधर्मनिन्दकः।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

काकाक्षः साधुतपस्वि देवा द्विज गुरुज्ञानयोग द्वेष्टा ।
वक्रास्यः पुण्यदान प्रवृत्ति प्रतिषेधकः । क्रिमिदन्त-
कः देवा द्विज स्वापहर्ता । पा[वा] .. त्राशी । धर्म दूषकः
122 क्रूराक्षः पुण्यकथा पराङ्मुखः । स्त्री निर्जितः तिल-
तैल घृता~~[illegible]~~ पहारी । सकल देह जर्जरी सदा स्रा-
वितदुपयोक्ता । तटाकारामभेत्ता चाङ्गहीनः । प्रभोरा-
दिव्यवस्था समभेदस्त[स्क]रः व्यवहारेष्वमध्यस्थश्च-
लग्राही । अभीतभृत्यस्सदा फुरुषो व्याधिभूतः । पर-
दाराभिगामी गुप्तद्वारः । स्वामिद्रोही वातरोगी । गोष्व-
(वकीर्णी) दुश्चर्मी । खरात्वगामी प्रमेही । धर्मपत्नीष्वा-
स्ये मैथुन प्रवर्तकः सूकरः । सगोत्र सवर्ण स्त्रीगामी
शिपिविष्टः । कृतघ्नस्सर्वरंभी विफलश्च । ततश्शेषाः ।
कुब्ज मुण्ड कुण्ड मण्ड व्यङ्ग दरिद्रास्फाटित पाणिपादाङ्ग-
वयवधूसराश्छद्मिनः । परपिण्डोपजीविनश्चिरक[प्प]ट-
धराश्चिरमलिन वाससः क्षुत्पि(पा)सातुराः प्रेतरूपिण-
स्सततमुद्विग्नवासहृदयाः बहुल प्रलापिनः पुण्य-
कथा पराङ्मुखास्त्राजितास्त्रीष्वासक्तहृदया स्त्रीभूत-
मद्यमांसान्नपान पापार्थ [नानार्थ] निरताः नित्यक्रुद्धाः पापनिर-
तास्स्मृति परिहीनाः पुण्यापुण्यद्वेष्टारः परकर्म कीर्तन-
निरताः हीनाङ्गास्विन्न नाना पावन वस्त्र शय्यासनाः

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्वल्पायुष स्स्वल्पकुद्धिय: शठ षण्ड मुडु शै लूपतस्कर-
परप्रेष्यकर्मकर व्याधि दुःखिताः। स्वर्वो सच्छ ग्रांध-
दासि संकीर्ण निरताः क्रूरकर्माणाश्चोत्पद्यन्ते। यस्मा-
देनेन पाप प्रायश्चित्तं कर्तव्यं चीर्ण प्रायश्चित्तम्।
122a परिशुद्ध लक्षणा जायन्ते। गर्भ नारकाश्च। पुण्यापुण्य-
हेतुत्वा दुभय रूपिण स्सङ्कीर्ण फलास्तत्कर्म द्विविधेन
देह भोग ~~व्य~~ व्यवहारनिरता भवन्ति। (व्यवहाराचार) कः। यस्मात्
पापेन दुःखानि तीव्राणि सुबहूनि च ~~भवन्ति~~ तस्मात्
पापमकर्तव्य मात्मा पीडाकरं हि तत्। २

यस्मिन्देशे च काले च वयसा याद्दशेन च।
कृतं शुभाशुभं कर्म तत्तथा तेन भुज्यते।
तस्मात्सदैव दातव्य मविच्छिन्नसुखार्थिभिः।
विच्छिद्यन्ते यथा भोगा ग्रीष्म कुसरितो यथा।
सत्यं वक्तुमशेष मस्ति सुलभा वाणीमनो ध्यायतुं -
दातुं दानपरं शरण्य मभयं देयं पितृभ्यो जलम्।
पूजार्थं हि सदा शिवस्य विमल स्स्वध्यान यत्नःपरं
क्षुद्याधेः फलमूलमास्ते शमनं क्लेशात्मकैः किं धनैः॥

॥ इति श्रीशिवधर्मोत्तरे स्वर्गनरक-
चिह्नो नाम नवमोऽध्यायः॥

इति श्री साँबसदाशिवाय
परब्रह्मणे नमः॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

॥ श्रीः ॥

॥ अथ दशमोऽध्यायः ॥

अथ संसारमुक्त्यर्थं ज्ञानयोगं ब्रवीमि ते ।
शिवप्रकाशकं ज्ञानं योगस्तत्रैकचित्तता । 1
स्वसिद्धान्ताविरोधेन यस्तर्केण विचारयेत् ।
अथ ज्ञानापवर्गार्थं स तत्त्वं वेदने रतः । 2
पूर्वोत्तरविरोधेन कोऽत्रार्थोऽभिमतो भवेत् ।
इत्यादिव्यूहतस्तर्कैः शुष्कतर्कं विवर्जयेत् । 3
तस्मादागमयुक्त्यैव सूक्ष्मार्थप्रविचारणम् ।
123 कर्तव्यं नानुमानेन केवलेन विपश्चिता । 4
हीनमध्योत्तमफलं बहुद्वारं यतश्शुभम् ।
तस्मात्परीक्ष्य कुर्वीत पुण्यं साधु महाफलम् । 5
आदिमध्यान्तनिर्मुक्तस्वभावविमलः प्रभुः ।
सर्वज्ञः परिपूर्णश्च शिवो ज्ञेयश्शिवागमे । 6
सर्वार्थभासकं ज्ञानं शिवयोगश्च शाश्वतम् ।
प्रकाशयति मुक्त्यर्थं मुमुक्षूणामयं शिवः । 7
बहुत्वेन हि शास्त्राणां सर्वज्ञेन शिवेन यत् ।
प्रणीतममलं शास्त्रं तत्प्रमाणं न संशयः । 8
यस्सर्वज्ञस्सुखं पूर्णः स्वभावविमलः प्रभुः ।
सर्वदोषविनिर्मुक्तो ब्रूयात्स कथमन्यथा । 9

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अभावादीश्वरस्यैवं जगत्सृष्टिः कथं भवेत् ।

अचैतन्यात्प्रभासस्या अज्ञात्वा पुरुषस्य च । 10

प्रधानपरमाह्लादि यावत्किञ्चिदचेतनम् ।

न कर्तृत्वं न्यवसद्दृष्टं सान्निध्यमकरणं विना । 11

तथा ज्ञास्यद्दृढभावेन सत्र निरोषितेन ते ।

त्रिस्यवयं धर्माधर्मौपदेशश्च बन्धमोक्षाविचारणम्

~~च~~ न सर्वज्ञं विनापुण्यामादिगर्भः प्रसिद्ध्यति । 12

तत्र वैद्यं विनाक्रान्ताः कृश्यन्ते रोगिणो यथा ।

शिवं विना नराक्रान्तं जगत्सर्वं सदा भवेत् । 13

असत्यस्मिन्जगन्नाथे तमोभूतमिदं जगत् ।

सूर्येणेव विहीनं हि निरालोक . . . । 14

123a यथानादिप्रवृत्तोयं घोरस्संसारसागरः ।

शिवोपि हि यथानादिस्संसारान्मोचकस्स्थितः । 15

व्याधीनां भेषजं यद्वत्प्रतिपक्षस्वभावतः ।

तद्वत्संसारदोषाणां . . . तः । 16

तस्मादनादिस्सर्वज्ञः परिपूर्णः पराश्शिवः ।

अस्ति नाथः परित्राता पुंसां संसारसागरात् । 17

येभ्यस्सन्ति शिवज्ञानं शिवोक्तं शिवभाविताः ।

ते भवन्ति शिवाश्शान्ता भ त्यभाविताः । 18

यदिचेत प्रमाणस्था दानं सर्वत्र भाषितम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

किं प्रमाणं ततो ग्राह्यं ब्रूत पश्यामहे बुधाः | 19
वाक्यलिङ्गा हि वक्तारः क्रियालिङ्गाश्च कारकाः |
तस्मात्स्वेनैव लिङ्गेन विज्ञेयास्तद्गुणा बुधैः | 20
आगमत्वेऽपि सामान्ये कः प्रद्वेषः शिवागमे |
अनायासेन यत्रोक्ता मुक्तिरेकेन जन्मना | 21
सर्व क्षारागमुत्सृज्य गुणेष्वाधीयतां मनः |
यतो गुणास्ततः पुंसां कल्याणं सततं स्थितम् | 22
युक्तं चैतद्गुणैस्सर्वैर्यस्माज्ज्ञानं शिवात्मकम् |
तस्मात्तद्देदभरस्य यद्यस्ति गुणगौरवम् | 23
अत्यासन्यानि सुकरमितीव च महाफलम् |
कः प्राज्ञः कार्यमुत्सृज्य दीर्घसूत्रं समाददेत् | 24
मध्यवर्ती पर्वतं कश्चिद्दूरं संप्रस्थितश्शनैः |
यद्यर्के मधु संपश्येत्किमर्थं पर्वतं व्रजेत् | 25
एवमेकैकभविकां विमुक्तिं पुरतस्स्थिताम् |
विहायसैकभविकां कः प्राज्ञः प्रतिपत्स्यते | 26
यद्यन्यत्रागतः कालस्तत्र तज्जन्म गच्छताम् |
124 जिज्ञास्यतां यन्तावन्मुक्तिरेकेन जन्मना | 27
यदि नाम न मुक्तिस्याद्देकेनैवात्र जन्मना |
अनेकभाविका मुक्तिर्भवतां केन वार्यते | 28
तस्माद्यत्रैकभविकां मुक्तिर्ज्ञानेन निश्चिता |

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तच्छ्रुत्वा क्रियतां नित्यमप्रत्ययश्चास्य मुक्तिषु ।
यदा समीपे दूरे च सदृशं भोजनद्वयम् । 29
सत्काले च विकाले च भोक्ता चापि बुभुक्षितः ।
तयोर्गृह्णाति कर्तारः कथयन्ति विपश्चितः । 30
समीपे यदि मन्येत मुक्तिं मुक्तिमेकां शिवात्मिकाम् ।
सैन्मार्गोपि च दृष्टान्तस्स्वयमुत्प्रेक्ष्य युक्तितः । 31
वक्तव्यं प्रतिबोधार्थं कार्याकार्यविवेकिनाम् ।
इति ये परमं शान्तं प्रतिपन्ना महेश्वरम् । 32
ते लभन्ते सुखेनैव विमुक्तिं भवसागरात् ।
अकर्ता ज्ञः पशुः भोक्ता विभुर्नित्यश्चेतनाश्शुभः । 33
किञ्चित्कर्ता न किञ्चिज्ज्ञः पुरुषः पञ्चविंशकः ।
स करोति पतस्सर्वं स्वभोग्यं यः करोति च । 34
अस्वातन्त्र्यादकर्तायं किञ्चित्कर्ता नरन्धवत् ।
स वेत्ति तत्त्वतस्सर्वं तेनाज्ञः पुरुषः पशुः । 35
बुद्ध्यध्यवसितं ज्ञानं ज्ञानं तत्किञ्चिदुच्यते ।
अचेतनं विभुं सूक्ष्मं भोग्यं साधारणं ध्रुवम् । 36
चतुर्विंशत्कठोरं च प्रधानं गुणलक्षणम् ।
124a पुंसां भोगापवर्गार्थमीश्वरेच्छा प्रचोदितम् । 37
प्रधानार्थभव रुद्रः तलो विष्णुः पितामहः ।
सत्कार्यकरणोपेतास्सुविशुद्धा महाबलाः । 38

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

जगतः कारणत्वं च त्रयो देहव्यवस्थिताः ।
प्रधानाद्भवद्बुद्धिः जगद्धेतुः शिवेच्छया ।39
बन्धेरपि च संक्षोभात् अहंकारस्त्रिधा भवेत् ।
(त्रीणीन्द्रियाणि च)
अहंकाराच्च सूक्ष्माणि तस्मात्राणि द्रियाणि च ।40
सूक्ष्मेभ्यः पञ्चभूतानि तेभ्य स्थूलमिदं ~~भवेत्~~ जगत् ।
चतुर्विंशकमव्यक्तं पुरुषः पञ्चविंशकः ।41
रुद्र षड्विंशकः प्रोक्तः शिवश्च परमास्थितः ।
सप्तविंशक श्शान्तः सुसूक्ष्मः परमेश्वरः ।42
स्वर्गापवर्गयोर्दाता तं विज्ञाय विमुच्यते ।
ज्ञानेन हि भवेन्मुक्तिर्न च यस्यास्ति संशयः ।43
समुक्तिप्रत्ययार्थाय शिवयोगं समभ्यसेत् ।
योगसिद्धैकदेशोऽपि दृष्टमोक्षे भवेन्मतिः ।44
दृष्टमेतन्मया यद्वो मोक्षस्तद्ध्रुवं भवेत् ।
न केवलं हि योगेन मुक्तिस्संप्रत्ययो भवेत् ।45
तदक्षगुणमैश्वर्यं योगाभ्यासात्प्रवर्तते ।
ध्याता ध्यानं तथा ध्येयं यच्च ध्यानं प्रयोजनम् ।46
एतच्चतुष्टयं ज्ञात्वा योगं युंजीत योगवित् ।
ज्ञानवैराग्यसंपन्नश्श्रद्धाधान क्षमान्वितः ।47
शिवभक्तस्सदोत्साही यातेर्थे पुरुषस्स्मृतः ।
125 ध्यै चिन्तायां स्मृतो धातुः शिवचिन्ता मुहुर्मुहुः ।48

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

~~125~~ ज्ञानेन परिशुद्धेन ज्ञानध्यानमिदं स्मृतम् ।
सकलस्सतनुश्शान्तः सर्वज्ञः सर्वतः प्रभुः । 49
नानारूपविशुध्यर्थं नानासिध्यर्थमीश्वरः ।
निमुक्तिः प्रत्ययः पूर्वमैश्वर्यं चाणिमादिकम् । 50
इत्येतद्द्विविधं ज्ञेयं शिवध्यानप्रयोजनम् ।
युज्यते तेन पुरुषः शिवस्संयोजकस्स्मृतः । 51
फलेन योजकस्तस्माद्ध्यायेत्सततमीश्वरम् ।
स्वदेहायतनस्यान्तः मनसा स्थाप्य शंकरम् । 52
हृत्पद्मपीठिकामध्ये ध्यानज्ञानेन योजते ।
नाजीर्णामूरनोद्वारे न च विण्मूत्रबाधने । 53
नश्च ध्यानातिसारे च नातिभुक्तश्रमान्वितः ।
नचातिकर्मनिरतश्चिन्ताव्याकुलितेन्द्रियः । 54
न निद्रागुरुकार्ये वा नचातिक्षुत्पिपासितः ।
सदंशमशकाकीर्णे न च प्राणिसमन्विते । 55
श्मशाने चैत्यवल्मीके सर्पश्वापदसेविते ।
नदीसमुद्रतीरे वा नजलाश्रयसन्निधौ । 56
जीर्णोद्यानगृहावासे भयस्थाने न चिन्तयेत् ।
सुस्निग्धाल्पान्नभोजी च पानलाहारवर्जितः । 57
युक्ताहारविहारात्मा युक्तचेष्टः स्वकर्मसु ।
125 a युक्तनिद्राप्रबोधश्च युक्तायुक्तविवर्जितः । 58

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

श्रद्दधानः क्षमा नित्यं यावदर्थपरिच्छदः ।
स्थितश्शिवाश्रमे गुह्ये निश्शब्दे जनवर्जिते । 59
पुष्पाद्यादितरुच्छन्ने पूर्वोक्तावसथान्विते ।
सुप्रलिप्ते वने रम्ये गन्धपुष्पादिवासिते । 60
नानाकुसुमसमाकीर्णे वितानध्वजशोभिते ।
आसन्नकूलसंपूर्णे सितवस्त्रावकुण्ठितम् । 61
व्याघ्रकृष्णाजिनं नाथ विन्यसेन्मृदुचर्मणा ।
पद्मकस्वस्तिकादीनामभ्यसेदासने दृढे । 62
तथाचार्यं नमस्कृत्वा शिवं देवीं गणाधिपम् ।
ऋजुग्रीवशिरोवक्त्रो नातिकुञ्चितलोचनः । 63
किञ्चिदुन्नमितशिरा दन्तैर्दन्तान्न संस्पृशेत् ।
दन्ताग्रसन्निधौ जिह्वामचलां सन्निवेश्य च । 64
पार्ष्णिभ्यां वृषणौ रक्ष्यं तथा प्रजननं पुनः ।
ऊर्वोरुपरि संस्थाप्य बाहू युक्तानुसौष्ठवम् । 65
दक्षिणं करपृष्ठं तु न्यसेद्वामतलोपरि ।
ईषदुन्नमितस्य पृष्ठं तु उरस्तम्भ्य चाग्रतः । 66
संप्रेक्ष्य नासिकाग्रस्थं दिशश्चानवलोकयेत् ।
संगृह्य सर्वतोक्षीणि पाषाण इव निश्चलः । 67
126 मैत्र्यादिवासनायुक्तः परं वैराग्यमाश्रितः ।
अमार्गेणापि यो योगं श्रद्दधानस्समभ्यसेत् । 68

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सोऽपि कालेन बहुना ध्रुवं योगमवाप्नुयात् ।
गच्छन्तिष्ठन् स्वपन् जाग्रन् निमिषन्नुन्मिषन्नपि । 69
शुचिर्वाप्यशुचिर्वापि शिवं सर्वत्र चिन्तयेत् ।
स्वदेहायतनं शान्तं मनसा स्थाप्य शङ्करम् । 70
हृत्पद्मपीठिकामध्ये ध्यानमार्गेण पूजयेत् ।
ध्यानं यज्ञः परः शुद्धः सर्वदोषविवर्जितः । 71
इष्ट्वा मुक्तिमवाप्नोति बाह्यैः स्थूलैश्च साधकैः ।
हिंसादिदोषमुक्तत्वाद्विशुद्धं चित्तसाधनम् । 72
ध्यानयज्ञः परस्तस्मादपवर्गफलप्रदः ।
तस्मादशुद्धं स्वर्गीयमनित्यं बाह्यसाधनम् । 73
यज्ञाद्यं कर्म सन्त्यज्य योगं मुक्त्यर्थमभ्यसेत् ।
विकारयुक्तमव्यक्तं भोग्यभोगसमन्वितम् । 74
चिन्तयेद्धृदये पूर्वं क्रमाद्वापि गुणत्रयम् ।
तमः प्रच्छाद्य रजसा रजस्सत्वेन छादयेत् । 75
ध्यायेत्त्रिमण्डलं पूर्वं कृष्णं रक्तं सितं क्रमात् ।
सत्वोपरि गुणातीतं पुरुषं पञ्चविंशकम् । 76
ध्येयमेतदशुद्धं च त्यक्त्वा शुद्धं विचिन्तयेत् ।
126 a ऐश्वरं पङ्कजं दिव्यं पुरुषोपरि संस्थितम् । 77
द्वादशाङ्गुलविस्तीर्णं शुद्धं विकसितं सितम् ।
नालमष्टाङ्गुलं तस्य नाभिकन्दसमुद्भवम् । 78

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

पद्मपत्राष्टकं ज्ञेयमणिमादिगुणाष्टकम् ।
तत्कर्णिका च वैराग्यं नालं ज्ञानं शिवात्मकम् ॥ 79
शिवधर्मं च तत्कन्दमिति पद्मं विचिन्तयेत् ।
तद्धर्मज्ञानवैराग्यं शिवधर्ममयं परम् ॥ 80
ज्ञात्वा पद्मासनं शार्वं सर्वदुःखान्तमाप्नुयात् ।
तत्पद्मकर्णिकामध्ये शुद्धदीपशिखाकृतिम् ॥ 81
अङ्गुष्ठमात्रमचलं ध्यायेदोङ्कारमीश्वरम् ।
कदम्बगोलकाकारं ताररूपमिव स्थितम् ॥ 82
ध्यायेद्वा रश्मिजालेन दीपमानं समन्ततः ।
ध्यात्वा वा सततं शान्तं वक्ष्यमाणैकरूपिणम् ॥ 83
प्रधानपुरुषातीतं स्थितं पद्मस्थमीश्वरम् ।
जपेद्ध्याये~~च्च~~ सततमोंकारं शिवरूपिणम् ॥ 84
वाच्यवाचकभावेन मात्रा यत्र विभागतः ।
मात्रास्तिस्रः समाख्याताः तथा देवी महेश्वराः ॥ 85
क्रमान्मात्रास्समुद्दिष्टाः तत्पराश्चार्धमात्रया ।
भावनामात्रगम्यत्वादचिन्त्यः परमेश्वरः ॥ 86
127 सकलं चिन्तयेत्तस्मात्सिद्ध्यर्थं सततं शिवम् ।
अथवा व्यक्तमव्यक्तं पुरुषं चेत्यनुक्रमात् ॥ 87
~~अव्यक्तं च धियं भूमिमूर्ध्वं गच्छेत्कथं सुना ।~~
~~सिद्धे सर्वेश्वरे देवे शुभापत्तोऽप्रवर्तते ।~~

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

श्रीकण्ठनादं वरदं चतुर्वेदपरं हरम् ।
ध्यायमानस्य सततमैश्वर्यं संप्रवर्तते । 188
केचित्क्षित्यादितत्त्वानां जयमिच्छन्त्यनुक्रमात् ।
अजितेनैव धरां भूमिमूर्ध्वं गच्छेत्कथं मुना । 189
सिद्धे सर्वेश्वरे देवे युगपत्संप्रवर्तते ।
ऐश्वर्यं सर्वतत्त्वेषु तज्ज्ञेयं च न संशयः । 190
मनःस्थित्यर्थमिच्छन्ति स्थूलध्यानमनुक्रमात् ।
तत्र तं निश्चलीभूतं लभेत् सूक्ष्मेति संस्थितम् । 191
स्थित्यर्थं मनसा शर्वं स्थूलं पूर्वं विचिन्तयेत् ।
नानारूपकृतैर्भेदैः न तत्तत्त्वमचेतनम् । 192
यच्चिनाधिष्ठितं रूपं तद्ध्यानं पापशुद्धिदम् ।
मनःस्थितिकरं चाशु न तत्तत्त्वमचेतनम् । 193
तस्माद्ध्येयानि सर्वाणि त्यक्त्वा ध्यायेन्महेश्वरम् ।
तत्सिद्धा सर्वतास्सिद्धिर्न सर्वास्सिध्यते शिवः । 194
यदा शिवात्मकं रूपं ध्यायन् प्राणैर्वियुज्यते ।
तदा स शिवतां याति नान्यद्ध्यायेन्महेश्वरात् । 195
यच्च तत्त्वं दैवतं वा ध्यायेदभ्यासकारणात् ।
127a तत्तदीश्वररूपेण तत्र ध्यायेदधिष्ठितम् । 196
मेरुसंस्थं क्षितौ शर्वं ध्यायेद्भवमुमापतिम् ।
अग्नेरधिष्ठितं रुद्रमुग्रं पवनमूर्तिकम् । 197

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आकाशाधिपतिं भीममीशानं सूर्यसत्पतिम् ।
चन्द्राधिपं महादेवं पुंसां पशुपतिं शुभम् । 98
अहंकारे स्मरेदीशं बुद्धा (द्धौ) सर्वज्ञमीश्वरम् ।
(गुजे) प्रज्ञे प्रकृत्यासनं शान्तं ध्यायेत परमेश्वरम् । 99
भूतसिद्धौ भवेत्सिद्धिं मुनेस्तन्मात्रपञ्चके ।
बुद्ध्यहंकारसिद्धस्य शिवत्वं प्रकृतं भवेत् । 100
यत्रस्थं येन ~~भ~~ रूपेण शिवरूपमनुस्मरेत् ।
लक्षयेन्मनसा धीर्यं तत्र ध्यायेत्पुनः पुनः । 101
• शुद्धस्फटिकसंकाशं जटामकुटमण्डितम् ।
प्रसन्नवदनं शान्तं भस्मनाचोपशोभितम् । 102
सितपङ्कजमध्यस्थं समाधिस्थं त्रिलोचनम् ।
पद्मासनस्थमचलमीषत्संवृतलोचनम् । 103
सबीजपूरककरं वरदाभयपाणिनम् ।
(प) द्विपिचर्माम्बरधरं मञ्जमालाधरं हरम् । 104
प्रभाकिरणवर्षन्त भा(मा)भासितदिगास(न)नम् ।
संसारार्णवपर्यन्तं पुरुषातीतकारणम् । 105
इत्थं रूपं शिवं ध्या(ये)त्प्रति तत्त्वमनुक्रमात् ।
127 अष्टाङ्गुलप्रविस्तीर्णं यथास्यान्मनसि स्थितिः । 106
रूपवर्णप्रमाणाभ्यां परिकल्प्यात्मबुद्धिना ।
तथा स्मरेत्तु देवेशं यथा चित्तं स्थिरं भवेत् । 107

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शिवेनाधिष्ठितं यस्माज्जगत्सर्वं चराचरम् ।
सर्वरूपशिवस्तस्मादिति ज्ञात्वा स मुह्यति ।। 108
प्राणायामैस्सुसंपूर्णैः कुर्याद्वा निश्चलं मनः ।
सर्वसङ्गविनिर्मुक्तः सेवेत विजनं पुनः ।। 109
उत्साहान्निश्चयाद्धैर्यात्सन्तोषात्तत्त्वदर्शनात् ।
मुनेर्जनपदत्यागात् षड्भिर्योगं प्रसिध्यति ।। 110
प्राणायामं प्रत्याहारः प्रतिस्थानं च धारणम् ।
ध्यानं जपस्समाधिश्च षड्विधो योग उच्यते ।। 111
(सुइश)
प्राणो वायुश्शरीरस्थस्तदायामो निरोधनम् ।
रेचकः पूरणश्चैव कुंभकश्च प्रकीर्तितः ।। 112
नासिकापुटमङ्गुल्या प्रपीड्यैकं परेण तु ।
जठरं रेचयेद्वायुं रेचनाद्रेचकस्स्मृतः ।। 113
बाह्येन वायुना देहं दृतिवत्पूरयेत्क्रमम् ।
तथा पूर्णश्च सन्तिष्ठेत् पूरणात्पूरकस्स्मृतः ।। 114
न मुञ्चति न गृह्णाति वायुमन्तर्बहिस्थितम् ।
संपूर्णकुंभवत्तिष्ठेदचलस्स तु कुंभकः ।। 115
कन्यसस्तु द्युद्धूतः स च द्वादशमात्रकः ।
मध्यमश्च द्विरुद्धूतः चतुर्विंशतिमात्रकः ।। 116
उत्तमश्च त्रिरुद्धूतः षट्त्रिंशत्कालमात्रकः ।
127a स्वेदकम्पाभिघातस्तु जनकश्चोत्तमोत्तमः ।। 117

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

अजित्वा नारुदेन्द्रभूमिं  वायोरुत्तमकांक्षया ।
अजित्वारोहणाद्भूमे अंशु जायास्त्युपद्रवाः । ।118
हिक्का श्वास प्रतीकार तिश्याय कर्णदन्ताक्षिवेदना ।
मूकताजडता कासः शिरोरोगश्रमज्वरः । ।119
इत्येवमादयो दोषा जायन्ते व्युत्क्रमेण तु ।
सर्वरोगचिकित्सां तु संक्षेपाच्छृणु योगिनः । ।120
यस्मिन्यस्मिन् भवेदङ्गे व्याधीनामत्र संभवः ।
ततस्तं व्याधिना व्याप्तं धारयेदत्र धारणम् । ।121
अग्नेयीं धारणाध्याये द्रोगे वायव्य वारुणे ।
वायव्याग्नेय (ग्ने) दोषे च विषदोषे च सर्वतः । ।122
अमृतं चिन्तयेत्प्राज्ञः क्षुत्पिपासा ज्वरस्तथा ।
अन्योन्याभिभवादेवं ज्ञात्वा कुर्वीत धारणाम् । ।123
ध्यानेनैव प्रणश्यन्ति ये रोगा रोगसंभवाः ।
भेषजैर्जपहोमैश्च नान्यैः पुण्यैश्च कर्मभिः । ।124
यदारण्ये गजेन्द्रोयं कुरुपैरप्रयोगतः ।
नाशये द्धार्यमाणोपि तथा वायुरकुदेभिः । ।125
नचैव हि यथा नागाः प्रयो दृश्यते शनैः ।
128 निर्दोषश्च भवेत्कालाद्दश्यस्सात्म्यश्च जायते । ।126
शनैश्शनैस्तथा प्राणः प्रयो (गा) दश्यतां गतः ।
स्वेच्छया धार्यते देहे नहि दोषं करोति च । ।127

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

यथा प्रमोचितो नागः परसैन्यं विनाशयेत् ।
रक्षते च प्रयोक्तारं मारूढं स्वबलेन च ॥128
तथा शरीरे संबद्धः प्राणस्सम्यक् प्रचोदितः ।
निर्दहेत् सर्वपापानि तच्छरीरं च रक्षति ॥129
प्राणे हि निर्जिते देहचिह्नान्येतानि लक्षयेत् ।
विण्मूत्रश्लेष्मदोषाणामल्पीभावः प्रजायते ॥130
बहुभोजनसामर्थ्यं चिरादुच्छ्वसतं पुनः ।
आरोग्यं शीघ्रगामित्वमुत्साहस्वरसौष्ठवम् ॥131
बलं वर्णप्रसादश्च सर्वदोषक्षयस्तथा ।
एवमादीनि चिह्नानि सत्यस्थस्य भवन्ति हि ॥132
आलस्यं व्याधयस्तीव्राः प्रमादान्न च संशयः ।
अनवस्थितचित्तत्वमश्वत्थामादिदर्शनम् ॥133
दुःखानि दौर्मनस्यत्वं विषयेष्वतिलोलता ।
इत्येवमादयो दोषाः यो . . . करा नृणाम् ॥134
अगर्भश्च सगर्भश्च प्राणायामो द्विधा स्मृतः ।
जपस्थानं विना गर्भस्सगर्भः तत्समन्वितः ॥135
अगर्भा दुर्भवान्मोक्षो जपध्यानसमन्वितः ।
128 a सगर्भं धारयेत्तस्मादिन्द्रियाणि यजेत्पुनः ॥136
समस्तेन्द्रियवृत्तिश्च प्राणो वायुः प्रकीर्तितः ।
तज्जयादिन्द्रियाण्येव निर्जितानि भवन्ति हि ॥137

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

वृत्तिः प्रवृत्तिमयो यस्माद्धर्मेरः परिकीर्तितः |
तस्माद्वृत्तिजयादेव वृत्तिमान् निर्जितो भवेत् | 138
ज्ञानवैराग्ययोगाभ्यां प्राणायामकृशेन च |
इन्द्रियाणि विनिर्जित्य सर्वमेव जितं भवेत् | 139
इन्द्रियाण्येव तत्सर्वं यत्स्वर्गनरकावुभौ |
निगृहीतविसृष्टानि स्वर्गाय नरकाय च | 140
शरीरं रथमित्याहुः इन्द्रियाण्यस्य वाजिनः |
सारथिः पुरुषः प्रोक्तः प्राणायामः कशा स्मृतः | 141
ज्ञानवैराग्यरज्जुभ्यां सुसंयम्य कृतं मनः |
शनैर्निश्चलतां याति प्राणायामकशाहता | 142
मनोवाजिनमत्युग्रं निगृह्णीयात्पुनः पुनः |
(स) न निर्वेदमुनिर्गच्छेत्कुर्यादेवात्मनो हितम् | 143
जलबिन्दुं कुशाग्रेण मासे मासे तु यः पिबेत् |
संवत्सरशतं साग्रं प्राणायामश्च तत्समः | 144
तपांसि यानि कीर्त्यन्ते यज्ञदानव्रतानि च |
सर्वतीर्थाभिषेकश्च प्राणायामश्च तत्समः | 145
129 [तपांसि यानि कीर्त्यन्ते ]
प्राणस्यैव जयो योगः प्राणस्यैव जयस्तपः |
प्राणस्यैव जयात्सर्वं प्राप्यते नात्र संशयः | 146
अथ प्रत्याहरेच्चित्तं प्रसृतं भोगतृष्णया |

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

मनदोषविकारेण कूर्माङ्गानीव सर्वतः । /147
उद्धरेदात्मनात्मानं मुह्यमानमनाथवत् ।
भोगस्त्वरते वेगे नज्ञान फलनमाश्रितः । /148
इन्द्रियाणि प्रसक्तानि प्रतिस्वविषयोदधौ ।
आहृत्य यं निगृह्णाति प्रत्याहारस्स उच्यते । /149
एवं संज्ञान्तचित्तात्मा प्रत्याहारमुपक्रमेत् ।
स सर्वतीर्थानां यज्ञानां फलं प्राप्य शिवं व्रजेत् । /150
यद्वा द्वावर्तये लक्षान् स तस्माच्चालयेत्फलः ।
तावत्कालं प्रवेशोऽन्य धारणा मनसः स्थितिः । /151
कालावधिपरिच्छिन्नां देशे संस्थापितं पुनः ।
न प्रच्यवते लक्ष्याद्धारणा साभिधीयते । /152
धारणा द्वादशाया गा ध्याना द्वादशधारणम् ।
ध्यानं द्वादशकं यावत् स्माधिरस्सोभिधीयते । /153
आत्मनस्तमनस्कस्य मुक्ता शेषोपधस्यच ।
शिवचिन्तासमासक्ते ध्यानं नाम तदुच्यते । /154
ध्यायेच्चलितचित्तस्य सदृशप्रत्ययस्य च ।
प्रत्ययान्तरनिर्मुक्तः प्रवाहो ध्यानमुच्यते । /155
129 a ध्येयावस्थितचित्तस्य प्रदेशे यत्र कुत्रचित् ।
ध्यानं (तेभ्रत) मुद्दिष्टं . . . । /156
एवं ध्यानसमायुक्तः स्वदेहं यः परित्यजेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कुल..र्जन्मित्रायाः समुद्धृत्य शिवं व्रजेत् । 157
एवं मुहूर्तमर्धं वा ध्यायते श्रद्धया शिवम् ।
सोपि यां गतिमाप्नोति न तां सर्वैर्महामखैः । 158
यावन्तः कर्मयज्ञास्स्युर्दानानि च तपांसि च ।
सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीम् । 159
माहात्म्यं जपयज्ञस्य निकृष्टस्यैव कीर्तितम् ।
उपांशु स्याच्छतगुणः सहस्रो मानसस्स्मृतः । 160
यदुच्चनीचस्वरितैः शब्दैः स्पष्टपदाक्षरैः ।
मन्त्रमुच्चारयेद्वाच्या जपयज्ञस्स वाचिकः । 161
शनैरुच्चारयेन्मन्त्रमीषदोष्ठौ प्रचालयेत् ।
किञ्चिच्छब्दं स्वयं वि.. द्युपांशुस्स जपस्स्मृतः । 162
धिया यदक्षरश्रेण्या वर्णाद्वर्णं पदात्पदम् ।
शब्दार्थचिन्तयाभ्यन्त स उक्तो मानसस्स्मृतः । 163
त्रयाणां जपयज्ञानां श्रेयस्स्यादुत्तरोत्तरम् ।
जपेयस्तु विशेषाच्च विशेषस्तत्फलं स्मृतम् । 164
130 जपेन देवता नित्यं स्तूयमाना प्रसीदति ।
प्रसन्नो विपुलान्भोगान् दद्यान्मुक्तिं च शाश्वतीम् । 165
यक्षरक्ष(ः) पिशाचाश्च ग्रहास्सर्पादि भीषणाः ।
जापिनं नोपसर्पन्ति भयाद्भीतास्समन्ततः । 166
जपात्पापक्षयं यावद्दशोपं तत्कृतं भवेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

जपेन रोगा नश्यन्ति मृत्युरप्यपसर्पति 1.167
जपेन सिद्धिं लभेत मुक्तिं च जपतत्परः ।
जपाच्छ्रान्तः शिवं ध्यायेत् ध्यानच्छ्रान्तः पुनर्जपेत् । 168
जपध्यानाभियुक्तस्य क्षिप्रं शिवः प्रसीदति ।
यद्यन्त्रमात्र (मन्त्र) निर्भासं (न) स्थिमितोदधिवत्स्थितम् । 169
स्वरूपशून्यवद्ध्यानं तत्समाधिरिहोच्यते ।
ध्येये मनस्संनिवेश्य सन्निष्ठे तन्मात्रस्थिरम् । 170
निर्वाणनलवद्योगी समाधिस्थः प्रकीर्तितः ।
न शृणोति न चाघ्राति न रसयति न पश्यति । 171
न च स्पर्शं विजानाति न संकल्पयते मनः ।
न चाभिमन्यते किञ्चित् न च बुध्यति काष्ठवत् (का) । 172
एवमीश्वरसंलीनः समाधिस्थः प्रकीर्तितः ।
यथा दीपो निवात(न)स्थो नेङ्गते सोपमा स्मृता । 173
ध्यायतश्शिवमात्मस्थमात्मनिष्ठस्य योगिनः ।
प्राणायामाद्(र्ध)भवेत्क्षिप्रं सर्वपापपरिक्षयः । 174
सर्वेन्द्रियवशीकारः प्रत्याहारेण जायते ।
130a मनसः परमं धैर्यं धारणान्तत्प्रवर्तते । 175
ध्यानेन प्रकर्षं गच्छेत् ज्ञानैश्वर्यगुणा . .
प्रासादाभिमुखा प्रीतास्सन्ति जप्येन देवताः । 176
समाधिना च सर्वत्र प्रज्ञां लोकः प्रवर्तते ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एवमभ्यस्यतः पुंसः षडङ्गं योगसाधनम् । 177
तस्यान्तराया नश्यन्ति मृगास्सिंहभयादिव ।
आलस्यं .. यस्तीव्राः प्रमादास्थानसंशयाः । 178
अनवस्थितचित्तत्वमश्रद्धा भ्रान्तिदर्शनम् ।
दुःखानि दौर्मनस्यं च विषयेष्वतिलोलता । 179
इत्येवमादयः प्रोक्ताः योगविघ्नास्स्वभावतः ।
अत्यन्तोत्साहयुक्तस्य जपध्यानरतस्य च । 180
तदन्तराया नश्यन्ति विघ्नास्सर्वे शनैश्शनैः ।
(षु)
उपशान्तेष्वन विघ्नेषु समाधिस्थस्य योगिनः । 181
उपसर्गाः प्रवर्तन्ते दिव्यास्ते सिद्धिसूचकाः ।
न्या
प्रतिभा श्रावणा वार्ता दर्शनास्वादवेदनाः । 182
षडस्सूपसर्गा योगस्य परित्यागाश्च सिद्धयः ।
प्रार्थयन्ति च तं देवं दिव्यैर्भोगैश्च योगिनः । 183
नृपाश्च वृद्धिपीठाभै धनैश्चान्यैर्धनाधिपाः ।
131 उपतिष्ठन्ति रत्नानि धनानि च महान्ति च । 184
वेदाश्च सर्वशास्त्राणि स्वयमेव भवन्ति च ।
ऋषयस्सिद्धसंघाश्च वशे तिष्ठन्त्यभीप्सुताः । 185
सदा महोदधिकृतज्ञायन्ते विघ्नयोगतः ।
योगैश्च योदधिस्तदन्दि प्रपञ्चः प्रतिभादयः । 186
प्रतिभादिषु क्षुद्रेषु गुणेष्वासक्तचेतनः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

न भवेत्परमैश्वर्यमक्षयं सर्वकामिकम् | 187
तस्माद्गुणांश्च भोगांश्च देवासुरमहीभृताम् |
तृणवद्यजते स्सानीशस्तस्य च प्रसीदति | 188
ततः प्रदेशो देवेशो बुद्धिस्सर्वं प्रवर्तते |
अणिमादिगुणैश्वर्यं सर्वज्ञत्वं च योगिनः | 189
सर्वज्ञः सन् तनुं त्यक्त्वा शुद्धश्शान्तस्सदा सुखी |
निर्द्वन्द्वः परिपूर्णश्च मुक्तस्स्वात्मनि तिष्ठति | 190
अनुग्रहाय लोकानां यदि भेदं न संत्यजेत् |
अणिमादिगुणैर्युक्तः सति श्छिववत्प्रभुः | 191
तदा हर्ता च कर्ता च भोक्ता च प्रकृतेर्वशी |
ज्ञानं सदोपदेशश्च सुज्ञाना प्रतिच्चेतना | 192
..वमिच्छया भोगान् भुक्त्वा ज्ञानं प्रकाशयंश्च |
प्रलयान्ते तनुं त्यक्त्वा स्वात्मन्येवावतिष्ठते | 193
यस्मात्सौख्यं च मोक्षं च योगाद्द्वयमाप्नुयात् |
131a तस्मात्सर्वं परित्यज्य जपेद्ध्यायेच्च शंकरम् | 194
ये संश्रिता ज्ञानमया - . .
प्रयान्ति पारं भवसागरस्य . |
तिष्ठन्ति मग्ना भवसागरेस्मिन्
पुत्रेषु दारेषु गृहेषु सक्ताः || 195
ज्ञानेन सौख्यं परमं च मोक्षं

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विन्दन्ति सर्वे करुणास्त्रयश्च ।

अनेन देहेन लभन्ति केचित्

सिद्धांश्च भोगान् प्रलयेषु मुक्तिम् ॥ 196

इमं परं पापहरं पवित्रं

ज्ञानामृतं मृत्युविनाशनं च ।

विज्ञाय यः प्राणिहिताय दद्या-

ज्जगद्गुरुस्तेन समः कुतोऽन्यः ॥ 197

स एव सद्यः प्रतिपूजनीयः

स एव माता जगतः पिता च ।

स एव बन्धुस्स गुरुश्शिवश्च

ज्ञानामृतं यः परमं च (वि) दद्यात् ॥ 198

॥ इति शिवधर्मोत्तरे ज्ञान-

योगो नाम दशमोऽध्यायः ॥

श्री साम्बसदाशिवा-

र्पणमस्तु ॥

। शिव ॥

[illegible] ॥

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

॥ श्रीः ॥

॥ अथ एकादशोऽध्यायः ॥

132 ॥ शिवाय गुरुपरब्रह्मणे नमः ॥

अथ पापविशुद्ध्यर्थं प्रायश्चित्तं समाचरेत् ।
कृत्वा शौचं तथा स्नानं शिवाग्निगुरुपूजनम् ॥ 1
उत्थाय पश्चिमे यामे सुगृहीतकमण्डलुः ।
धौतपादुकमाक्रामन् मूत्रं कुर्याद्यथाक्रमः ॥ 2
दक्षो विनीतचित्तज्ञो भस्मोदकनिधानवित् ।
स्वशानशौचकार्येषु तदभावे कमण्डलुः ॥ 3
वाचं नियम्य यम्याय नैष्ठीवनोत्सवर्जितः ।
शिरः प्रावृत्य तत्कुर्याद्दन्तर्धाय तृणैर्महीम् ॥ 4
दिवा सन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः ।
कुर्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः ॥ 5
मार्जनं वामहस्तेऽपि वीरणाद्यैरयाज्ञिकैः ।
न विण्मूत्रमुदीक्षेत तच्छायामात्मनोऽन्य ॥ 6
नाग्निलानलदेवाना गोब्राह्मणजलं प्रति व ।
जन्कुशाकृल भस्मास्थि कृपिच्छायां विवर्जयेत् ॥ 7
पादावनेपनं मूत्रपुरीषं ष्ठीवनं च यत् ।
दूरादावसथात्कुर्याद्यत्नान्यन्निकृतं भवेत् ॥ 8
गृहीतशिश्नश्चोत्थाय समायुक्तकमण्डलुः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शौचं कुर्यान्मृदंभोभिः गन्धलेपविमुक्तये । ९

132a तिस्रो लिङ्गे मृदो योज्यास्त्वेकैकान्तरमृत्तिका ।

आमलीफलमात्रं तु . . . . मृ । १०

मृद्भिस्तिस्रः कराभ्यां तु मूत्रोत्सर्गे भवेच्छुचिः ।

पञ्चापाने मृदो योज्याः तिस्रश्चान्तरमृत्तिकाः । ११

~~अक्षिणी नासिका कर्णौ तिस्रः संशोध्य हस्तयोः~~ +

दशवामकरे योज्याः पाण्योस्सप्त तथोभयोः ।

उपस्पर्शनकाले तु तिसृभिश्शौचये करौ । १२

जङ्घाशौचे मृदः तिस्रो एकैकान्तरमृत्तिकाः ।

अक्षिणी नासिका कर्णौ तिस्रः संशोध्य हस्तयोः । १३

संवाह्यौ तिसृभिर्हस्तौ मृद्भिस्सम्यक् जलेन तु ।

कर्दमामेध्यमूत्राद्यैः दिग्धाङ्गो स्तन(न्तप) पञ्चवा । १४

क्षालिते वारिणा मृद्भिस्त्रिस्त्रश्चान्तरमृत्तिकाः ।

आमणीबन्धाच्च करौ मृत्तोयेन विशोधयेत् । १५

अन्तः कृत्वा बहिस्सम्यक् बहिर्जानु निधायच ।

उद्धृताभिरनुष्णाभि पूताभिर्वान्यचक्षुषा । १६

हृद्गाभिरभिनाभिस्त्रिचतुर्वा समाचरेत् ।

परिमृज्य द्विरास्यं च द्वादशाङ्गानि संस्पृशेत् । १७

तूष्णीमेव ततो भूयश्शिवमन्त्रेण पूर्ववत् ।

आचामे ब्रह्मतीर्थेन ब्रह्मसूत्री ह्युदङ्मुखः । १८

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कर्णं

133 शिरः प्राश्य वृत्य (कर्णौ) च तथा मुक्ताशिखोऽपि वा ।
अकृत्वा पादशौचं च नाचामेद्दक्षिणामुखः ॥ 119
तदन्तरान्तरे वर्णिमाप्लान्याप्लाव्य चांभसा ।
वस्त्रशौचं प्रवक्ष्यामि तच्छुद्धौ शुध्यते यतः ॥ 120
वस्त्रशौच विहीना(त्मा) शुचिरप्यशुचिर्भवेत् ।
देवकार्योपयुक्तानां प्रत्यहं शौचमिष्यते ॥ 121
वासस्तामितरेषां च कार्यं शौचं मलागमे ।
शुचिना तोरणं कार्यं वंशदण्डत्रयेण तु ॥ 122
तत्र वासांसि निर्णिज्य सम्यक् बद्ध्वा पशोषयेत् ।
खगैर्वा दूषिते वृक्षे निर्मले वा शिलातले ॥ 123
दूर्वाजले शुचौ वापि क्षालितेषु तृणेषु वा ।
विण्मूत्रशुक्रदिन्धूनि मृत्तोयेन विशोधयेत् ॥ 124
कार्यमादौ ततः क्षारैः गोमूत्राद्यैर्विशोधयेत् ।
मृद्वारितावद्वा देयं तन्धदेवो हि तद्वतो ॥ 125
तस्य वान्द्रकतो यावत् सर्वासु द्रव्यशुद्धिषु ।
कौशेयविकयोः रूक्षैः क्षामाणां गौरसर्षपैः ॥ 126
श्रीफलैरंशुपट्टानां कुंभः पानामरिष्टकैः ।
चेलाव प्रक्षुवेत्राणां व - . णाम् ॥ 127
वल्कलानां च सर्वेषां शुद्धिः कार्या विजानता ।
विदलालां जपत्राणां वस्त्रवच्छुद्धिरिष्यते ॥ 128

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

133 a गोवालैर्दर्पणं चैषां विशोध . . . . . त्तैतः ।
कांस्यार्दस्ताम्ररौप्याणां त्रपुसीसकयोरपि । 29
शुद्धिः शौचार्थिनाकार्या भस्मक्षारांकुवर्णिणा ।
निर्लेपं काञ्चनं रौप्यमद्भिः पात्रं विशुद्ध्यते । 30
मणयश्मशंखशुक्तीनां शौचं तैजसवत्स्मृतम् ।
रजस्वलासूतिकाद्यैः मूत्राद्यैश्चापि दूषितम् । 31
अग्नेरपांच संयोगात् तैजसं शुद्धिमाप्नुयात् ।
शूद्रोच्छिष्टस्य पात्रस्य त्रिः कृत्वा परिमार्जनम् । 32
शोधनं भूमिकामेन कर्तव्यं तैजसस्य तु ।
द्रव्याणामिह सर्वेषां शुद्धिरुत्पवनं स्मृतम् । 33
चाल्याशतृण काष्ठानां प्रोक्षणाच्छुद्धिमाप्नुयात् ।
स्रुवादिदारुपात्राणां मुसलोलूखलस्य च । 34
शूर्पगोरआण्डानां शुद्धिरुष्णेन वारिणा ।
शृङ्गास्थि दारुदन्तानां तक्षणैः परिशोधनम् । 35
अत्यन्तोपगतानां च गोमूत्रेणोदकेन च ।
संहतानां च द्रव्याणां प्रोक्षणाच्छुद्धिरिष्यते । 36
असंहृत द्रव्यशौचं कार्यं प्रत्यात्मकं सदा ।
134 वसुधान्यादिराशीनामेकदेशस्य दूषणे । 37
तावन्मात्रं समुद्धृत्य शेषं प्रोक्षितुमर्हति ।
अंभसाल्पीयसा कार्यं भस्मना च विशोधनम् । 38

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

शाकमूलफलाद्यानां धान्यवच्छुद्धिरिष्यते ।
गोनीच्य मक्षिकाकीटक्रिमिसंस्पर्शने कृते ।139
घ्रागोपाजिघ्रणाच्छुद्धिः अन्नस्याद्भिश्च प्रोक्षणात् ।
खराश्वोष्ट्रसृगालाद्यैः विड्वराहैर्विमोहते 140
तावन्मात्रं समुद्धृत्य शेषं संस्कारयेद्बुधः ।
दीप्तोदकेन संस्पृश्य त्रिघ्रागाघृतमेव च 141
सुवर्णतोयसंस्पृष्टं शुद्धमेव न संशयः ।
मक्षिकाकेशसंमिश्रं पादेनोपहतं च यत् 142
रजः पिपीलिकायुक्तं भुञ्जानोन्नं न भक्षयेत् ।
तावन्मात्रं समुद्धृत्य प्रोक्ष्य शेषं तदंभसा 143
आज्याभिघारणाच्छुद्धिः भस्मक्षेपेण वा भवेत् ।
भूमिस्थमुदकं शुद्धं वैतृष्ण्यं यत्र गो व्रजेत् 144
अव्याप्तं च हमेध्येन गन्धवर्णरसान्वितम् ।
न मुख्या निप्रुषोच्छिष्टं कुर्युरङ्गं च ते गताः 145
यास्म मूर्ध्निगताच्चास्यां दन्तान्तरसंस्थिताः ।
134 a पादा स्पृशन्ति ये चापि परान्चमन बिन्दवः 146
ते पार्थिवैस्समाः ज्ञेयाः न तैरप्यशुचिर्भवेत् 147
क्षुप्त्वा सुप्त्वा च पीत्वा च संभाष्यच्चाधमैस्सह ।
प्राणित्वाद्यायनादौ च शुचिरप्याचमेत्पुनः 148
द्रव्यहस्तस्समुच्छिष्टस्संनिधाया भिराचमेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

द्रव्यशुद्धिश्च पूर्वोक्ता कार्या द्रव्यानुरूपतः । 49
गोशकृन्मूत्र वल्मीक मृत्तिका भस्म वारिभिः ।
वेश्मायतनलिङ्गानां कार्यं मेभिर्विशोधनम् । 50
मार्जनैर्लेखनैस्सेकैः गोनिवासाञ्जनेन च ।
इति पञ्चविधा शुद्धिः कार्या भूमेर्विजानता । 51
ग्रामाद्धस्तशतं गत्वा नगरात्तच्चतुर्गुणम् ।
मही सर्वा ~~[illegible]~~ (प्य) मेध्या स्यान्निर्लेपा यत्र दृश्यते । 52
शुचिरापणजं द्रव्यं कारुहस्तस्सदा शुचिः ।
प्रसवे (स्न) च शुचिर्वत्सः शकुनिः फलशातनः । 53
विप्र गोमक्षिका श्वाजा ~~[illegible]~~ छाया च सूर्यरश्मयः ।
रजो भूर्वायुरापश्च स्पर्शे मेध्यानि सर्वदा । 54
नगं ग्रामं रथ्यां वा परिभ्राम्य गृहाद्बहिः ।
पादौ प्रक्षाल्य मृत्तोयैः गृहान्तः प्रविशेत्ततः । 55
135 शिरस्स्नानं प्रकुर्वीत स्रवन्तीषु विशेषतः ।
मृद्गोमयैस्समुद्धृत्य त्रिः शरीरं समन्ततः । 56
स्नानवस्त्रं परित्यज्य द्वितीयं परिधाय च ।
तेन स्नात्वा कषायाद्यैर्वस्त्रमन्यत्समाचरेत् । 57
सोपवीतस्समाचम्य पानीयमभिमन्त्रयेत् ।
एकविंशति पा(वा)रं तु शिवमन्त्रेण भक्तितः । 58
ध्यायमानश्शिवं शान्तं शनैस्स्नानं समाचरेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आचम्य चात्मनः कुर्यादभिषेकं ततः पुनः । 59
कुंभेन वर्णपुटकैः करद्वयपुटेन वा ।
शिवेनैकादशात्मानं स्वयमन्येन वा पुनः । 60
~~विघ्नकुम्भी विशुद्ध्यर्थमभिषिंचेत्समन्ततः~~ ।
आचम्य प्रोक्षयेद्द्रव्य स्तावदेवात्मनाश्शिरः । 61
ग्रहेच्च परिजप्तेन स्नानं कुंभे निवारयेत् ।
एवं भवति सुस्नातः सर्वपापविवर्जितः । 62
सर्वतीर्थाभिषेकस्य श्रद्धधानः फलं भवेत् ।
सन्ध्या यत्र परिभ्रष्टः शिवैकादश कत्रयम् । 63
(जप्त्वा) जित्वा विशुद्धिमाप्नोति स्नानहीनश्च तज्जपेत् ।
पूर्वण्य पूज्यदेवेशं गुरुमाग्निञ्च भक्तितः । 64
अदत्वाच्च बलिं तत्र शिवाष्टास्य शतं जपेत् ।
पत्रं पुष्पं फलं मूलमन्नपानाद्यमौषधम् । 65
135a अनिवेद्य न भुञ्जीत यदाहाराय कल्पितम् ।
अनिवेद्य मभुञ्जानो प्रायश्चित्तं समाचरेत् । 66
शिवाष्टशतजप्तेन पूजयाच्च विशुद्ध्यति ।
(नरस्य) असाध्यप्राणिसंघातं हत्वैकादशकं जपेत् । 67
हत्वाच्च पक्षिणस्सर्वाः त्रिरेकादशकं जपेत् ।
सर्पमार्जारनकुलान् श्वानमुष्ट्रं खरं हयम् । 68
अजाश्चांश्च मृगान्सर्वान् हत्वाचाष्टशतं जपेत् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

जपेदष्टसहस्रं तु क्षत्रविट्गोवधेषु च । 69
शिवाग्निगुरुपूजां च योगीन्द्रद्विजभोजनम् ।
हत्वा शूद्रं स्त्रियं बालं शिवमष्टशतं जपेत् । 70
जपेच्च तत्सहस्रं तु सच्छूद्रस्य प्रमारणे ।
सच्छूद्रः शिवभक्तश्च नान्यं मृतकसूतके । 71
संस्कारेषु च सर्वेषु गृहेषु किमुतान्यतः ।
सूतकेऽन्यत्र भोक्तव्यं नित्यं किञ्चिद्विवर्जयेत् । 72
भुक्त्वा प्रमादतः स्नेहात् शिवस्याष्टशतं जपेत् ।
श्वविड्वराहचण्डालैर्दुर्जनैः कपिकुक्कुटैः । 73
.. कगृध्रकाकाद्यैः स्पृष्टमन्नं न भक्षयेत् ।
शिवैकादशजप्तेन गव्येन हविषा पुनः । 74
पीतेन शुध्यते क्षिप्रमभोज्याहारदूषितः ।
तीर्थयात्राविशुद्धात्मा सद्भक्तश्शिवभावितः । 75
136 पुत्रैरपि न भुञ्जीत सार्धं क्रूरैरधार्मिकैः ।
महापातकशुध्यर्थं सहस्राणि जपेद्दश । 76
प्राणायामैस्त्रिसंध्यं च शिवमग्निं च पूजयेत् ।
रेतोमूत्रपुरीषाणि प्राश्य पीत्वा च वारुणीम् । 77
भुक्त्वा चान्नं न भोज्यान्नं गत्वा चाप्यन्त्यमस्त्रियम् ।
जप्त्वा शिवायुतं सम्यक् पूर्वोक्तविधिना पुनः । 78
पञ्चगव्यं सकृत्पीत्वा सर्वपापैः प्रमुच्यते ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

गोमूत्रं गोमयं क्षीरं दधि सर्पिरनुक्रमात् । 79
जपंश्च पञ्चभिर्वर्णैः ओंकारेण कुशोदकम् ।
पालाशपद्मपत्रे वा ताम्रे वाप्यथवा स्थितः । 80
कृत्वैकस्थं शिवेनैव जपमष्टशतं पुनः ।
अहोरात्रोषितस्स्नातः शिवस्य पुरतः स्थितः । 81
ओंकाराद्येव मन्त्रेण प्राङ्मुखस्तच्छिवैर्जपेत् ।
पीतमात्रे भवेत्पूतस्संपूर्णः शिवनिर्मलः । 82
ब्रह्महत्यादिभिः पापैस्सर्वैरपि विमुच्यते ।
मातापितृसमुद्भूतं सहसागन्तुकं च यत् । 83
अस्थिमज्जागतं पापं ब्रह्मकूर्चः क्षणाद्दहेत् ।
अष्टम्यां ब्रह्मकूर्चेन स्नापयित्वा सकृच्छिवम् । 84
136 a ..त्वाच्च पातकैर्मुक्तः शिवलोके महीयते ।
तस्मादेतत्परं गुह्यं महापापविनाशनम् । 85
प्रायश्चित्तं शिवेनोक्तं न देयं यस्य कस्यचित् ।
एतद्रहस्यं परमं प्रायश्चित्तं स्वयं बुधः । 86
कुर्यात्प्रच्छन्नपापेषु प्रकाशेष्वर्पयेद्गुरुम् ।
शिवज्ञानमिदं शान्तं महापातकनाशनम् । 87
प्रणिपत्य गुरुं प्राज्ञः प्रार्थयेच्छुद्धिमात्मनः ।

॥ इति श्री शिवधर्मोत्तरे प्रायश्चित्तकथनं
नामैकादशोऽध्यायः ॥ श्रीसांबसदा-
शिवाय परब्रह्मणे नमः ॥ x ॥

— x —

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

॥ श्रीः ॥

॥ अथ द्वादशोऽध्यायः ॥

॥ शिवाय गुरवे नमः ॥

अगस्त्यः —

श्रुत्वैतत्परमं गुह्यं गवां देहसमुद्भवम् ।
ब्रह्मकूर्चस्य माहात्म्यं अगस्त्यः पुनरब्रवीत् ॥ 1
भगवन्भुवनाद्यागोलोकः कीदृशस्स्मृतः ।
प्राप्यते कर्मणा तेन कियत्यध्वनि संस्थितः ॥ 2

स्कन्दोवाच -

श्रूयतामभिधास्यामि नमस्कृत्वा महेश्वरम् ।
गोमातृलोकं परमं सर्वकामसमन्वितम् ॥ 3
अधोधस्सर्वलोकानां नरकाः क्रमशस्स्थिताः ।
पातालानि ततस्सप्त पातालपतयस्तथा ॥ 4
यावत्प्रमाणं (नुस्यात्तु) सुस्वादु परिच्छिन्नं महीतलम् ।
137 तावत्प्रमाणान्येवाधः कूपाकाराणि तानि तु ॥ 5
तेषां प्रत्येकमुत्सेधं प्रमाणं परिकीर्तितम् ।
योजनानां सहस्राणि दश तत्वार्थवित्तमैः ॥ 6
सहस्रयोजनान्येषां तालाभ्यन्तरनेमयः ।
सुषिकाणां प्रमाणं तु सहस्राणि नवैकशः ॥ 7
तेषां सुषिरधामस्य नामतस्तं महातलम् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

दिव्य द्रव्योपसंपन्नं श्रीमच्चामीकराकृतिम् | 8
नागराजस्सदैवास्ते तस्मिन्कृतनिकेतनः |
अनन्तोऽनन्तधामा च मुचुकुन्दो नृपो बलिम् | 9
ततो रसातलं नाम शिलासं ख्यात भूमिकम् |
वासुकेर्नागराजस्य तत्र चारु महापुरम् | 10
पुरं पुलोमस्तत्रैव दानवाधिपतेर्महत् |
सुवर्णस्य च दैत्यानामन्येषां च महात्मनाम् | 11
ततस्तलातलं नाम शर्कराचितभूमिकम् |
नागानां स्वस्तिकादीनां निवासस्तत्र कीर्तितः | 12
दानवादिपतीनां च तत्रैव निलयाः कृताः |
रोचन हिरण्यक्षप्रभृतीनां महात्मनाम् | 13
ततस्सुतलमित्युक्तं पातालं पी.. भूतलम् |
तस्य चोर्ध्वं तु सर्वेषां अमयान्वितलं स्थितिः | 14
137a असुराधिपतिस्तत्र कालनेमिर्महत्पुरम् |
चारुचामीकरमयं वैनतेयस्य . . रम् | 15
ततश्च निश्चलं नाम पातालं रत्नभूमिकम् |
तस्मिन् स्महान्तको नाम च्यवनश्च कृतालयः | 16
तारकोग्निमुखस्तस्मिन् नाम्नाह्लादि दानवः |
दिवसं निकृतावासाः वह्लादस्सुतधैव च | 17
पातालं वितलं नाम शुक्लाक्षितितलं ततः |

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कम्बलाश्वतरानागौ सहितौ यत्र तिष्ठतः । 18
महाजंभहयग्रीवप्रभृतीनां महात्मनाम् ।
वीराणामसुरेन्द्राणां निवासस्तत्र कीर्तितः । 19
कृष्णं क्षितितलं तस्मात् पातालतलसंज्ञिकम् ।
शङ्कुकर्णमहाकर्णनमुचीनां निकेतनम् । 20
पातालसप्तकादूर्ध्वं सप्तद्वीपा मही स्थिता ।
समुद्रैस्सप्तभिर्युक्ता पर्वतैस्समलंकृता । 21
जंबूद्वीपः वृत्तमध्ये लक्षद्वीपस्ततो बहिः ।
त्रितयश्शाल्मलीद्वीपः कुशद्वीपश्च तद्बहिः । 22
क्रौञ्चद्वीपश्च परतः शाकद्वीपश्च तद्बहिः ।
परतः पुष्करद्वीपः सप्तमः परिकीर्तितः । 23
क्षारोदेक्षुरसोदौ च सुरोदश्च घृतोदधिः ।
138 तद्वत्क्षीरपूर्णश्च स्वादुतस्सप्तमस्स्मृतः । 24
सप्तद्वीपसमुद्राणां द्विगुणां द्विगुणोत्तरम् ।
आयामविस्तरौ ज्ञेयौ निरुक्तः परमस्स्मृतः । 25
हिमवान्हेमकूटश्च निषधश्चेति दक्षिणः ।
नीलश्श्वेतस्त्रिशृङ्गश्च मेरुरुत्तरतस्त्रयः । 26
मध्ये मेरुस्स्थितस्तेषां जम्बूद्वीपस्य मध्यतः ।
माल्यवान् पुरतो ज्ञेयः पश्चिमे गन्धमादनः । 27
एते पर्वतराजानो जम्बूद्वीपे नव स्थिताः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

प्लक्षद्वीपादिषु ज्ञेयास्सप्त सप्तैव पर्वताः । 28
पुष्करद्वीपमध्यस्थपर्वतो वलयाकृतिः ।
एकास्थित समन्ताच्च नामतो मानसोत्तरः । 29
बहिरेकशिलानाम स्वा(स्या)द्दस्य व्यवस्थितः ।
उर्वी करतलाकारा काञ्चनी परिमण्डली । 30
आरुद्रसन्निवेशां तु बिविष्टा विविधा क्षितौ ।
तस्य प्रमाणं निर्दिष्टा दश~~कोटि~~ योजनकोटयः । 31
लोकालोक इति ख्यातस्तत्पर्यन्ते समन्ततः ।
स्थितो हेममयः श्रीमान् अचलः परिमण्डितः । 32
योजनानां सहस्राणि दश वूर्ध्वं समुच्छ्रितः ।
तावदेव हि विस्तीर्णं तदर्ध्वं आक्रमान्यतः । 33
138 a प्रका(श)य ततो .. भिः परितापे वि(स्यति)हन्यते ।
लोकालोक इति प्रोक्तः ... चलो महान् । 34
.. कालोकं समाम्नोर्थ भूलोकः परिकीर्तितः ।
गन्धर्वयक्षरक्षोभिः पिशाचैश्च निषेवितः । 35
मानुषैः पशुभिश्चैव मृगैः पक्षिसरीसृपैः ।
स्थावरैर्विविधाकारैः भूतैरेतैस्तु षड्विधैः । 36
भूलोकतो भुवर्लोको यावदादित्यमण्डलम् ।
अन्तरेता वसन्त्यस्मिन् वसुरुद्रदिवाकरः । 37
आदित्यमण्डलादूर्ध्वं प्रोक्तं स्वर्लोकमध्रुवात् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

विमानकोटयस्तस्मिन् अष्टाविंशतिरासते । 38
मेढीभूतो विमानानां सर्वेषामुपरि ध्रुवः ।
उह्यन्ते यत्र बन्धानि क्रमेणानीलमण्डलैः । 39
योजनानां महीपृष्ठादूर्ध्वं पञ्चादश ध्रुवात् ।
नियुतान्यनिलस्कन्धास्सप्तास्मिन्नन्तरे स्थिताः । 40
पृथिव्यां प्रथमस्कन्धः स्थित आमेघमण्डलात् ।
आवहो नाम मेघानां व्यूहानां वाहनानि कृत् । 41
द्वितीयः प्रथमं वहं नाम निबन्धस्सूर्यमण्डले ।
तृतीयश्चोद्वहोपायः स्कन्धइन्द्रोः प्रतिष्ठितः । 42
139 चतुर्थस्संवहस्कन्धः स्थिरो नक्षत्रमण्डले ।
ग्रहेषु पञ्चमस्कन्धो विवहः परिकीर्तितः । 43
स्कन्धः परिवहः षष्ठः स्थितस्सप्तर्षिमण्डले ।
वायुः परिग्रहो नाम निबन्धस्सप्तमे ध्रुवे । 44
करोत्युत्पतनादीनां वर्षण्यादीनि चावहः ।
उपरिष्टात् पुनरेषाणां विमानावाहनक्रिया । 45
योजनानां ध्रुवात्कोटिं महर्लोकसमुच्छ्रितः ।
विनिवृत्ताधिकाराणामधिवासो महात्मनाम् । 46
विंशतिः कोट्यश्चाष्टौ च सुराणामधिकारिणाम् ।
जनास्स्वर्लोकमागत्य नियोगात्पद्मजन्मनः । 47
स्थित्वा मन्वन्तरं तत्र स्वव्यापारे वस्ताधिते ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

आरोहति महालोकमागच्छन्ति परे जनाः । 48
ब्रह्मणो दिवसेनोक्ता देवमार्गाश्चतुर्दश ।
क्रमेण कृत्वा कर्माणि महालोके वसन्ति ते । 49
कोटिद्वयं महालोकात् जनलोकं समुच्छ्रितः ।
साध्यानाममरा तस्मिन् वसन्ति सुखिनस्सदा । 50
योजनानां तपोलोकश्चतस्त्रः कोटियोजनाः ।
प्रजानां पतयस्तत्र मानसाः ब्रह्मणस्सुताः । 51
सत्यलोकस्तपोलोकात्कोटिषट्कं समुच्छ्रितः ।
139 a आस्ते देवृतस्तत्र सुराणामीश्वरैर्विराट् । 52
ब्राह्मलोकाद्विष्णुलोको द्विगुणेन समुच्छ्रितः ।
विस्तारेण तदर्धश्च दिव्यभोगसमन्वितः । 53
विष्णुलोकाच्छिरतः श्रीमच्छिवपुरं महत् ।
द्वात्रिंशत्कोटिविस्तीर्णं तदर्धेन समुच्छ्रितम् । 54
सूर्यायुतप्रतीकाशैर्विमानैस्सर्वगामिकैः ।
अनेकाकारविन्यासरचनान्युपशोभितैः । 55
मणिमुक्तादिभिर्दिव्यैस्तप्तजंबूनदप्रभैः ।
सहस्रशतहोमैश्च तदर्धगुणभूमिकैः । 56
अप्सरोगण अलसरोगेण संकीर्णैः सर्ववाद्यसमन्वितैः ।
गीतनृत्तरसोपेतैरप्रमेयगुणान्वितैः । 57
मनोजवैरसंख्येयैः परिवारसमन्वितैः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

कुड्यैर्हैरर्धचन्द्रैश्च घण्टाचामरभूषितैः । 58
मणिमुक्तावितानैश्च छत्रैश्चमणिदण्डकैः ।
सर्वरत्नचितैर्दिव्यैर्मुक्ताहारैश्च शोभितैः । 59
महासिंहासनैर्दिव्यैस्सर्वरत्नविभूषितैः ।
क्वचित्पुष्पगृहैर्व्याप्तमसंख्येयगुणाधिकम् । 60
सदापुष्पफलैर्वृक्षैः क्वचिद्व्याप्तं मनोरथैः ।
पुष्पोद्यानैर्मनोरम्यैर्दिव्यगन्धगुणान्वितैः । 61
अमृतस्यन्दिनीभिश्च नदीभिरुपशोभितम् ।
हेमरत्नशिलाबद्धो सोपानैस्स्फटिकप्रभैः । 62
सितरत्नासितैः पीतैश्शुक्लवर्णैस्सुगन्धिभिः ।
पक्ववर्णैस्तु मृदुभिः पद्मैश्शोभन्ति काञ्चनैः । 63
सदाविकसिताम्लानैः श्रीमद्भिः पञ्चहस्तकैः ।
दशद्वादशहस्तैश्च विंशद्धस्तैश्च शोभनैः । 64
नालैर्मरतकप्रख्यैः पत्रैश्च सुमनोहरैः ।
पूर्णा नीलोत्पलैश्चान्यैः दीर्घिकाश्च क्वचित्क्वचित् । 65
सिंहव्याघ्रमृगैर्दिव्यैर्गजवाजिखराननैः ।
गोमुखैरुष्ट्रवक्त्रैः नानाविहगरूपिभिः । 66
एकवक्त्रैर्द्विवक्त्रैश्च बहुवक्त्रैरवक्त्रकैः ।
एकपादैर्द्विपादैश्च बहुपादैरपादकैः । 67
एकहस्तैर्द्विहस्तैश्च बहुहस्तैरहस्तकैः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एकनेत्रैर्द्विनेत्रैश्च ~~बहु~~नेत्रैस्त्रिनेत्रकैः (ग्रीवैः) । 68

वामनैर्जटिलैर्मुण्डैर्दीर्घ~~ग्री~~र्महोदरैः ।

महाकायैर्महानासैर्महाकर्णैरकर्णकैः । 69

नानारूपाकृतिधरैर्नानाभरणभूषितैः ।

नानावेषधरैर्दिव्यैः कामरूपैर्महाबलैः । 70

नानाप्रवाहसंयुक्तैर्नानाशास्त्रविशारदैः ।

असंख्यातैर्गणैर्व्याप्तं स्त्रियश्चान्यैस्तथाविधाः । 71

कुब्जा वामनका दीर्घाः प[व]रदेहाः प[व]राननाः ।

मुण्डाश्च विकटास्स्थूलाः कराळाः विर[दा]नासिकाः । 72

140a लम्बोदरा ह्रस्वभुजाः ह्रस्वजंघोरु~~नासिकाः~~ जानुकाः ।

मृगेन्द्रवदनाश्चान्ये गजवाजिमुखास्तथा । 73

ह्रस्वाकुञ्चितकेशाश्च सुन्दराः प्रियदर्शनाः ।

अन्याश्च कामरूपिण्यः कोटिशः परिचारकाः । 74

बहिरन्तःप्रकाराश्च रमन्ते सर्वभूमिषु ।

विचित्रभूमयस्तत्र वज्रवैडूर्यसप्रभाः । 75

कश्चित्सुवर्णसंकाशाः कश्चिन्मरतकप्रभाः ।

स्फटिकाश्चेन्द्रनीलाश्च पद्मरागनिभाः (हिन्दी) कश्चित् । 76

चन्द्रमण्डलसंकाशाः कश्चिदन्धिवरप्रभाः ।

आम्लानैः पल्लवैश्च महापद्मैरलंकृताः । 77

कश्चिच्च विविधैरन्यैः कुसुमैरुपशोभिताः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एवं विचित्रवर्णाना भूमयोऽतीवशोभिताः । 78
रमन्ते यासु ~~स्त्री~~ स्तुमिता स्स्त्रीभिस्सार्धं द्विजाश्रिताः ।
नीलोत्पलदलश्यामाः पद्मपत्रायतेक्षणाः । 79
तप्तचामीकराकारा शुद्धश्यामास्तथापराः ।
प्रियङ्गुश्यामगौराश्च दिव्यगन्धामनोरमाः । 80
(सु)
कृशोदर्यस्सुजघनाः स्वरूपास्सुप्रियः प्रियाः ।
मत्तमातंगगामिन्यः स्तनभारविनामिताः । 81
141 मदालसास्सुकेशाश्च सर्वावयवशोभनाः ।
चित्रवस्त्रपरीधानाः दिव्याभरणभूषिताः । 82
सल्लापोल्लापकुशलाः गीतवाद्यरतिप्रियाः ।
दन्तांशुवारस्फुरितगण्डदेशा-
स्वात्मप्रभाभावितगात्रयष्ट्यः ।
~~साभा~~ स्वाभाविकैर्युपजनात्सुरतप्रभावै
प्रहृष्टचित्ताः रमयन्ति नार्यः । ॥ 83
नृत्तप्रयोगैर्मधुरैश्च गेयै-
स्तन्त्रीविबन्धैर्विविधैश्च वाद्यैः ।
हास्यैस्स्मितैर्लोचनविभ्रमैश्च
क्रीडाप्रयोगैर्विविधैस्तथान्यैः । ॥ 84
इति सर्वगुणोपेतैस्स्त्रीविशेषैर्मनोरमैः ।
असंख्यातैः पुरं व्याप्तमीश्वरस्य समन्ततः । 85

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

(महत्)

तस्माद्येन कृतो भद्रमीश्वरायतनं हमत् ।

शुद्धस्फटिकसंकाशं स्थानमाद्यमुमापतेः ॥ 86

तत्रास्ति भगवा .. यः पूज्यमानो गणेश्वरैः ।

सिद्धैश्च स्थानसंप्राप्तैः ब्रह्मविष्णवग्निवायुभिः ॥ 87

ईश्वरायतनस्याग्रे श्रीमान्धर्मवृषस्थितः ।

यस्मिन्वृषवपर . . . गोमातरस्तथा ॥ 88

गोलोकशिवलोकश्च ह्येक एव ततः स्मृताः ।

(वरुणा) रुद्रलोकस्य गोलोकस्यापि तद्गुणाः ॥ 89

नन्दा भद्रा च सुरभिः सुशील - - दा ।

141a इति गोमातरः पञ्च शिवलोके व्यवस्थिताः ॥ 90

एता . . धात्र्या सर्वलोकस्य मातरः ।

तर्पयन्ति जगत्कृत्स्नं दिव्यमात्मरसामृ .. ॥ 91

.. पतीर्थ शिवस्थाना दीश्वरेच्छावशानुगाः ।

उपकाराय सर्वेषामिमं लोकं समाश्रिताः ॥ 92

तृणानि स्वादन्ति वसन्त्यरण्ये पिबन्ति तोयान्यपरिग्रह .. ।

दुह्यन्ति वाह्यन्ति पुनन्ति पान्ति गव्यैः रसैः जीवति जीवलोकः ॥ 93

कुतस्तेषां हि पापानि येषां गृहमलंकृतम् ।

सततं बालवत्साभिः गोभिः श्रीभिरिव स्वयम् ॥ 94

ये कुर्वन्ति गवां भक्तिं तृणतोयप्रदानतः ।

प्राणसंरोपणाद्यैश्च गवां लोकं व्रजन्ति ते ॥ 95

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तृणतोयप्रदेशेषु नीत्वा यत्रैव मातरम् ।
ये रक्षन्ति सदा गोपाः शिवलोकं व्रजन्ति ते । 96
ये शिवाय गुरोर्वापि गां प्रयच्छन्ति भक्तितः ।
ते मोदन्ते शिवे लोके भोगैः भोगैःकल्पायुतं नराः । 97
निवेद्य गोरसं भक्त्या शिवाय शिवयोगिने ।
सर्वान्लोकानवाप्नोति शिवलोके महीयते । 98
इहलोकसुखार्थाय परलोकसुखाय च ।
142 सर्वस्वेनापि गास्तस्माद्धीत विपश्चितः । 99
अहो नु सुमहदाश्चर्यमहो सुष्ठु सुभाषितम् ।
यत्पवित्रं च मृष्टं च गोरसं पुष्टिवर्धनम् ~~वर्जितम्~~ । 100
गोमात्रा निर्जितो लोको मृष्टाशा गोमता(ला) जिताः ।
गोमात्रा निर्जितं स्वर्गं समस्तं गोमतं (त) जगत् । 101
गावो धनं मनुष्याणां गवां च धनमुत्तमम् ।
गावो येषां गृहे न स्युः अबन्धुरिव तद्गृहम् । 102
स्पृष्टाश्च गावश्शमयन्ति पापं
दत्तास्तु गावस्त्रिदिवं नयन्ति ।
संरक्षिता गोपनयन्ति वित्तं
गोभिर्न तुल्यं शिवमस्ति किञ्चित् ॥ 103
संपन्नमश्नाति ददाति नित्यं
पापापहं मित्रविवर्धनं च ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स एव साम्यं परिभुज्यते व
गोभिर्न तुल्यं शिवमास्ति किञ्चित् ॥ 104
तृणानि शुष्काणि रसे चरित्वा
पीतानि तोयान्यमृतं स्रवन्ति ।
यद्गोमयाद्यैश्च पुनन्ति लोकान्
गोभिर्न तुल्यं शिवमस्ति किञ्चित् ॥ 105
सदान्य लोके परमं पवित्रं
गवां रसं पुष्टिविवर्धनञ्च ।
अश्नाति युक्ताविव धान्ययुक्तां
मिष्टं शिवं ये शिवमल्पयत्नाः ॥ 106
गोमातृशालां यः कुर्यात्सुदृढामिष्टकामयम् ।
142a मृत्पिण्डकाष्ठकुड्याभ्यां स गन्धान्विताम् । 107
नातिविपिधानैर्गवाक्षैश्च रसमलंकृतम् ।
पश्चाद्द्वेव कर्तव्यं उच्चैर्देव गवाक्षरम् । 108
वंकैश्च वंशाविदृतैः कोटि कृत्वा समं दृढम् ।
मध्यः प्रदातव्यं येन मूत्रमधो व्रजेत् । 109
गोमयं तद्गवाक्षैश्च क्षिप्त्वा दूरं पुनर्नयेत् ।
अवकीर्यां भस्म सर्वं धूपयित्वा समंततः । 110
कृशा वृद्धातुराणां च पृथक्पाकं प्रकल्पयेत् ।
(हित्वा)
दृढवान्च बालवृद्धानां वत्सानामितरेषां पृथक्भवेत् । 111

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

हृद्या संस्वाह भ. द्राणां निवासश्च प्रकल्पयेत् ।
परिधत्स्रवन्ति सौख्येन वसन्ति च रमन्ति च । 112
ब्रह्माणमीश्वरं विष्णुं गोशालायां सदा यजेत् ।
विन्यस्य पूर्ववदनं वशात्कुर्ये गवाक्षरे । 113
सिंहारूढां महादुर्गां पञ्च सन्धाति मातरम् ।
विघ्नेशं सोमनन्दीं च पूर्वादभ्यर्च्य विन्यसेत् । 114
नदीतटह्रदयाश्वत्थ बिल्व वल्मीक मृत्तिकाः ।
पञ्चगव्येन संयोज्य देवात्पिण्डे प्रकल्पयेत् । 115
द्वारे गवां गवाक्षाभ्यां मृदाकार्यौ सुशोभनौ ।
सन्धीश्वर महाकालौ वृषांश्चोर्ध्वे बहिस्स्थितम् । 116
143 ईदृशस्स वृषेन्द्रस्स्यात् सर्वनयविशोभनौ ।
प्रीतौ दर्शनभावेन गवां स्युस्तादृशाः प्रजाः । 117
सं
अष्टम्यास्तमनं कृत्वा भोजनं च प्रकामतः ।
(कां)
स्वस्ति वात्यं ततश्चाग्रे प्रधानानि निवेशयेत् । 118
इति यः कारयेद्भक्त्या गोमातृगृहमीदृशम् ।
स विधूयाशु पापानि शिवलोके महीयते । 119
बालसूर्यप्रतीकाशैस्सर्वकामसमन्वितैः ।
काञ्चनैर्भवनैर्दिव्यैस्सर्वरत्नोपशोभितैः । 120
सप्तभूमैः पुरवरैश्शतसंख्यैर्यथेप्सितैः ।
प्रत्येकमपि दिव्येन स्त्रीसहस्रेण संयुतैः । 121

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

एतैरन्यैश्च विपुलैर्महाभोगैर्यथेप्सितैः । 122
क्रीडते तत्र पुण्यात्मा यावदाचन्द्रतारकम् ।
ततः कालात्परिभ्रष्टः क्रमाल्लोकमवाप्नुयात् । 123
हरिब्रह्मादिलोकेषु ते दन्ते मेरुमूर्धनि
(त)
तस्मादपि च्युतः कालान् प्राप्नुयादुत्तरान्कुरून् । 124
ततो भारतवर्षेऽस्मिन् राजा भवति धार्मिकः ।
स्वरूप . . बग श्रीमान्सर्वकामसमन्वितः ।
ततः पा . . सना यो पय मा . . ते पुनः । 125
यस्मिन्ग्रामे गवां गोष्ठे जलाशयसमीपतः + ।
143a कुर्याद्गृहाकुलस्थाने तत्रैकात्मा चिरं नयेत् । 126 +
गवामेकत्र संभू - ,
तस्मादेकत्र वसतिश्चिरं ग्रामं प्रकल्पयेत् + 127
नान्यस्थानं यदा पश्येत् गवां ग्रामं सुशोभनम् । +
पूर्वमेव गवां स्थानं शोधय यत्नाद्द्विने दिने + 128
अशोधयेत गोवासमात्मीयं वा परस्य वा । +
संप्रदाय गवां सौख्यं शिवलोके महीयते + 129
दुःखं कृत्वा लभेद्दुःखं सुखं कृत्वा सुखं लभेत् । +
तस्माद्धि सर्वतत्त्वेषु सुखार्थी सुखमाचरेत् । + 130
अप्येकक्षणमुत्पाद्य सुखमार्तस्य देहिनः । +
प्राप्नोति सुमहत्सौख्यमर्ककोटि शिवे पुरे । 131

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

तस्माद्गां चारयेद्ग्रीष्मे जलवृक्षतृणान्विते ।
(स्व)
वर्षासु कर्दमे स्थाने गिरिपृष्ठसमीपतः । 132
(ले)
हेमन्ते यदिवा काशे रात्रौ च प्रसरेन्नयेत् ।
निस्तृणेऽपि गवां स्थाने वसेद्येन धृतिर्भवेत् । 133
ग्रीष्मे निवासयेद्गांश्च स्वादुतोयं महाह्रदैः ।
क्षारश्च स्वसलिलं क्षारं ग्रीष्मादन्यत्र शोभितम् । 134
एवं यः पालयन्गां तु सगोपश्चार यात सः ।
144 सर्वपापविनिर्मुक्तश्शिवलोके महीयते । 135
~~स्तंभा~~ स्तंभांश्च गोष्ठमध्ये कश्चित्कश्चित् ।
कण्डूयनार्थं निखनेत् शिवलोकं स गच्छति । 136
अनाथान्दुर्बलान्स्वस्थान्रोगादिपरिपीडितान् ।
(गा)
मृतवत्साल्पदुग्धांश्च मातृभिः परिवर्जितान् । 137
स्वकीयान्परकीयान्वा वत्सान्यः परिपालयेत् ।
विधूय सर्वपापानि शिवलोके महीयते । 138
दुर्बलो दहते प्राणान् ये वत्सान्क्षीरजीविनः ।
निष्पीडयन्ति पापिष्ठाः पच्यन्ते नरकेषु ते । 139
निश्वासन्ति गृहे येषां दह्यमाना क्षुधाग्निना ।
निर्दधुर्निर्दयैर्वत्साः पच्यन्ते नरकेषु ते । 140
विक्रोशन्तः क्षुधाविष्टाः शुष्ककण्ठोष्ठतालुकाः ।
नरकाग्नौ प्रपच्यन्ते वर्षकोटिशतं नराः । 141

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

नरकेभ्यस्तु निर्मुक्ताः स्वावशेषेण कर्मणा ।
यत्र तत्राभिजायन्ते तत्र तत्र बुभुक्षिताः । 142
योनिकोटिसहस्रेषु परिक्रम्य क्रमात्पुनः ।
मनुष्ययोनौ जायन्ते दरिद्राः परतन्त्रकाः । 143
तस्मान्न पीडयेद्वत्सान् नृप - - ।
तत्क्षीरं न दुहेत्पुनः । 144
द्वौ मासौ न दुहेच्चैव चतुर्मासं तदर्धकम् ।
(न्त) वा
144 a तस्माद्बालवत्सानां बन्धनं तु वर्जयेत् । 145
. . . . . . . मं समम् ।
मधुनापनयं धूमं कुर्यात्कण्डूयनं तथा । 146
क्रिमिरोगक्षुधादिभ्यः सर्वयत्नेन पालयेत् ।
य एवं बालवत्सानामुपकाराय वर्तते । 147
इहाप्नोति धनं सौख्यं परत्र च शिवं पुरम् ।
ग्रामं भोक्तृगृहं प्राप्तं नृपतिर्यस्समुद्धरेत् । 148
कुलैकविंशमुत्तार्य शिवलोके महीयते ।
यस्तु द्विजः प्रयत्नेन(न) कामभोज्यान् समुद्धरेत् । 149
प्रतिग्रहादुपायेन शिवलोके महीयते ।
यः प्रदद्यात्सुधवलं शिवं दत्वा महावृषम् । 150
विस्तीर्णोरस्कमुच्चं च समुन्नतबृहत्ककुदम् ।
ऊर्ध्वकुञ्चितशृङ्गाग्रमल्पशृङ्गं नरं तथा । 151

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

स्थूलाग्रशृङ्गमुक्तं (शु) वा सर्वावयवशोभितम् ।
स्रक्चित्रैश्च कुसुमैः कुङ्कुमाद्यैश्च वर्णकैः ॥ 152
यथाशोभं समारुह्य निभवे . . जयेत् ।
वृषं मणिरथोपेतं घण्टा (ट) चामरकान्वितम् ॥ 153
स्वस्तिकैरर्धचन्द्रैश्च नानारत्नैश्च शोभितम् ।
145 अष्टाङ्गुलप्रविस्तीर्णं हेमपट्ट . . . . ॥ 154
राजतं चर्मणा वापि मालामुरसि विन्यसेत् ।
तद्विध्यापुष्पमालां च पुच्छान्तररु (कु) . श्रिताम् ॥ 155
नानाभरणसंयुक्तां मुद्रारा . . प्रलम्बिनीम् ।
हेमराजतराशिं वा नानारत्नोपशोभिताम् ॥ 156
कार्यं शृङ्गद्वयं तस्य सवस्त्रं चामरान्वितम् ।
पट्टं शिरसि सौवर्णं चन्द्रं . . भूषितम् ॥ 157
चामराश्वत्थपत्रैश्च बध्नीयाद्रत्नसंयुतम् ।
ग्रैवेयकेन दिव्येन नानारत्नोपशोभितम् ॥ 158
घण्टां कास्यां म . . . ध्वनित सुस्वनाम् ।
स्फुरैः स्सौवर्णकाद्यैश्च केयूराङ्गदभूषितम् ॥ 159
पट्टवस्त्रैर्विचित्रैश्च यथाशोभमलंकृतम् ।
विमानं द . . वाद्यादिमङ्गलैः ॥ 160
दोधूयमानचमरैः शिवाय विनिवेदयेत् ।
यान . . णामसंरथ्यानात् (त) त्प्रसूतिकुलेषु च ॥ 161

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

. . . . . . . यते ।

सच्चमानुष्यकं लोकमागच्छेत्पुनर् ध्रुवम् । 162

145a ज्ञानयोगं समासाद्य तत्रैव स विमुच्यते ।

। 163

ए . . . . .

सत्सिकां मनसः प्राणां बहुक्षीरदुहां च गाम् ।

नानाभरणसंयुक्ताः पूर्णशोभासमन्विताः । 164

. . पूज्य . . जश्चैव गोकुले ।

इत्येवं यः प्रदद्यात्तु वृषेन्द्रं शिवणाकुले । 165

सपूर्वोक्तं लभते पुण्यं वृषदा . ।

सद्गुणोपेत मनस्वाहं शिवाश्रमे । 166

दश धेनुप्रदानस्य फलं शोभनमाप्नुयात् ।

उत्पाद्य सस्यानि तृणं चरन्ति

. . भूयस्सलिलं पिबन्ति । 167

आहारपीडां प्रवदन्ति किञ्चित्

अहो वृषैर्जीविति जीवलोकः । .

वृषाणां वृषमारूढाः ये चरन्ति नराधमाः । 168

ते महाप्रळयं यावत् पच्यन्ते नरकादिषु ।

वृषपृष्ठेन गच्छंतः ज्ञानं ज्ञात्वा सदा नृपः । 169

नवा रदे मपेक्षेत पापं तस्मा . पि तत्स . ।

ये वृषा . . क्षुन्निर्मुक्ताः स्त्रिश्शूलाङ्का शिवं प्रति । 170

तान्वाहयन्ति ये मूढाः पापाचार नराधमाः ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

146 ते महाप्रळयं याव दशेष नरकादिषु । 171
(त):
पच्यन्ते विविधैर्घोरैः पत्नीपुत्रादिसंयुतैः ।
राज्ञां तु विषये यस्य नन्तश्च नराधमाः । 172
वृषान्वहन्ति पापिष्ठाः पापं तस्यापि तत्समम् ।
तस्मान्निवारयेद्राजा बाध्यमानान् जनैर्वृषान् । 173
अन्यथा घोरेषु नरकेषु च तत्स्वय.. ।
वाह्यमानान्वृषान्भूपो निवार्य स्वर्गमाप्नुयात् । 174
इहाराज्यं धनं सौख्यमायुः कीर्तिं श्रियं सुतान् ।
यश्च पापविशुद्ध्यर्थं प्रायश्चित्तं सं(न) . . ते । 175
वृषैकादशकं दत्वा वृषं रक्षेच्च मातरम् ।
. कैकां रक्षणं कुर्यात् गोरूपाणां शतं शतम् । 176
वर्धते च सुखेनैव चरन्ति समरन्ति च ।
गोब्राह्मणं प्रविरळं सं(न)दन्ते तरतस्तथा । 177
तस्मात्र विरळा गाश्च चारयेत्पालयेति च ।
गोभिर्नैकत्र रक्षास्याद्दम्यास्स्वाह भर्तृकाः । 178
(स्सु)
अभिद्रवन्ति ये गास्स्यु ताभि नश्यं .. चोपिच ।
शरद्ग्रीष्मे च मध्याह्ने छायायां विनिवेशयेत् । 179
चारयेत् ।
एवं प्रविरळा गावः सदा कुर्यात्सु पालयेत् । 180
146a . . पातकैस्सर्वैः शिवलोके ~~महीयते~~ मवाप्नुयात् ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

ये - - . जनाः । 181
(विदन्ति)
ते विदन्ति महाभोगान्नराः शिवपुरे चिरम् ।
ये शिवाश्रमतीर्थानि श्रद्धया यान्ति मानवाः । 182
ते वसन्ति महाभोगैर्दिव्यैः शिवपुर . . ः ।
ये दानं शिवभक्तेभ्यः प्रयच्छन्ति विपश्चितः । 183
ते क्रीडन्ति महाभोगैर्नित्यं शिवपुरे नराः ।
न स शिवः परिपूर्णत्वात्किञ्चिदर्थं समीहते । 184
किन्तु तन्नाममात्रेण दत्तं भवति चाक्षयम् ।
~~दानेनानेन~~ भगवान् प्रीयतां मे ~~स्सस~~ शिवस्सदा । 185
इत्युक्त्वा वमर्थिभ्यो दानं स्यादक्षयं फलम् ।
यस्तूलपूर्णं विस्तीर्णं दद्याद्वस्त्रमपूर्वकम् । 186
मृदुचर्मकृतं वापि सितवस्त्रावकुण्ठितम् ।
कृष्णाजिनो परिच्छन्नं पुष्पधूपादिवासितम् । 187
शिवज्ञानाभियुक्ताय श्रद्धया विनिवेदयेत् ।
यस्तूलवस्त्रतन्तूनां रोम्णां संख्यानि यावति । 188
तावद्वर्षसहस्राणि शिवलोके महीयते ।
शिवमुद्दिश्य यद्द्रव्यं यः प्रदद्यात्तदर्थिने । 189
शाकमूलफलाद्यं वा तस्य पुण्यफलं श्रृणु ।
यावत्सा - - - : दीनां संख्यपत्रफलेषु च । 190
तावद्वर्षसहस्राणि शिवलोके महीयते ।



Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

भिक्षां सव्यञ्जनं दत्वा शिवभक्ताय भक्तितः । 191
वर्षलक्षं महाभोगैः शिवलोके महीयते ।
दध्यन्नं भिक्षपूर्णं वा भिक्षापात्रं सुशोभनम् । 192
दद्याद्यश्शिवभक्ताय तस्य पुण्यफलं श्रृणु ।
वर्णकोटिशतं दिव्यं महाभोगैस्समन्वितः । 193
स्थित्वा शिवपुरे देही तस्यान्ते स महीपतिः ।
सुशीतकेन तोयेन शिवभक्तं पिपासितम् । 194
तर्पयित्वा शिवलोके वर्षलक्षं प्रमोदते ।
कलशं कर्करीयुक्तं वस्त्रपूतांबुपूरितम् । 195
प्रदद्याच्छिवभक्ताय तस्य पुण्यफलं श्रृणु ।
शुद्धस्फटिकसंकाशैर्विमानैस्सर्वगामिकैः । 196
संप्रदद्य शिवलोके वर्षलक्षं प्रमोदते ।
पालाश पद्मपत्रैर्वा यः कृत्वा पुटिकानि तु । 197
प्रदद्या - - - मपात्रफलं लभेत् ।
यस्ताम्रपात्रं सुकृतं प्रदद्याच्छिवयोगिने । 198
- - पात्रस्य दानस्य दत्तस्य फलमाप्नुयात् ।
वयोगिने । 199
कोटि कोटि सकल्पानां शिवलोके महीयते ।
147a सौप्यकं शिवमुद्दिश्य यो भक्तं शिवधार्मिकम् । 200
भोजयित्वा - ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

. . पूरितं शान्तं शक्त्या भक्त्या च पूजयेत् । २०।
स दिव्यैर्महाभोगैश्शिवलोके महीयते ।
त्रिशूलपाणे यो भक्त्या वहते शिवव । २०२
. . . त्वा प्रयत्नेन शिवलोकमवाप्नुयात् ।
भोजयेच्छ्रद्धया भक्त्या यश्शिवब्रह्मचारिणम् । २०३
स भोगैः क्रीडते दिव्यैश्शिवलोके त्वनारतः ।
यश्शिवाश्रम . . . स्थं ग्रस्थं भोजयेद्बुधः । २०४
विपुलैस्समहाभोगैः क्रीडन्शिवपुरे वसेत् ।
शिवाश्रमवनस्थं यः कन्दमूलफलैर्यजेत् । २०५
दिव्यान्प्राप्नुयाद्भोगानीश्वरस्य पुरे स्थितः ।
एकं पाशुपतं भक्त्या पूजयित्वा प्रणम्य च । २०६
नानाविधैर्महाभोगैश्शिवलोके महीयते ।
महाव्रतचरामेकां भिक्षाय प्रतिपादयेत् । २०७
दिव्यैस्सुमहाभोगैश्शिवलोके महीयते ।
अप्यन्त्यजमनाचारं शिवभक्तिरतं नरम् । २०८
भोजयित्वा यथा भक्त्या शिवलोके महीयते ।
ज्ञानयोगबहिष्ठाये लोके सामान्यकर्मभिः । २०९
पूजयन्ति शिवं भक्त्या शिवलोके स . . .
148 येभ्यः पुरा दैवतमातृपूजा । लोके खिले ते गोग्रह - २१०
वासनां च ।

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

सर्वेऽपि तिष्ठन्ति दिवि प्रहृष्टाः ।

भवेयुरन्ते पृथ च

ध्यानेन तु लोके पुरुषौ महान्तौ

तौ गच्छतस्सूर्य करात्प्रभूया । 211

एको मुनिर्योगरतस्तथास्य

प्राणान्प्रियान्यस्त्यजतः गवार्थे ।

शेने वापि करीपवह्नौ

तस्य प्रदानैर्नतपोभिरुग्रैः । 212

गतिं प्रयाति स्म सयज्ञसंघैः

नीजोपि यां गच्छति गोग्रहेषु ।

पाल्याः
वाप्याः . . परमास पूजा

लोके शर्वके गोग्रहसावितानाम् । 213

सं तिष्ठन्ति चिरञ्च कालं

भवेयुरन्ते पृथिवीश्वराश्च । 214

च ज्ञानयोगेन शाक्रान्ता ये यजन्ते परमं शिवम् ।

ते सर्व दुःखनिर्मुक्ता अ . . . । 215

इत्येतच्छिवलोकस्य माहात्म्यं समुदाहृतम् ।

गोलोकस्य प्रसङ्गेन तद्भक्तानां समानतः । 216

शिवलोकादहि ज्ञेयम . . ।

. . कारख्यातिः प्रकृतिरष्टमी । 217

148a ईदृशानां तथान्यानां कोट्यो ज्ञेयास्सहस्रशः ।
सर्वज्ञत्वात्प्रधानस्य तिर - - - - । 218
न
स ज्ञेयं प्रकृतेर्मध्यतस्स्थितम् ।
ब्रह्मणः परमस्थानं पद्मरागसमप्रभम् । 219
ब्रह्मलोकात्परं ज्ञेयं विष्णोस्स्थानं - - ।
- . द्रनीलप्रतीकाशैर्महाभोगैरलङ्कृतम् । 220
विष्णुलोकात्परं स्थानं कुमारस्य महात्मनः ।
*स्वच्छमौक्तिकसंकाशं महाभोगसमन्वितम् । 221
सं . . त्परं स्थानमुमादेव्याः प्रकीर्तितम् ।
तप्तचामीकरप्रख्यमशेषगुणसंयुतम् । 222
. . मास्थानाच्च परमं स्थानमाद्यमुमापतेः ।
दिनकृत्कोटिसंकाशं सर्वकामसमन्वितम् । 223
अप्रमेयगुणं शुद्धं मनौपम्यं सनातनम् ।
सर्वाश्च - - भोगैर्विविधैस्समलङ्कृतम् । 224
महाप्रवाहसंयुक्तैस्सूर्यायुतसमप्रभैः ।
गणैरध्युषितैस्स्थानमसंख्यैर्योगितत्परैः । 225
हरिर्हिरण्यगर्भ . . श्चैव सुरुद्रादिवाकरैः ।
स्तूयते भगवन्नित्यं तत्स्थानप्राप्तिकाङ्क्षिभिः । 226
. . न ध्यानरतैश्शान्तैर्भिक्षाहारैर्जितेन्द्रियैः ।
प्राप्यन्ते तत्परं द्रव्यं ब्राह्मणैः . . किल्बिषैः । 227

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

149 . . संप्राप्य ~~संप्राप्य~~ . . सिद्ध्या समस्तक्लेशवर्जिताः ।
सर्वज्ञ . . शुद्ध - . . । 228
. . . - - - . . ।

. - - . . च्छाया पुनः । 229
इति नित्यं विशुद्धंच स्थानमाद्यमुमापते ।
दिव्यं शा - . - - । 230
. . - - - - - . ।

. . . यं संयुक्तः नित्य मक्षयम् । 231
स्वदेवता प्रणीतेन ज्ञानयोगेन - . ।
- - . - - - - . । 232

. . - . . . दारूपिणः ।
भवन्ति वशिनस्सिद्धा स्वभोगानामधीश्वराः । 233
. . - - - . ।

. . . . . . . । 234
अन्ये कदिवन्ता शिव ज्ञान परायणेः ।
शिवधर्मपरस्सूक्ष्मः . . . । 235
. . - - - - ।

. . . . फलं महत् । 236
देहान्ते तेन धर्मेण स्थानमेनमवाप्नुयात् ।
- - - - - - . । 237

see calcutta folio 87a line 3

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

149 a . . . . . यातः

तत्रार्धसमितं कालं क्रीडमानस्सुखं वसेत् । 238

त . . . . . . . . । 

. . . . ब्रह्मस्थित्वेद्धिवपुरे सुखी । 239

ततस्तान्ब्रह्म विष्णवादि लोकान् प्रा . . । 

. . . . . . . . । 240

. . . . . . वेत्पुनः । 

ततस्सयोग विधिना पुनर्ध्यायति शङ्करम् । 241

~~संप्राप्यते~~ . . . । 

. . . . . . . . । 242

योगामृते नरैः

संप्राप्यते परं स्थानं शिवलोके ~~महीयते~~ । 

~~मृते नरैः~~

तस्मादन्तर्बहिश्च . . . । 243

. . . . . । 

. . . . . . । 244

. . विनाप्येतत् स्थानमेकं न स लभ्यते । 

शिवप्रियेण विधिना नान्यैः प्रत . . . । 245

ततस्स . . ग्रीणां गवां श्वेतं सुशोभनम् । 

. . . ण्यर्धेन . . . . । 246

. . . . . . . . । 

. . . . . . । 247

— . X . — Calcutta folio 87a last line.

No. 66014.
Palm leaf.
Folia 77. (73—149.)
No of Lines Per Page. 7.
Script. Telugu.
Size 16 * 1½

S. Natarajan
30. 7. 63

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

T. NO 75

Transcript of Hayu- library . madras .
M S. No 660.14

# शिवधर्मोत्तरम्

| | | | |
|---|---|---|---|
| 1. | स्कन्दागस्त्यसंवादरूपम् षडक्षरमन्त्रप्रभाववर्णनम् शिवज्ञानफलम् गोषडङ्गविधिः. | श्रीशिवधर्मोत्तरशास्त्रे गोषडङ्गविधिर्नाम प्रथमोऽध्यायः. | 1-11 |
| 2. | विद्यादानविधिस्तत्फलं च | श्रीशिवधर्मोत्तरे शास्त्रे विद्यादानफलं नाम द्वितीयोऽध्यायः | 12-31 |
| 3. | शिवयोगिशुश्रूषाफलम्; पञ्चमहायज्ञनिरूपणम्; तत्र ज्ञानयज्ञेनापवर्गप्राप्तिवर्णनम् | श्रीशिवधर्मोत्तरे पञ्चमहायज्ञगुणाध्यायो नाम तृतीयोऽध्यायः | 32-41 |
| 4 | सत्पात्रेभ्यः शिवयोगिभ्यः दानकर्तुः जायमानफलप्रदर्शनम् | शिवधर्मोत्तरे सत्पात्रगुणं नाम चतुर्थोऽध्यायः | 42-52 |
| 5. | शिवधर्मलक्षणम्, तेषां फलवर्णनं च। शिवकर्मणा जायमानसद्गतिवर्णनम्। | शिवधर्मोत्तरे शिवसंगत्यः पञ्चमोऽध्यायः | 53-58 |
| 6. | नरकप्रापकपापभेदनिरूपणम् | श्रीशिवधर्मोत्तरे पापभेदो नाम षष्ठोऽध्यायः | 59-69 |
| 7. | दानफलवर्णनम्, नरकेषु पापिभिर्भुज्यमानयातनानां वर्णनम् | श्रीशिवधर्मोत्तरे नरकविशेषो नाम सप्तमोऽध्यायः | 70-95 |
| 8. | संसारप्रसवाख्यानम् | शिवधर्मोत्तरे संसारप्रसवाख्यानं नामाष्टमोऽध्यायः | 96-119 |
| 9. | स्वर्गनरकस्वरूपवर्णनं तत्कारणभूतपुण्यपापवर्णनं च | श्रीशिवधर्मोत्तरे स्वर्गनरकचिह्नो नाम नवमोऽध्यायः | 120-124 |

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.

| | | | |
|---|---|---|---|
| 10. | मोक्षदायकज्ञानयोगवर्णनम् · | शिवधर्मोत्तरे ज्ञान-योगो नाम दशमोऽध्यायः | 125–14 |
| 11 | पापविशुद्धिकराणां प्रायश्चित्तानां कथनम् | श्रीशिवधर्मोत्तरे प्रायश्चि-त्तकथनं नामैकादशोऽध्यायः | 146–15 |
| 12. | पातालादि शिवलोकपर्यन्तानां लोकानां निरूपणम् · तत्र विशेषतो गोलोकवर्णनम् | अन्तिमभागो न विद्यते | 155–18 |

Transcript/MS from the collection of the IFP reproduced with authorization of the IFP in
accordance with the Agreement signed between IFP, EFEO and MIRI on January 31, 2006.